९३/२६

93/26

अथ

ग्रन्थनामः-	"तैत्तिरीयकसारार्थः"	
कर्तृनामः-	?	
विषयः-	"अद्वैतवेदान्तम्"	

Tithariyaka ~~Sa~~ Saratra.

Adyatha Vedhanam.

891

॥श्रीरामाय नमः॥श्रीगणेशाय नमः॥ ॥श्रीरामं काशिकारामं नत्वा विद्यागुरुं च गुरून् ॥ तैत्तिरीय
कसारार्थः पूर्वाचार्यैः कृतोऽपि तैः ॥१॥ प्रकाश्यते मतिस्फूर्त्यै नातिविस्तरसंग्रहं ॥ पद्यान्यत्र विलिख्यं
ते पूर्वाचार्योदितान्यपि ॥२॥ मामकीनानि पद्यानि पवित्राणि भवंतु ते ॥ गंगाप्रवाहयोगेन रथ्यां
भांसि यथा तथा ॥३॥ अत्यन्तसूचयपितो त माधवश्रीनाथसदाशिवमौक्तिकालिः ॥ श्रीमाधवोक्ति
व्रजविद्रुमांकासता कुले राजतु मामकीनो ॥४॥ नमामि वार्त्तिकाचार्यान् विद्यारण्यमुनीनपि ॥ तत्सन्मा
र्गसमाश्रित्य संचरामि यथामति ॥५॥ विद्यारण्योक्तविधया अत्यर्थः संप्रकाशते ॥ क्वचित्क्वचि
त्सुरेश्वरादिश्रीसूक्तिश्च विलिख्यते ॥६॥ सुरेश्वराचार्यसन्मार्गस्तत्र तादात्म्यवलंब्यते ॥ शिरोरत्नस्य मे ना
काश्यामः प्रीतोऽस्तु सत्यितः ॥७॥ अस्त्वापरोक्षमथवा क्रमशो ह्ये वा करिवाल्लके ॥ संतो मुदं प्रयांत्येव दोषदृ
ष्टिं न कुर्वते ॥८॥ वेदांतस्यागतार्थत्वाद्द्विधिकांडेन केवलं ॥ कर्मजिः संभवान्मुक्तेरस्या रं ...
ति चेत् ॥९॥ कर्मकांडोदितां सर्वां नित्यनैमित्तिकक्रिया ॥ संचितो हः तो यफलान्मुक्तिफलकाः १

स्मृता॥१०॥धर्मेण पापमित्यादिश्रुतिसंक्रान्तितत: ॥काम्यानि निषिद्धकारीरीदर्शप्रभृतिकान्यपि
॥११॥ पशुवृष्टिस्वर्गफलान्यत: कर्म न मुक्तये ॥ अथात इति सूत्रस्थधर्मजिज्ञासनकारणात् ॥१२॥ सि
द्धवस्तुविचारस्य तस्मान्नास्य गताधता ॥ इहजन्मान्तरस्थैर्वा कर्मभि: शुद्धमनन्तरं ॥१३॥ विवेकादिकुसिद्धौ
च मोक्षेच्छायां विमुक्तये ॥ विद्याप्रारभ्यते पुंसां ब्रह्मात्मैक्यावबोधिनी ॥१४॥ अत: काण्डद्वये हेतुहे
तुमद्भावसंगति: ॥ कर्मानुष्ठानहेतुं तान् कामादीन् वेत्तुमर्हति ॥१५॥ विद्येवात: सेवयोग्या रक्षुं
मोक्षार्थिनं प्रति ॥ स यथा काम इत्येवं योऽकाम इति सादरं ॥१६॥ कामाकामैकहेतूनो बंधमोक्षौ श्रुतिर्ज
गौ ॥ स यथा काम इत्याद्या श्रुति: कामैकहेतुकं ॥१७॥ बंधं मोक्षं तु क्रतोयो मह्ल्याद्या श्रुमहेतुकं ॥ प्रा
हेति वार्त्तिकस्यार्थ: स यथेत्यादिकस्य तु ॥१८॥ कामादीनां च को हेतु: कथं बंधकृतेति चेन्न ॥ नि:प्रपंचा
त्मविषयाज्ञानान्मिथ्यामतिर्भवेत् ॥१९॥ मिथ्याज्ञानाच्च कामादिर्जायते तदनन्तरं ॥ शुभाशुभप्रवृ
त्ति: स्यात्सुखाद्याप्तिस्तत: स्मृता ॥२०॥ सर्वप्रवृत्तिनाशाय समर्थं ब्रह्मवेदनं ॥ स्यात् ब्रह्मधियोत्पत्तेस्तनुत्वात्तु
प्रवृत्तिर्विदुषां क्वचित् ॥२१॥ अत्र मीमांसकै: किंचिच्छंकितं तदनूद्यते ॥ मोक्षार्थी न प्रवर्तेत तत्र का

२२
स्यानि भिक्षयोः ॥ नित्यनैमित्तिकं कुर्यात्प्रत्यवायजिहासया ॥ योगारूढस्य नाशेन शारीरांतरसंभ
वे॥ हेत्वन्नाशाद्विनाशाने निर्वाणं कर्मणि भवेत् ॥ संन्यासे केवलं पुं॰ कुर्युर्व्ये काम्यं प्रायश्चित्ते नहि ॥२४॥
सर्वकर्माणि तेषां च योगेन दीयते न भवेत् । तस्मात्संचितं कर्म स्यात्क्षेपो नैव युज्यते ॥२५॥
दशविप्रवधादीनां बहूनां कर्मणां नृषु ॥ संभवात्स्वर्गनिरकाद्यनेकफलदायिनां ॥२६॥ प्रा
प्राणिस्वनकर्माणि व्यंजकेच समानतः ॥ आदौ समारंभकेण प्रायश्चित्त कर्मणि ॥ प्रबलेन प्र
तिद्वंद्वं दुर्बलं कर्म क्षिप्यते ॥२७॥ अनारंभकमिति संचितं त्विदमित्यादिकाः स्मृतिः ॥२८॥ पुण्य
पापवशात्स्वर्गादवरोहवतां नृणां ॥ मनुष्यलोके देहस्य धारणं दर्शयत्यतः ॥२९॥ स्वर्गप्रदस्य देह
स्यारंभकत्वेन नाविलं ॥ कर्मक्षीणं ततो ज्ञानेन विना कर्म न नश्यति ॥३०॥ ॥तद्य इति॥ तद्य इह
रमणीयचरणा इत्यादि श्रुतिरित्यर्थः ॥ यत्तु कर्म ब्रजस्यैकभावे कर्त्वेन नतत्कुर्यं ॥ कर्मैककर्मवर्जनके
बहूनां जन्मनां भवेत् ~~[illegible]~~ बहुकुरेति स्मरणात् द्विमुनानाविधिक्रियायोऽपि श्वशूकरखरोष्ट्राणां
गोजाविमृगपक्षिणां चण्डालपुल्कसानां च ब्रह्महा योनिमृच्छतीति स्मृते रित्यर्थः ॥ आ- २

नारब्धफलं यस्मात्क्षुद्रं तस्यासुभ्रस्य च ॥ नाशकं नित्यकर्मेति यदुक्तं तन्न युज्यते ॥३१॥ नि
त्याकरणजानर्थनिवृत्तिर्नित्यकर्मणां ॥ फले मीमांसकैरिष्टे तद्विरोधः प्रसज्यते ॥३२॥ अनारब्ध
फलस्यैव निवृत्तिः पापकर्मणः ॥ नित्यानुष्ठानतो नैव पुण्यस्याप्यविरोधतः ॥३३॥ यत्काम्यव
र्जनं तच्चाकामस्यात्मनजन्मनः ॥ अलैक्यबोधादज्ञाने नष्टे नाशोऽन्यथा नहि ॥३४॥ उत्पाद्यत्वेन
मोक्षस्य नित्यत्वान्न विकार्यता ॥ कूटस्थत्वान्न संस्कारो गुणदोषविवर्जनात् ॥३५॥ नित्याप्तत्वादा
त्मतया नाप्यत्वमपि विद्यते ॥ तस्मान्निरर्थकं कर्म मोक्षे नैवोपयुज्यते ॥३६॥ आत्मान्यस्वर्गपश्वादि
फलायैव तदिष्यते ॥ यत्तु नित्याकरणज प्रत्यवायनिवृत्तये ॥ क्रियन्ते नित्यकर्माणीत्येत
दप्यसमंजसं ॥३७॥ दुःखमागामि यत्तत्तु प्रत्यवाय इति स्मृतः ॥ दुरितात्पूर्वमिति वा स च नाशा
वतो भवेत् ॥३८॥ निषिद्धाचारकत्वेन नाभावात्तस्य संभवः ॥ स्मृतावकुर्वन्नित्यत्र शत्रप्रत्ययतो
क्रिया ॥३९॥ भवेद्दोषस्य जनिकाचिन्ति चेदभिधीयते ॥ एवमर्थस्तु शब्दस्य भवेदित्यनेनान्वयः ॥

नारब्धफलं यस्माद्भुक्तं तस्मात्क्रतस्य च॥नाशकं नित्यकर्मेति यदुक्तं तन्न युज्यते॥३१॥नि
त्याकरणजानर्थनिवृत्तिर्नित्यकर्मणः॥फलं मीमांसकैरिष्टं तद्विरोधः प्रसज्यते॥३२॥अनारब्ध
फलस्यैव निवृत्तिः पापकर्मणः॥नित्यानुष्ठानतो नैव पुण्यस्याप्यविरोधतः॥३३॥यत्काम्यव
र्जनं तच्चकामस्याज्ञानजन्मनः॥अलेख्यबोधादज्ञाने नष्टे नाशो न्यथा न हि॥३४॥उत्पाद्यत्वेन
मोक्षस्य नित्यत्वान्न विकार्यता॥कूटस्थत्वान्न संस्कारो गुणदोषविवर्जनात्॥३५॥नित्याप्तत्वाद
सत्तया नाप्यत्वमपि विद्यते॥तस्मान्निरर्थकं कर्म मोक्षे नैवोपयुज्यते॥३६॥आसान्यस्वर्गपश्वादि
फलायैव तदिष्यते॥यत्तु नित्याकरणजप्रत्यवायनिवृत्तये॥क्रियंते नित्यकर्माणीत्येत
दप्यसमंजसं॥३७॥दुःखमागामि यत्तत्तु प्रत्यवाय इति स्मृतः॥दुरितापूर्वमिति वा सा च नाभा
वतो भवेत्॥३८॥निषिद्धाचरणत्वेन नाभावात्तस्य संभवः॥स्मृतावकुर्वन्नित्यं त्वरा च प्रत्ययते
क्रिया॥३९॥भवेद्दोषस्य जनिका चेति चेदभिधीयते॥एतावतैव शब्दस्य भवेदित्यनेनान्वयः॥

अकुर्वन्विहितं कर्म निंदितं च समाचरन्॥ प्रसजंश्चेंद्रियेष्वर्थेषु नरः पतनमृच्छतीति स्मृतावित्यर्थः॥
यदि नित्याधिष्ठानं यथावस्था तदाभवेत्॥ संचितो हि क्षयो नायमकार्षीद्विहितं ततः॥ अत्य
वायी भवेन्नूनमिति शिष्टैस्तु लक्ष्यते॥४२॥ लक्षणेत्यादिसूत्रे हि हेतुलक्षणयोः समं॥ अक्रियायाः प्र
त्यवाये लक्षकत्वं व्यपेक्ष्यते॥४३॥ अदृष्टस्यानुपलंभस्याभावप्रमितिहेतुता॥ तार्किकैः प्रामना
वादे हेतुताध्यवसीयते॥४४॥ भावस्यैव हेतुत्वेति कथं सिद्धेदिदं तव॥ भावो यथा तथाभावः कारणं
कार्यवन्मतं॥४५॥ इति शिष्टैरभीष्टत्वादिति चेदभिधीयते॥ नाभावस्य स्वरूपेण हेतुतास्माभिरि
ष्यते॥४६॥ दोषत्वापकृता मात्रे ज्ञातस्यास्य विवक्षिते॥ ज्ञातस्य दोषहेतुत्वे तत्क्रियाज्ञानहानतः॥ दो
x वा॰८ षाभावे प्रसज्येतानुपलब्धेस्तथैव च॥४७॥ ज्ञाताभावा एव हेतुत्वं सत्तया हेतुता यदि॥ प्रत्यक्षत्वं प्रस
ज्येताभावज्ञानस्य वादिनः॥४८॥ अज्ञातकरणो हि प्रत्यक्षे घटबुद्धिवत्॥ ज्ञातस्य प्रागभाव
स्यजन्मलापकृतेष्यते॥४९॥ यस्मादसौ पुरा नासीत्तेन जातोऽधुनास्ति॥ वार्तिकाभरणे स्माभिः
प्रागभावस्य दूषितः॥ तस्मान्नित्याक्रियाजन्यदोषध्वंसेन नित्यकं॥ सर्व एते पुण्यलोका भवंती ३

तिष्ठते तत्तथा ॥४९॥ कर्मणेत्यादिवाक्यात्तु पितृलोकाप्तये तु तत् ॥ अतो ज्ञानं विना मुक्तिरिति यच्च
दसंगतं ॥५०॥ उत्कृष्टप्रीतिरूपाया मुक्तिः सा कर्मजेति चेत् ॥ स्यात्तस्याः कर्मजन्यत्वे स्वर्गादि
वदनित्यता ॥५१॥ सत्यमीश्वरतविद्यायाः सामर्थ्याद्विनिवार्यता ॥ मोक्षस्यानित्यतादोष इति चेत्त
दसंमतं ॥५२॥ प्रमाणजनिता विद्योपासनाया निवर्त्तयेत् ॥ क्रियाफलस्यानित्यत्वं नोत्यः कल्प्यो
वकल्प्यते ॥५३॥ स्वफलानित्यतापोहसमर्थोपासना कथं ॥ क्रियाफलविनाशित्वं विनिवारयितुं क्षमा ॥५४॥
अकारकत्वाद्विद्यायास्तु मोक्षानित्यत्वहानिकृत् ॥ प्रध्वंसाभाववन्नित्यं कर्मजन्यमपीति चेत् ॥५५॥
यद्भावरूपं कार्यं स्यात्तदनित्यमिति स्थितेः ॥ मोक्षस्य भावरूपत्वादनित्यत्वं प्रसज्यते ॥५६॥ नात्रक्रि
यासमुत्पन्नचाकला व्यतिरेकतः ॥ ध्वंस एव न सिद्धः स्यात्तद्वानित्यं घटादिवत् ॥५७॥ अस्मन्म
ते विकल्पः स्याद्ध्वंसो हि नरशृंगवत् ॥ ध्वंसस्यासंभवे तर्हि कपालाद्युदये सति ॥५८॥ नस्याद्दृष्टा
द्यप्रतीतिर्घटादावितिचेन्न तत् ॥ घटादिकार्यं सदपि कपालाद्यवरोधतः ॥५९॥ कदाचिन्नोप

भाव्ये तु तदभावे तु दृश्यते ॥ विरोधकार्यरूपत्वाद प्रतीतिर्न दुष्यति ॥६०॥ नास्य भावस्य संबंधः
क्रियया वा गुणेन वा ॥ निरात्मकत्वान्नैवालं संबद्धुं केनचित् क्वचित् ॥६१॥ ध्वंसस्य प्रागभावस्य
नित्यतानित्यता गुणः ॥ उत्पत्त्याख्या क्रिया नाशाख्या क्रियेत्येतन्न युज्यते ॥६२॥ अभावव्यवहारस्य चा
तुर्विध्यस्य सिद्धये ॥ अविद्याकल्पितो भावः दृश्यतां न तु वास्तवः ॥६३॥ किंच प्रागभावत्वेन नि
विज्ञातो ह्यधुना ह्यसौ ॥ घटोपलंभसामग्र्यां घटवत्वेन नेक्षितः ॥६४॥ तदुपादाननाशोत्तः कृपा
लो ध्वंसवान् भवेत् ॥ इति ध्वंसोऽनुमातव्यः संस्कारात्मकः इष्यते ॥६५॥ सुषुप्ति प्रलयादौ च भ्रष्ट
स्य पुनर्भवः ॥ नोपपन्नस्ततः सर्व कार्यस्याभ्युपगम्यते ॥६६॥ संस्कार उत्तरावस्था निर्वाच्यातीं
द्रियात्मकः ॥ स्मृत्यादिकारणीभूत संस्कारो प्येवमिष्यते ॥६७॥ अनुभूत्युत्तरावस्था नान्य
स्तस्य प्रमाणतः ॥ कर्मणो वोत्तरावस्था प्रागवस्था फलस्य वा ॥६८॥ अपूर्वमिति विज्ञेयं न पदा
र्थांतरं मतं ॥ क्रियाया उत्तरावस्था कारकातिशयः स्मृतः ॥६९॥ तस्मान्नित्यः प्रत्यक्ष ध्वंसोऽस्ति

परसंमतः॥ तस्माद् विद्यामुक्तिर्नो स्याद् वस्त्रानमात्मनि॥७०॥ न चाविद्याप्रहाणं स्याद्ब्रह्मविद्यामृते
क्वचित्॥ तस्माद्विद्याश्रयं ज्ञेयापारब्धोपनिषत्परा॥७१॥ सा चाविद्यापनुत्यर्था विद्येयं वा
समागामिनी॥ अत्यन्तनाशहेतुत्वात् शिथिलीकरणाच्च वा॥७२॥ संस्कृते ब्रह्मविद्येयं प्रसिद्धोपनि
षच्छ्वेत॥ एतत्प्रसिद्धितो ह्यात्मविद्याया मुक्तिहेतुता॥७३॥ जीवस्यात्मतया ब्रह्म परं यस्मादु
पाश्रितं॥ अस्यास्तन्निमित्तभूतायां विद्यायां परमात्मनः॥७४॥ तस्मादुपनिषद्विद्या तादर्थ्यादु
षदुच्यते॥ उपनिषदुच्यत इत्यर्थः॥ अथ श्री माधवीयाख्य विद्यारण्यकृतमुच्यते॥ सा तु
पनिषत्त्रेधा तैत्तिरीयकसंहिता॥७५॥ सांहिती वारुणी चापि याज्ञकीति प्रकीर्तिता॥ आद्या प्र
पाठके तत्संहिताध्यानकीर्तनात्॥७६॥ सांहिती स्याद्द्वितीये च तृतीये च प्रपाठके॥ तृतीया ब्र
ह्मविद्याया संप्रदायप्रवर्तकः॥७७॥ वरुणस्तेन वित्तेया वारुणीति चतुर्थके॥ पञ्चोपसुक्ता
मे त्राम्यकीर्तितास्तेन याज्ञिकी॥ अस्य विद्या त्रिधा भिन्ना द्वारूपास्तत्र मुख्यता॥७८॥ तत्रा

धिकारसिद्ध्यर्थं संहिता प्रथमोदिता ॥८०॥ चित्तस्यैकाग्रतायां हि साक्षात्कारस्य संभवः ॥ ध्यानाभ्या
सानवेदेकाग्र्यध्यानाभ्यासाय संहिता ॥८१॥ मेयनिर्णयकृच्छ्लोकाः कीर्तिता माधवाख्यया ॥ विद्यारण्ये
स्त एवात्र लिख्यते न तु नूतनाः ॥८२॥ प्रमाणं मेयमापेक्षं मेयतीक्रस्य युज्यते ॥ इत्याकांक्षानिवृत्त्य
र्थं मेयमत्र निरूप्यते ॥८३॥ अविज्ञातः प्रमाणस्य विषयो वादिनां मतः ॥ सोऽज्ञातार्थः प्रमाणात्किं
सिद्धो यद्वानुभूतितः ॥८४॥ न तावन्मानतः सिद्धिर्मानात्पूर्वमपेक्षणात् ॥ सिद्धमज्ञातमुद्दिश्य
ह्येव मानं प्रवर्त्तते ॥८५॥ अज्ञातत्वेन सिद्धं चेन्मानात्तत्फलेन सिध्यति ॥ इति चेन्नित्यचैतन्यानुभ
वेनानुभूयते ॥८६॥ मानप्रवृत्तितः पूर्वमज्ञातत्वं यथा तथा ॥ ज्ञातत्वमप्युत्तरत्र चैतन्येनानु
भूयते ॥८७॥ रूपार्थसंप्रष्टत्वे न नेत्रेण रसगंधयोः ॥ अगृहीतिर्यथा तद्वज्ज्ञाताज्ञातत्वयोर्भवे
त् ॥८८॥ नेत्रागृहीतयोरन्यद्वेषकं स्याद्यथा तथा ॥ ज्ञाताज्ञाततयाग्राह्ये मेये अपि ते चिता 4
॥८९॥ सर्ववस्तु ज्ञाततया ह्यज्ञातत्वेन वा सदा ॥ साक्षिचैतन्यविषय इति शास्त्रेषु डिंडिमः ॥९०॥

चितैवाज्ञाततासिद्धावज्ञानोयः समीयते ॥ सर्वमानैरतश्चित्वं कस्याज्ञाततयमीदृशं ॥८०॥ चेतनोचे
तनोवायमज्ञातो यद्यचेतनः ॥ तन्माज्ञातार्थकार्यस्य जडस्याज्ञातताकृतः ॥८१॥ अज्ञातरज्जुकार्य
भ॰ ५ स्य सर्पस्याज्ञाता नहि ॥ अज्ञातब्रह्मकार्यस्य जडस्याज्ञातताकृतः ॥८२॥ रज्जुसर्पनिदानमिबो
द्धुमिच्छामि मानतः ॥ इति चेद्व्यवहर्तॄणां ज्ञानांगीकुर्वंति केपि च ॥८३॥ किं चाज्ञातत्वतो लब्धं ति
रोधानं न चेतरत् ॥ स्वयमेव तिरोभूते जडे कान्या तिरोहितिः ॥८४॥ आविर्भावे रूपे तु चेतनेन्येन ×च५
निर्मितात् ॥ तिरोधानाद्वि हेतोस्ति शुक्लवस्त्रे मषी यथा ॥८५॥ चेद्रमलिनयेद्राकृनीलम
त्रेन तु कश्चित् ॥ एवं चेतनमज्ञातं जडं स्वज्ञानदेहवत् ॥ कार्यकारणरूपं यन्निखिलं जडमीक्ष्यतां ॥८६॥
तेन सर्वेपि चिद्रूपः स्वप्रकाशस्तिरोहितः ॥ तिरोहिते नोजयं तज्ज्ञासते वंदराकुवत् ॥८७॥ तेन प्र
काशनाशो वा नास्ति चेद्रुवदेव हि ॥ राकुग्रस्तत्वमिंदोश्चेदस्मद्दृष्ट्यैव भासते ॥८८॥ अज्ञातत्वं चि
तस्तद्वदस्मद्दृष्ट्यैव भासते ॥ ततोनुभव एवैको विषयोज्ञानलक्षणः ॥ प्रसादीनामतः सिद्धा

यत्र तेषां प्रमाणता ॥१००॥ अनुभूतिग्रहायैव प्रवृत्तान्यपि कृत्स्नशः ॥ सामग्र्याखिलमानानि गृह्णं
ति जडसंयुतं ॥१०१॥ शुक्तिकाग्रहणायैव प्रवृत्तमपि लोचनं ॥ गृह्णाति रजतोपेतं शुक्त्यंशं दोषयो
गतः ॥१०२॥ वेदान्ते तु रसामग्री दुष्टैवाचक्षुरादिका ॥ तज्जाधीरत्र गृह्णाति स्फूर्तिं रूपादिसंयुतां
॥१०३॥ एवं च सति विभ्रान्तः कल्पितेरजनेष्वयं ॥ प्रमाणं मनुते यद्वद्रूपादौ मनुजस्तथा ॥ ४ ॥ ध
र्मिण्यप्यन्ते तमखिलं ज्ञानमिच्छन्ति वादिनः ॥ सर्वधर्मांशसद्रूपे प्रमा धीरत्र योखिला ॥५॥ विप
र्ययप्रकारे तु वदन्ति रजतादिके ॥६॥ तथा रूपादिके बुद्धिः स्याद्विपर्ययरूपिणी ॥ एवं न्यायेन सं
सिद्धा प्रमाणानां प्रमाणता ॥७॥ अनल्पेव तथाप्यज्ञारूपादावेव तां विदुः ॥ एकं ब्रह्म तथा प्रमेयं स्या
द्दलात्त्वेन चेतनः ॥८॥ सर्वेषामपि मानानामज्ञातत्वोत्थितो विना ॥ वेदान्तानां विरोधेण
निरस्तो बोधज्ञानघातिनां ॥९॥ अज्ञातश्चेतनो मेयो नाज्ञातोन्योस्ति कश्चन ॥ किं चानन्दात्मरूपस्य ६
पुरुषार्थस्य हेतवः ॥१०॥ वेदान्तास्तेन तन्मेय आनन्दात्मा परः पुमान् ॥ इति श्रीमाधवीयो

परसंमतः॥ तस्माद् विद्यामुक्तिर्नो स्याद् वस्थानमात्मनि॥७०॥ न चाविद्याप्रहाणे स्याद् ब्रह्मविद्यामृते
क्वचित्॥ तस्माद्विद्यामयं ज्ञेयाप्रारब्धोपनिषत्परो॥७१॥ से चाविद्यापनुत्यर्था विद्यायैवा
मृगामिनी॥ अत्यन्तनाशहेतुत्वात्कीथलीकरणाच्चवा॥७२॥ संस्कृते ब्रह्मविद्येयं प्रसिद्धोपनि
षत्कृवेत्॥ एतत्प्रसिद्धितोप्यात्मविद्याया मुक्तिहेतुता॥७३॥ जीवस्यात्मतया ब्रह्म परं यस्मादु
पास्थितं॥ अस्यान्निमित्तभूतायां विद्यायां परमात्मनः॥७४॥ तस्मादुपनिषद्विद्या तादर्थ्यादु
पकुच्यते॥ उपनिषद्व्यात इत्यर्थः॥ अथश्रीमाधवीयाख्यविद्यारण्यात्तमुच्यते॥ कृष्णयजु
पनिषद्भेधा तैत्तिरीयकसंहिता॥७५॥ सांहिती वारुणी चापि याज्ञकीति प्रकीर्तिता॥ आद्यप्र
पाठके तत्संहिताध्यानकीर्तनात्॥७६॥ सांहिती स्याद्द्वितीये च तृतीये च प्रपाठके॥ उक्ताया ब्र
ह्मविद्यायाः संप्रदायप्रवर्तकः॥७७॥ वरुणस्तेन विख्याता वारुणीति चतुर्थके॥७८॥ यज्ञोपयुक्ता
मंत्रास्तु कीर्तितास्तेन याज्ञिकी॥ [illegible]॥ ब्रह्मविद्या त्रिधा प्रोक्ता द्वारूप्यास्तत्र मुख्यता॥७९॥ तत्रा

५×पक्षो दुःखे किं तु सर्वापहारतः ॥ सर्वस्य तुल्यन्तु पक्षो ब्रह्मधीपरिमोचिणः ॥ क्रियमाणे× ५

सौदर्शितिः क्लेशसंचयः ॥११॥ श्रेयांसि बहुविघ्नानि तस्मात् ब्रह्मविवेदने ॥ देवाश्च रन्ति विघ्नानां बहु
शः संभवादपि ॥१२॥ आदौ विघ्ननिवृत्त्यर्थं यतितव्यं महात्मभिः ॥ विघ्नसंभव उक्तोऽत्र बृहदारण्य
वार्त्तिके ॥१३॥ स्वस्य ब्रह्मत्वमज्ञाय यागदानादिकर्मसु ॥ स्वतोऽन्यां देवतां मत्वा यजन् द्वान्बलि
जं यथा ॥१४॥ स्वरूपापाधिक्य मज्ञाय स्वल्पशक्तिर्बलिर्वशः ॥ पातीत्यनुषंगः ॥ अपि नष्टे
पशोः पुंसः एकस्मिन्नपि तस्करैः ॥ क्रियमाणे महद्दुःखं स्यात्सर्वेषां दिवौकसां ॥१५॥ तस्मादेषा
न प्रियं तद्यन्मनुष्या विजानते ॥ ब्रह्मतत्त्वमतो देवाः प्रतिबध्नन्ति वेदनं ॥१६॥ प्रमादिनो ब
हिश्चित्ताः पिशुनाः कलहोत्सुकाः ॥ संन्यासिनोऽपि दृश्यन्ते देवसंदूषिताशयाः ॥ इति ॥ वर्णाश्रमा
भिमानी सन्नेतत्त्वज्ञः परात्सुखः ॥ देवादीनामाश्रयः स्यात्सर्वेषां मापि पीलिकं ॥१७॥ कर्मणा
नार्जितो यस्मान्न कश्चिदुपकारकृत् ॥ गृही देवादिभिस्तस्माद् दाजितान्स्वकर्मभिः ॥१८॥ स्वस्व
कर्मार्जितत्वेन देवाद्याः स्वस्वदेहकृत् ॥ अविनाशे स्वदेहस्य तिष्ठन्ति गृहिणः स्वोपकारिणः ॥१९॥ तर्हि

नतावांचल्येन सहेति विघ्नन्निवहो योगस्य संकीर्त्तितः ॥ सत्वार्थं संग्रहणाति ॥ व्याधिश्च
तेति ॥ नम साम्भिचेत्तविमूढतेत्यन्वयः ॥ उपास्यवस्तुन्यर्था निश्चयो भ्रांतिदर्शनमित्य
ह ॥ भ्रांतिज्ञानमुपास्यवस्तुनीति । चित्तैकाग्र्यस्यांतरांतरा निद्रा हि रात्रिहित्यमलधर्म
स्मिकत्वमित्याह तदिति । कदाचिद्यागादौ प्रवृत्तिः कदाचिदन्यत्रेत्यनवस्थितत्वमित्याह ।
चांचल्येन सहेति ॥ नत्सहिताचित्तैकाग्र्यस्य विछिन्नतेति योगविघ्नो घ इत्यर्थः ॥ रात्र
इत्यादिवाक्येष्विभिजत्रत्राद्येन कथ्यते ॥ प्राणस्याक्षश्चाभिमानी देवः स च रामस्कन्नः ॥ २१ ॥
शं नः सुखकृदस्मा कमितिसवत्रियोज्यतां ॥ रात्रेरपान हत्तेश्च वरुणश्चाभिमानवान् ॥ २२ ॥
अर्यमा रविबिंबस्य चक्षुषश्चाभिमानवान् ॥ इंद्रो बलस्य वाकोश्च गरुड्यो स्तु बृहस्पतिः ॥ २३ ॥
विष्णुः पादाभिमानी स्यात्स च विस्तीर्णपादवान् ॥ यद्वा प्राणादिकांगेषु मित्रादेरभिमानिनः ॥ २४ ॥
उरुक्रमः सर्वदेहस्य विराडूस्यादभिमानवान् ॥ उरुक्रमपदेनात्र विराड्देवोऽभिधीयते ॥ २५ ॥

तुष्या नन्तुष्टानं नाशो यं गृहिणो महान् ॥ एष दे वा द्विजाः सर्वे न हि शाक्यास्थिकि शितुं ॥२०॥ कर्मण्यमनु
ष्ठानं रोगालस्यादिनानुयत ॥ नासा वा त्येतिके नाशो यतः पश्चान्नरिष्यति ॥२१॥ मान् सर्व
स्व हानिर्नो ब्रह्मयाथात्म्यविद्यया ॥ इति देवादयो भिया मानि बध्नं तियत्नतरत्तिव ॥ ब्रह्मज्ञस्य
नराः स्युर्मुक्तो विघ्ना य देवताः ॥ आत्मेत्यास्त्र वदेवनां स्वासा न थो हि ने च्छते ॥२२॥ भक्तेस्त
स्य हनेत्यादेरयमर्थो विस्तीयतो ॥ अन्येषां विघ्नकर्तास्त्त स्यादेवा मिति श्रुतेः ॥२३॥ तस्मात्क्षु
द्रस्य विघ्नानां संभवात्तन्निवृत्तये ॥ आद्यानुवाके संहित्या जप्यो मंत्र उदीर्यते ॥२४॥ आदौ तु ब्र x वृ९
ह्मज्ञस्य नायं मंत्र उदीरितः ॥ विघ्नानावरणादेवैः कर्मणोपेक्षितत्वतः ॥२५॥ यज्ञदाना
दिभिर्विघ्नो विद्यायाः शाम्यतीति चेत् ॥ न मंत्रजपनो रत्यंच भवेद्दृष्टांतरं नृणां ॥२६॥ अरूच्येया
ने विद्यायां महापापानि कुर्वते ॥ रूच्युत्यादकयज्ञाद्यैस्तेषां भवति नाशने ॥२७॥ ...मिति ॥ ७
महापापवतां नृणां ज्ञानयज्ञोनरोचते ॥ प्रत्युतज्ञानयज्ञस्य प्रद्वेषः भवति स्वतः इति पुराणेषु शि

इत्यर्थः॥ तेषां विविदिषाख्याया रुचेर्जनकतोच्यते॥ संसारिकफलत्वेपि यज्ञादेः काम्यकर्म
॥ई राधितस्य स्यादेव पापनाशकतोच्यते॥ लिंगे विषयवैराग्यं तस्य पापक्षयस्य चाङ्कते॥
ति॥ तमेतं वेदानुवचनेनेत्यादेरित्यर्थः॥ सूत्रेति॥ ब्रह्मण्याधाय कर्माणीत्यादेरित्यर्थः॥
लिंगमिति॥ श्रुद्ध्यमाने तु न चित्ते मोक्षरागपि न कर्मभिः॥ वैराग्यं ब्रह्मलोकादौ व्यनक्त्यथ
शुद्धिमलिंमिति नैष्कर्म्यसिद्धावुक्तेरवादिति भाव॥ रागादिनिवृत्ते निष्टे चित्तविक्षेपज्ञाना
रूपिवि प्रदे॥ एकाग्र्यहेतूपासनाख्ययोगविघ्नान्दर्शयति॥ व्याधिस्त्यानेति सूत्रे एतेपतेजिलि
नोदिताः॥ ऋं नहत्यादिकोमंत्रो जपव्यक्तानि दृत्तये॥ २०॥ व्याधीति॥ व्याधिस्त्यानसंशयप्र
मादालस्याविरतिभ्रांतिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्त
रायाइतिसूत्रेणेत्यर्थः॥ व्याधिश्चित्तविमूढतावतमसोपास्यार्थसंदिग्धता चोपास्यस्म
रणालसत्वसहितं वैराग्यस्य वर्जनं॥ भ्रांतिज्ञानमुपास्यवस्तुनि तदेकाग्र्यस्य विच्छिं

५×चक्षुराद्यनुमेयत्वा न्नसाक्षात्साक्षिणेक्ष्यते॥ प्राणस्य व्यवधानेन साक्षिवेद्यो ऽवेद्यते॥ श्लोकः सन्निहितश्चातः प्रत्यक्षोयं
विवक्षितः॥ प्राणे अभिमानपीताच्छरीरादिकं बहिर्गतम्॥ अत्स्तत्वं स्फुटमस्यातः स्फूर्तिर्वायो विवक्षिता ×५
३९
क्ष्यते॥ वाय्वासकब्रह्मनते नमो ब्रह्मण इत्यतः॥ सिद्धं त्वाद्युत्तरं वाक्यव्यर्थमित्यत्र ऋणुते॥३७॥
सूत्रस्यादौ परोक्षत्वान्नमस्कारः प्रकीर्तितः॥ प्रत्यक्षत्वेन निर्देशो वायुशब्देन संनवेत्॥ ब्र
ह्मत्वादिति निर्देशात् ब्रह्मस्यास्ति परोक्षता॥ प्रत्यक्षता हि प्राणस्य ततो न पुनरुक्तता॥३८॥
×स्प ४ त्वमेवेत्यादिवाक्यतात्पर्यमथ कथ्यते॥ सूत्रात्मना परोक्षोपि त्वं वायो प्राणरूपतः॥४०॥ प्रत्य
क्षोसीत्यत्र वाक्ये स्तुतिर्वायोर्विवक्षिता॥ प्राणेन हि कृतं ज्ञेयं नराणामशितादिकं॥४१॥ त्वमे
×ऊा ६ वेत्यादिवाक्यस्य तात्पर्यं त्वथ कथ्यते॥ यथा राज्ञ लोकार्थं राजदौवारिकं प्रति॥४२॥ कश्चित्त्व
मेवराजेति वक्त्येवं मोक्षकाम्यपि॥ हार्दब्रह्मद्वारपालं प्राणं तद्ब्रह्मदृष्टये॥४३॥ त्वामेवेत्या
×स्पसे ८ द्यभिवदेदस्मात्वं साक्षिणे॥ तस्मान्त्वमेव दिष्यामित्यामे वेत्यस्तु संस्कृतिरिति॥ अस्तु प्राणः॥
ऋतो क्लिमनसाथस्य विद्यमानस्य चिंतनं॥ वचसोच्चारणं यत्स्यात्तत्सत्यवदनं स्मृतं॥४४॥ ९
यदुक्तमाणं प्रत्यक्षं ब्रह्म शिष्यगुरू च मे॥ विद्याग्रहणकाले तं विघ्ननाशेन रक्षतु॥४५॥ शि
ष्यमामितिशेषः॥ तद्ब्रह्म रक्षा वित्यत्वयः॥ ग्रहणे चोपदेशे च सामर्थ्यस्य प्रदानतः॥ रक्षावि

ति विवक्षितत्वान्न्यूयोप्यवक्तुमामिति ॥४७॥ अवक्तुमं अवक्तुवक्तारमिति पुनरुच्यत इत्यर्थः ॥ इत्थं
वाच्यात्मकं ब्रह्म प्रत्यक्षं प्रार्थ्य वाधुना ॥ अंतर्याम्यात्मकं ब्रह्म परोक्षं प्रणवेन तु ॥४८॥ तद्बोधकेन
संस्मृत्य प्रार्थ्यते विघ्ननाशनं ॥ आध्यात्मिकाज्वराद्यास्तु घोरव्याघ्राद्युपद्रवाः ॥४९॥ आधिभौति
कविघ्नास्तु स्तथाय स्त्वाद्युपद्रवाः ॥ सुराधिदैविकास्तेषां त्रयाणामुपशांतये ॥ चिरं शांतिः पठि
तेत्येव मनुवाकोयमादिमः ॥ उत्क्रमं त्रस्य जपतो नष्टं त्रस्पृह संतते ॥५०॥ उपास्ते ब्रह्मवित्स्येव व
कव्योयं संचयः ॥ विति ह्रिनि ॥ अर्थज्ञानप्रधानत्वात्पाठोदासीन्य एव नये ॥ अनु वाक्ये द्वि
तीये त्र शिक्षाध्यायो विधीयते ॥५१॥ अत्रौदासीन्यमिति चेदनर्थः स्यात्तथा सति ॥ मंत्रो
हीनः स्वरत इत्यादिवचनादित्यर्थः ॥ कर्मकांडेप्ययं वाच्य इति चेत्सत्यमेव तत्र ॥५२॥ क्वो उद्दितय
शेषत्वात्तन्मध्येभिहितोप्ययं ॥ प्रयोजनाधिक्यवशाद्विद्याकांडे तु कीर्तितः ॥५३॥ कर्मकांडे स्वरादी
नाव्यत्यये न यथाविधि ॥ अर्थस्यानवबोधेपि प्रायश्चित्तेन शाम्यते ॥५४॥ अनुष्ठानस्य वैकल्ये

परिहर्तुमनोऽर्थयं ॥ अनाश्रातं यदाज्ञानमिति मंत्रउदीयते ॥५५॥ यथेति। यथा शास्त्रमर्थान
वबोधेप्यनुष्ठानवैकल्यं परिहर्तुं शक्यत इत्यन्वयः॥ विद्याकांडे यथा शास्त्रमर्थानवगतौपु
नः॥ वैकल्यस्य समाधाने क्रियते नहि कुत्रचित्॥ नह्यन्यथानवगतिः प्रायश्चित्तेन वार्यते॥
रज्जुसर्पादिकभ्रांते र्जपाद्यै र्निवारणं तु॥५७॥ अतएव हि विद्यायां कर्मलीनप्रवृत्तितं॥ वै
कल्यपरिहाराय प्रायश्चित्तं न किंचन॥५८॥ प्रस्तुतान्यथात्वे विद्याप्रसक्ते सति पातके॥ प्रा
यश्चित्तस्य विरहः स्मर्यते योगशालिनः॥५९॥ यदस्मात्पातकं किंचिद्योगी कुर्यात्प्रमादतः॥ यो
गमेव निषेवेत नान्यं .. मंत्रं कदाचनेति स्मर्यते इत्यर्थः॥ विद्यावैकल्यहानाय प्रत्येतुं च यथा
विधि॥ कर्तुं चोपनिषत्पाठं प्रयत्नातिशयं न्यूणं ॥६०॥ शिक्षाध्यायो यमत्रेण ततः समुपपद्य
ते॥ वेद्यत्वेनोपदिश्यंते यत्र वर्णस्वरादयः॥६१॥ शिक्षेति इति शिक्षा स्यादीकारश्छौ दसः श्रि
नो॥६२॥ शिक्षेत्यस्यार्थो वेद्यत्वेनेत्यादि॥ शिक्ष विद्योपादान इति धातुः॥ कर्मण्युत्पत्ति

×विष्णु

ब्रह्मांडदेहवत्त्वेन सर्वव्याप्त्याप्युरुक्रमः ॥ इत्यर्थं विनाशो न सुखहेतुतया सुराः ॥२६॥ आर्थितिः
अरकं तेषां परं ब्रह्म प्रणम्यते ॥ वायुमूर्तिकसत्त्वं यत् ज्ञानशक्त्यादिसंयुतं ॥२७॥ तदात्मना
परं ब्रह्म विधात्रकम पीष्यते ॥ वायुश्चातो न मस्कार्यः संबोध्यश्च भवेद्दयं ॥२८॥ वायुरू
पेण सूत्रस्य लक्ष्य प्रत्यक्षत्वसंभवात् ॥ अतस्तस्मेव प्रत्यक्षं ब्रह्मास्मीति भण्यते ॥२९॥ अं
तर्यामीन संबोध्यः परोक्षत्वेन हेतुना ॥ सर्वशास्त्रानुमानाभ्यामंतर्याम्यवगम्यते ॥३०॥ एवार्थ
श्चाभ्यामित्यनेन योग्यः ॥ वायूपाधियुतं ब्रह्म प्रत्यक्षं भवतीत्यतः ॥ त्वामेव वक्ष्यमाणेषूपास्ति
वाक्येषु मारुत ॥३१॥ प्रत्यक्षं ब्रह्म वक्ष्यामि ब्रह्म सोपाधिकं तु यत् ॥ येनयेन प्रकारेणोपास्य
ते तेन तेन तद् ॥३२॥ चिराभ्यासेन समुत्पन्ने साक्षात्कर्तुं हि शक्यते ॥ अत एवान्यशाखायां देवोभू
त्वेति संस्कृतं ॥३३॥ देवो भूत्वा देवानप्येति इति श्रुतिमित्यर्थः ॥ मरणात्पूर्वमेवेह साक्षात्कृत्य
ततः परं ॥३४॥ देवत्वं समवाप्नोतीत्यस्यार्थः परिकीर्तितः ॥ तस्माद्दृते वदिष्यामि वक्ष्यमाण व
चः स्वयं ॥३५॥ ब्रह्म प्रत्यक्षमित्येव वदिष्यामि न चानृतं ॥ अथवा त्रिकिकारीया व्याख्या क्वचित्प्रद

७५ ×धा१ ×छ७ ॥२॥

जिज्ञासोऽस्त्वं वेदने ॥ प्रतिबंधप्रणुत्यर्थमहं स्योपयोगिता ॥ अनुवाके द्वितीयेस्मिन् दृष्टादृष्टोप
कारिका ॥ ७६ ॥ विहिता पाठनियतिस्थोपास्ति: प्रवर्त्तते ॥ मंगलाचरणार्थीयं तत्रादौ मे त्वदुच्य
ते ॥ ७७ ॥ प्रकर्षः प्रार्थ्यते नेन विद्यायास्तत्फलस्य च ॥ अनेन मंत्रेणेत्यर्थ: ॥ गुरूणा सम्यगुक्तेयं शिष्य
णानुष्ठिते स्थिरं ॥ यशो विद्यानिमित्तं तत्स्यान्नौ गुरुशिष्ययो: ॥ ७८ ॥ वैकल्येनेति विद्याया उक्त
र्णानेन कीर्तित: ॥ कृत्वाध्ययनजं यत्स्यात्तेजस्तद्ब्रह्मवर्चसं ॥ ७९ ॥ क्रतिस्मृत्यर्थकार्त्स्न्ये हेतौ मि
त्यभिधीयते ॥ प्रजादेर्वक्ष्यमाणस्य फलस्याप्युपलक्षणं ॥ ८० ॥ शिष्यस्य फलसंपत्तेर्गुरुसंतोष
कृचनं ॥ ब्रह्मवर्च: प्रवृत्तिं गुरावप्युपचर्यते ॥ ८१ ॥ इत्येवं प्रार्थनारूपं मंगलाचरणं कृतं ॥
शिष्येण जप्यमंत्र: कृतार्थो हि गुरुस्तत: ॥ ८२ ॥ यदर्थं मंगलं सैषा विद्या प्रस्तूयतेऽधुना ॥
सा गुरूक्तोच्चारणाभ्यासो यस्तस्यानंतरं यत: ॥ ८३ ॥ तद्व्यासनायुतत्वात्स्मादित्यर्थो यं प्रातर्यो ॥ ८४ ॥ प्रा ११
गिति ॥ पूर्वानुवाकविहितवर्णादिपुरुषोच्चारणाभ्यास इत्यर्थ: ॥ मानसं वेदपाठेन स्थिराभ्यासेन

×नि२

५×अधिकृत्य विषयीकृत्येत्यर्थः संहितावयवौ वर्णौ यौ स्तः पूर्वोत्तरौ तयोः ॥ पूर्ववर्णस्वरूपं तु पृथ्वीदेवं विचिंतयेत ×९

×ख्या १

न वासिने ॥ न प्रवेशयितुं शक्यं केवलोपासनेष्वपि तं तस्मात्तद्योगिनीमेव व्याख्याम उपासनं ॥ अन्योन्य
मतिसामीप्यं वर्णानां संहिता मता ॥ सामीप्येन प्रजा यस्यां निषण्णं नवनीत्यतः ॥ न वेदुपनिषद्ध
स्था उपास्तिः परिकीर्तिता ॥ उपास्या संहिता सेयमाश्रयेषु च पंचसु ॥ ८७ ॥ व्याख्यास्यते न चोपास्त्ये
र्वेद आश्रयन्नेदतः ॥ पंचाश्रयेषु चैकैकं प्रतिज्ञाता ह्युपासनौ ॥ लोको ज्योतिश्च विद्या च प्रजाः स्मा
पंच चाश्रयाः ॥ अधिकृत्य पृथिव्यादीन् लोकान् वर्तते इत्यतः ॥ अधिलोकमिति ज्ञेयमेव मग्रेऽपि
मन्यताः ॥ लोकाद्याश्रयजिज्ञानां स्यान्महत्त्वं प्रकृष्टता ॥ ९० ॥ लोकादिविषयोक्तं पूर्वरूपाध्यातत्वका
नामात् ॥ लोकादिविषयोपास्ति प्रतिज्ञा समनंतरं ॥ ९१ ॥ यल्लोकमधिकृत्यस्यात्तदुपासनमुच्यते ×
उत्तरस्य स्वरूपं तु द्युदेवत्वेन चिंतयेत् ॥ संधिस्तयोर्मध्यदेशो द्युभूमध्यस्थ सर्वगः ॥ वर्तमानं तयो
र्मध्ये संधानं वायुदेवता ॥ इत्येवं लोकविषयं संहिताध्यानमीरितं ॥ इषेत्वेत्यत्र चैकारः प्रकारोप
रिसंस्थितः ॥ ९२ ॥ पृथिवीदेवतारूपस्तकारस्तु तदग्निमः ॥ ९३ ॥ द्यौस्तयोर्वर्णयोर्मध्यदेशत्वाक
न्नादेवता ॥ छिन्नेवे नागतो सोन्यस्तकारः स समीरणः ॥ ९४ ॥ उपास्यो वयवेष्वेवमुत्तरेष्वपि चिंतयेत
६×वदेत्युपासकाः प्राज्ञास्ता महासंहिता इति ॥ [illegible]

५× लोकेति संहितानामित्यर्थः ॥ ५५

४ ×वागिंद्रियं मुखस्थानमिति चेत्सत्यमीरितं ॥ कंठतालुरदाद्विस्थानमुखमेवेति साधवः ॥ ॥×४

अधिज्योतिषमेवेदमधिज्यौतिषमुच्यते ॥६॥ वैद्युतो विद्युदेवस्याद्यत्यं यश्छंदसः कृतौ ।
गुरूपदेशः शिष्येण पृष्टो विद्यातिकीर्तितः ॥७॥ यथाहेतिशेषः ॥ उत्पत्तिः स्यात्प्रजननं पुत्रपौत्रा
दिकं प्रजा ॥८॥ देहेंद्रियादिः सात्मस्तत्संघातस्त्वात्मशब्दितः ॥ वाक्शब्देनेंद्रियं प्रोक्तं कंठादि
स्थानसंस्थितं ॥९॥ फलहेतुतयोपास्ति विहिता लिङ्गपरिग्रहात् ॥ य एवमिति वाक्येन विदिधा
तूपलक्षिता ॥१०॥ तां महासंहितामत्र विशेषः कथ्यनेरितः ॥ आनंदज्ञानयति ना वाक्षि
कोनयनुसारिणां ॥११॥ तां महासंहितां इत्याचक्षत इत्यादावित्यर्थः ॥ कर्तव्या स्यादिति ज्ञेय उत्प
त्तिविधिरत्र तु ॥१२॥ अनुष्ठेयवक्तृत्वेन कर्तुरेकत्वतोऽपि च ॥ आवश्यके कर्मेतत्र हृदयाद्य
वदानवत् ॥१४॥ विशेषनियमाभावात्स्फुरश्वत्रशब्दाभिमतः ॥ पृथिवीत्यादिवाक्येन विनियो
गविधिः स्मृतः ॥१५॥ पृथिवी पूर्वरूपमित्यादिनेत्यर्थः ॥ य एवमेतदित्यत्र त्वधिकारविधिः स्मृतः १२
॥ संहितोपासनमिदं निःकामानुष्ठितं यदि ॥१६॥ ब्रह्मविद्यार्थमेवस्या दन्यथान्यफल

३× चिंत्यमेतच्छब्दे क्योक्ते स्त्राद्धकृत्वस्य हानतः ॥ संहितोपास नैकार्यमित्युक्तं च विधिविस्तरं ॥×३

रेवात्र याख्यानान्याद हरी पुनः ॥६३॥ पस्मा ह ट्ठ रक्षा एण मित्यादि लक्षण बोधकं ॥ शास्त्रं तु सिद्धमन्यत्रे
त्याहानं दयतीश्वरः ॥६४॥ नान्येति । ज्ञायते वर्णयुच्चारणे यये त्यादिरित्यर्थः ॥ स्वा अदेशविशिष्ट
स्य वस्तिउआरूपमिष्यते ॥६५॥ नरव्याधातोः सोपसर्गो नरव्याधातुः प्रयुज्यते ॥ इति श्रीपाण्डवीय न्यौं
क सार्थकृतो दिते ॥६६॥ अकारादि लिव हल् उदात्तादिः स्वरस्तथा ॥ ह्रस्वदीर्घप्लुता मात्राः प्रयत्नश्च
वलंस्मृतं ॥६७॥ स्पष्टलमीबत्पृष्टत्वमित्यादि येन उच्यते ॥ विलंबितत्वमत्यंतमतीव द्रुततामपि ॥६८॥
त्प क्राय स्पष्टयः कालेस्न तोले तस्य कीर्तिने ॥ साम्येन देव सामेति पदेन परिकीर्त्यते ॥६९॥ वर्णा
नामधिसान्निध्यं संतानः संहितोच्यते ॥ वर्णोदय षष्ठ उच्यते तत्र लक्षण लक्षिताः ॥७०॥ शिक्षणी
या एवं तीतिशिक्षाध्याय उदीरितः ॥ षट् वशिक्षा ह्वाली याः स्फुः शिक्षणीयो न वा परः ॥७१॥ इति द्योतयि
तुं चेदमुपसंहरणं कृतं ॥७२॥ अध्यायोपसंहार इत्यर्थः ॥ अत्र शिक्षादि शब्दानामेकक्तत्वादि
नं च तः ॥ प्रकृत्यादि स्वरोन्नाति न व्याकरणोदितः ॥७३॥ न च शास्तीत्यर्थः ॥ तथाप्यन्यसनीयः स्या
त्संप्रदायागतः स्वरः ॥ स्वरोदक्षो पयोगी स्याच्छिक्षाध्याय विधानतः ॥७४॥ उपास्तितुरुपास्तोन

ब्रह्मदृष्ट्या ध्यवा यत्र संस्कृत्योपास्यते तथा॥ मनो ब्रह्मेत्युपासीते तत्र न संस्कृतं मनः॥११॥ तथा प्रतीक
विषयमित्यर्थः॥ मनः उपास्यमिति शेषः॥

प्रतीकोपासनमित्यर्थः॥ तत्र हि मूर्त्ते देवतादृष्ट्या संस्कृते पूर्ववर्णस्वरूपमुपास्यं तच्चोक्तं पूर्वदृष्टिं
प्रत्यालंबनत्वात् प्रतीकमित्युच्यते तस्मिन्नहंग्रहो नेत्यर्थः॥ उपास्तिर्या प्रतीकं तत्स्वात्मत्वेनैव गृह्य
ते॥ ब्रह्मजस्य प्रतीकस्य ब्रह्माभेदनिरस्यते॥१३॥ ब्रह्मान्निन्नतया चैक्यात् प्रतीकादिति चेन्न तत्॥ ब्र
ह्मैक्यात्मा च नेतस्य तत्स्वरूपे लयो भवेत्॥१४॥ घटस्य मृत्स्वरूपेण नेदे विलयदर्शनात्॥ यद्यै
क्यमवलोक्य तज्जीवस्य ब्रह्मणा सह॥१५॥ तदोपासकतानस्याज्जीवत्वविरहे सति॥ यद्यैक्यमना
वलोक्य न तदात्यंतविच्छिन्नयोः॥१६॥ नैकत्वयोग्यता तस्मात् प्रतीकेनास्य हंग्रहः॥ यद्यैक्यमित्यु
पास्योपासकस्वरूपलोपेन कार्यहि ते क्यं जीवब्रह्मैक्यं च न पर्यालोच्यते त्यर्थः॥ अत्यंतेति॥ प्र
तीकोपासकयोरिति शेषः॥ जीवं ध्यानप्रकर्षेण साक्षात्कृत्यैव देवतां॥ मृतो देवत्वमेतीति श्रु
तेः साक्षात्कृतिः फलं॥ अहंग्रहाणां सर्वेषां तत्रैकोपासनेन च॥ ब्रह्मसाक्षात्कृतो सत्यां यथमि १३
त्युपासनं॥१७॥ पूर्वसाक्षात्कृते चैव विदेहे पस्य प्रसंगतः॥ एकोपासनमेवस्यादनुष्ठेयं न चेत

रत॥१८॥ प्रतीकोपासनानां तु तत्तत्फलविभेदतः॥ नान्यानर्थक्यमस्यत्र न विच्छेपो मनागपि॥२०॥
के चित्कालमुपास्यैकं प्रतीकं समयान्तरे॥ प्रतीकांतरचिंतायां पूर्वोपासनजं तु यत्॥२१॥ अपूर्व
तस्य नैवास्ति नाशः स्यात्स्या घथासुखं॥ एकमेव बहून्यद्वा समुच्चित्य विचिंत्यतो॥२२॥ य एवमि
तिवाक्ये हि विधिक्रम नियोदिता॥ संहितोपास्यतां सद्भिः पृथिव्यादि कदृष्टितः॥२३॥ अधिलोकमि
तिस्येत दृष्टिगोचरतार्थकं॥ यत्र यद्देवता दृष्टिर्विहिता तद्विचिंतयेत्॥२४॥ तद्देवताभिमानोत्र
याबत्स्यात्तावदेव हि॥२५॥ यछंदसामिति श्रुत्या प्रणवोपासनं परं॥ अधिकृत्य जपो लिंगात्समेंद्र
इति कथ्यते॥२६॥ मेधार्थिनो धनार्थं तु ततो म इति लिंगतः॥ आवहंतीति कथितो होमः सर्वत्तुवो
कतः॥२७॥ स मेंद्र इति लिंगादित्यन्वयः॥ ततइति॥ ततो मे श्रियमावहेति लिंगादित्यर्थः॥ मेधये
वा सधीत्प्रा द्विद्यार्थो जप उच्यते॥ श्रियायागाद्यनुष्ठाने चित्तशुद्ध्यादिसंभवात्॥२८॥
होमोपि ब्रह्मविद्यायामुपयोगी तिकीर्त्यते॥ वेदत्रयप्रधानत्वादृषभः प्रणवः स्मृतः॥२९॥

×यन्नाम निर्मुक्तं स्यादमृतादिति श्रुतेः ॥ प्राकृतो वेनिमित्तं स्यात्प्राणवस्यो मतं परं ॥ ११ ॥ प्राकृतो हि मो
क्षार्थ तारइत्यर्थ इति ॥

तद्यथा शंकुने त्यादि श्रुतेः सर्व लि कृतेः ॥ विश्वरूपश्च संभवेदिति प्रणव संस्तुतिः ॥५॥
एतेः शब्दे स्तुतिन्याय्यात्तस्योपास्यत्व कारणात् ॥ अमृतत्वो सौ वेदेभ्यः प्रतिज्ञातः प्रजापतेः ॥६॥
ॐकारस्य हि नित्यत्वाज्ज्ञानं जसो त्यन्ति दृश्यते ॥ छंदोभ्य इति शब्देन सामानाधिकरण्यतः ॥७॥ अमृ
तादिति शब्दोयं बकार्थत्वेन योजितः ॥ श्रुतेपि संनन्नूवेति पदे जनन वाचिनि ॥८॥ लोकानन्य
तपद्ध्र सेत्यादि श्रुति वचनादिह ॥ श्रेष्ठत्वेनावगम्यत्वं नित्यत्वादस्य वर्णितं ॥९॥ पर्यालोचितवान्
ब्रह्मा लोकानूसार जिघृक्षया ॥ तेभ्यः सारतया सम्प्रक्रोपास्य प्रत्यमात्तेन ॥१०॥ भूरित्याद्याहरत्
त्पेभ्य ॐकारः प्रत्यगादिति ॥ लोकवेदव्याहृतिभ्यः सारिष्ठं प्रानुमिकृतः ॥११॥ तपस्यतो ब्रह्मणो
पमोंकारः सारवत्तया ॥ प्रत्यगादिति हि श्रुत्या स्पष्टमेवोपपादितं ॥१२॥ इति श्रुत्येति ॥ प्रजाप
ति लोकानन्यतपद्धृत्यादि श्रुत्येत्यर्थः ॥ ॐकारः सर्वकामेशः सइंद्रः परमेश्वरः ॥ मेधयाप्रज्ञ ९४
यामासः स्फुरणं तु प्रीणयालिति ॥१३॥ ज्ञाणयत्विन्यर्थकं स्फुरणं तु पदमित्यर्थः ॥ ये धार्यधार

[illegible]

×पंचाग्न्युपासनादेस्तु छांदोग्यादौनुनिरुक्तता ॥ विद्याद्येकवत्तस्मात्साम्यं नात्र युज्यते ॥१९॥ आदिपदात्प्राण ×
विद्याद्युक्तौ प्राणु हृदारण्यके तत्त्वीयातु वेद्यादि कं गृह्यते ॥ प्राणवायुश्रेयोपि यो हवै ज्येष्ठं च श्रेष्ठं च वेदेति ॥ वि ×
धिस्तत्स्यैः नथा हृ पर्जन्यादिपंचकं वेद्यं ज्ञात्वा छ्येपेिन्न्निविद्यापासमानमित्यर्थः ॥ × ७ ×प्राणविद्या×
प्रदर्शितिः ॥ आमुष्मिकं चानियत प्रजादेः स्वर्गवन्नहि ॥ ७ ॥ चित्रायागजपश्चादेः सति च प्रति
बंधके ॥ यथा मुष्मिकं तानो चेदैहिकं त्वंतथास्य च ॥८॥ उद्गीथविद्यान्यायेन तैत्तिरीयेतरेय
योः ॥ संहितोपासना भेदो वेद्यभेदेन संभवेत् ॥९॥ अत्र लोकादिवं वेद्यं वाय्वाद्यन्यत्र कीर्तितं ॥ उद्गी
थेति ॥ छांदोग्ये साम भक्ति विशेषस्योद्गीथस्यावयवोयॐकारः स एव प्राणदृष्ट्योपासनीयः ॥
का एव वेदेतु छत्स्नोद्गीथ योगितावागिंद्रियप्रेरकः प्राणः स उक्तः च त्वेनोपास्य इति वेद्य
भेदः ॥ अत्रेति तैत्तिरीयके ॥ वाय्वादीति ॥ वायुश्चाकाशश्चेत्यधिदैवतमध्यात्मं ॥ वाक्पूर्वरू धा६
पं मन उत्तररूपमिति वेद्यमेतरेयके कथितमित्यर्थः ॥ अहं ग्रह युतानीति प्रतीकविषयाणि च ॥१०॥
उपासनानि द्विविधान्यात्मायेषु गुणान्वितः ॥ उपास्यस्तत्र नाहं बुध्या युक्तान्यन्येषु सा नाहि ॥ प्र
तीकोपासने ब्रह्मबुद्धिर्नास्तीत्यर्थः ॥ उक्त स्तदेवता बुध्योपास्यतेत्यत्र लौकिकं ॥११॥ प्रती
कविषयेत्तस्यास्तु पृथिवी हवभित्यद दाहरणाति पृथिवीति ॥ पृथिवी पूर्वरूपमित्येत
शरीरमय इति वाक्यस्यार्थः ॥ मनोमयत्वादि गुणयुक्तः उपास्यः परमात्मा इति तुयमहंग्रह इत्यर्थः ॥ × २

१×ब्रह्मध्यानाय कोऽसि तद्वदालंबनात्मकः॥ कोऽसौ मे शिवतारो हि ब्रह्मध्यानस्य रक्षकः॥ २९

तस्मात्कोऽस्त्वमुच्यसे॥ कथं नोपासते सर्वे इति चेदत्रिमं वचः॥ लौकिकप्रज्ञया यस्मान्मेधया
पिहितं स्मृतः॥२५॥ नोपासते पराक्षितास्त्वां देवममृतप्रदं॥ विषयाक्षिनिवेशो मे धाशब्देन
कीर्तितः॥२६॥ स एव लौकिकप्रज्ञा वार्त्तिके परिकीर्त्यते॥ या धीधारणशक्तेति श्रुत्यर्थमाध
वीजगो॥२७॥ तस्मिन्नप्यस्ते तु तथा मः कोऽसीत्यन्वयः कृतो॥ यद्वा श्रुतं मे गोपायेत्यनेनास्यान्व
योऽत्र वेद॥२८॥ रागद्वेषादिहेतुभ्यः श्रुतं गोपाय मे प्रभो॥ येन श्रुतेन संपन्नस्त्वामेव प्रविशा
म्यहं॥२९॥ कुर्वतः श्रवणादिं मे ज्ञानस्य प्रतिबंधकं॥ रागादिकं यथा न स्यात्तथैव क्रियतां
त्वया॥३०॥ एवं जपार्थव्याख्यातं मंत्रा होमार्थकास्त्वथ॥ अजाविकाद्युपेतत्वं लोमशात्वमि
हीष्यते॥३१॥ वासोगोऽन्नपानेषु सर्वदेति पदान्वयः॥ वासांसि गाश्चान्नपाने प्रापयंती सदा मम॥
३२॥ विस्तारयंती कुर्वाणा मात्मनो मे चिरं यथा॥ न नष्टानि तथैतानि स्थापयंती प्रजादिके॥३३॥
अन्येष्वपि श्रुतिर्युक्तां श्रियमावह सत्वरं॥ मंत्रांतज्ञापनार्थाय स्वाहाकारोऽयमुच्यते॥३४॥

१×नादं प्रणवबोधस्य हि स्मृतिनाशतः॥ २६

उत्तरेष्वपि मंत्रेषु स्वाहाकारो न वेद्ययं॥ मंत्रांतज्ञापनायैवं तत्र तत्र च सूरिभिः॥३५॥ मंत्रांतज्ञापनस्या
तु५३ स्य स्वाहाकारेण संनता॥ नात्र कश्चिद्दायदेवाय च्छतादिकमिदं हविः॥३६॥ कृतमस्त्विति मंत्रांतः
स्वहार्थः परिकीर्तितः॥ दैवेन मोक्षिणे वर्त्तितेनामुत्र केहिकं॥३७॥ कर्म कर्तुमलं यस्मात्त्वार्थ्यते ते
न तद्वयं॥३८॥ दैवं वित्तं न वे ह्लानं मानुषं कनकादिकं॥ आवहश्रियमित्येतज्ज्ञानस्याप्युपलक्षणं॥
३९॥ शिष्यसाधकहोमार्थाः पंचमंत्राः प्रकीर्तिताः॥४०॥ आमायंत्विति तेषामप्ययमर्थोऽभिधीयते॥
आयंतु द्विरूपमां सर्वेऽप्यधीतिश्रवणार्थिनः॥४१॥ वैराग्याद्द्विविधा प्रोक्ता स्वर्गमोक्षादिकामिनः॥ प्र ×नः६
साधकत्वे विद्याया ग्रहणे स्यात्प्रशस्तः॥४१॥ दमित्यनेन दांतिः स्यादव्ययं तत्पदे मतं॥ साबाह्ये
न्द्रियचेष्टाच्चोलिंलोप्यापि निवृत्तता॥४२॥ शमित्यनेन शमितिः स्यात् क्रोधादि कविहीनता॥ विमायं
क्षिति चत्वारो मंत्राः शास्त्रोत्तरस्थिताः॥४३॥ इत्यभिप्रायतः केचिन्न पठंति मनीषिणः॥ संन्येयकोटि
शास्त्रेवमाने वायांतु सत्वराः॥४४॥ इत्यर्थो वार्त्तिकाचार्यैः समायांत्विति वर्णितः॥ इतीति॥ इतेभा
क्यस्येत्यर्थः॥ समायं क्षिति नाकंचे पठंति परस्परास्विनः॥ बहवोऽयदिग ह्लीयुर्मनो विद्यां नदा सहै॥४५॥

×जने ब्रह्मं पश्यन्ती स्वामिति कृत्पर्थः इति॥×२

विकलत्वनाशो भूयासं ख्याति मानित्युदीरितं॥ यशोजनः इति कृत्वा बहूनां ब्रह्मचारिणां॥४६॥ समागमप्रार्थनायाः फलमित्यवगम्यते॥ वसीयसः प्रकाशात्वं श्रेष्ठः स्यां सकुलेष्वहं॥४७॥ वसीयसो वस्यसः स्यादीलोपश्छांदसो भवेत्॥ अथवा वसितुः पुंस उच्चारणं यमीयसुन्॥४८॥ यद्वा धमवतोयस्यात्र धातो रूपं दिस्यतः॥४९॥ गुणश्रेष्ठ तयायः स्यात्सजातीयस्ततः पुनः॥ विकल्पितत्वा छ्रेष्ठस्यस्य प्रत्ययस्तेन युज्यते॥५०॥ यद्वा निवासवचनाच्छादनार्थकात्॥ वसेरुप्रत्ययस्तेन तछीलो वसुरुच्यते॥५१॥ तदाधिक्ये वसीयान्स्यात् वसुमान्वा पलभ्यते॥ वसुशब्देन तेन स्यां श्रेष्ठं वसुमत्तरात्॥५२॥ वकुलं वसुयस्य स्याद्वसुमान्वस्ततो धिकः॥ वसीयान्ता दृशश्चाहं श्रेष्ठः स्यामिति वर्ण्यते॥५३॥ वर्ण्योगम प्रार्थनायाः फलमेतच्च कीर्तितं॥ ब्रह्मणः कोशभूतं त्वां भगवन्प्रविशाम्यहं॥५४॥ मां च सर्वात्मभावेन प्रविशेश प्रसीद मे॥ ऐक्यात्त्वमावयो रस्तु भेदहेतुं विनाश्य॥५५॥ प्रविश्य ददातादात्म्यं त्वं न जानिस देश्वर॥ स त्वं मां प्रविशेशान प्रसन्नः स्याः प्रविश्य वा॥ १६

×यशः श्रेयस्त्व हेतुर्यस्तं वदंति विपश्चितः॥ तेन त्वां प्राप्स्य योमं शास्तामं त्रान्कथ यत्यथ॥×२

२×मंत्रो मेधा पदः श्रोत्रं कस्तो रोगादिना शकः॥ मेधं शारीरपित्तादिर्गोवाय्ये तततम्य न्यते॥×२
×न देवतामेव कुर्यं बाधिर्ये मा भवेदिति॥×७

×रोगदुःखापहारेण विद्याग्राह्यतदक्षमः॥×५ ×मो क्षार्थ कामनोक्त्वावा तद्धेतु ग्रंथ लक्षणा॥१

णशक्तिर्मे धाप्रज्ञातुतद्भवा॥ वलयश्चितिवार्थः स्यात्स्पृणोतेः परि कीर्तितः॥१४॥ प्रार्थ्यते पलतः प्रज्ञा बलं ही त्वाहं नाप्यकृत॥ अमृतत्वे कहेतोः स्यामात्मज्ञानस्य धारणः॥१५॥ विचक्षणं च मे भूयाच्छरीरं देव सर्वदा॥ अमृतस्यति शब्देनामृतत्वजनकं ग्रहः॥१६॥ संबोध्यते सोदेवेति ब्रह्मात्मेदविवक्षया॥ श्रवणादो योग्यतार्थं शारीरपटुता र्थ्यते॥१७॥ मेधाफलस्य ज्ञानस्य न सिद्धिस्तदंशवतः॥ मनः प्रकाशादिनी मे स्याज्जिह्वा मधुरभाषिणी॥१८॥ कर्णाभ्यां चैव वेदार्थं भूरि विश्रुणुयां प्रभो॥ पटुरूपौ कौ व्याप्तिये न यदि वा भिंद्रियं मम॥१९॥ तदा तत्संभवात्कृद्धे गुराव पि न भवेत्॥ ज्ञानं तस्मात्प्रियोक्तिश्च प्रार्थ्यते त्र मुमुक्षुणा॥२०॥ ब्रह्मणश्चासिको शस्त्व मसि रिव परात्मनः॥ अपविद्धेषणाय स्मात्त्वयि परश्यं नितन्त्परं॥२१॥ मेधादिदाने सामर्थ्यमिंद्रत्वा द्वाभिधेयता॥ शब्दस्याचेतनस्या स्यनेति भाप्ये भिधीयते॥२२॥ ब्रह्मोपलब्धिस्थानत्वाद्ब्रह्मणः सन्निकर्षतः॥ सर्वमेवोपपन्नं स्यादोंकारस्य यथोदितं तवेति सप्तमी श्लोके निमित्तार्थो भवेदिये॥ त्वमेव हेतुर्नायासिन
×कृतानि मितं त्वामेव ब्रह्म परं तिसाधवः॥ अभिधानप्रतीकत्वं द्वारेण स्योपलब्धये॥×१

अंस्वस्य पद्यस्येति शेषः॥ ॐ ब्रह्मविद्या गुरुत्वेन प्रख्यातं कुरु मां प्रभो॥ तदर्थं मां प्रपद्यस्वानुगृहाण
इति माधवः॥ ॥४३॥ ओंकारः प्रणवस्तत्वाच्यं वा तत्प्रतीकतया यथा वा॥ ब्रह्मणो ध्येयता प्रोक्ता जपहो
मार्थमित्यर्थः॥ १॥ व्याख्याता अधुना ब्रह्मोपासनं सप्रकारं स्यते॥ अंगिनो ब्रह्मणः षष्ठ उवाके तु व्या
विख्यति॥ २॥ उपास्तिरंगदेवानां पंचमे च प्रवर्त्तते॥ आक्रियंते प्रयुज्यंते विविधे कर्मणीत्यतः॥ ३॥ व्या
व्याहृतयस्तासां तस्य योग प्रसिद्धतां॥ वेदाख्यो वक्ति वेदे च तत्प्रयोगः प्रसिध्यति॥ ४॥ दर्शपूर्णमा
सौ चातुर्मास्यान्यालभमान एताभिर्व्याहृतीभिर्हवींष्यासादयेदिति श्रुतेरित्यर्थः॥ महाचमस
गोत्रत्वात्प्रोक्तार्थस्सिद्धितो नवेदः॥ माहाचमस्योतः माहात्म्य होवेदयते पराः॥ ५॥ उपासनांग
नार्थाय मुनिना प्रख्यापयन्नवेत॥ ऋषिस्मरणसंयुक्तमार्थे काले मुपासनं॥ ६॥ तुर्यव्याहृतिरूप
यत्र ब्रह्मलेति विधिं तयेत्॥ तुर्यव्याहृतिरूपं यन्महइत्यक्लममुः॥ ७॥ इहमध्यस्थ आलेलेतिम
हत्वादेवकीर्तितं॥ हत्यादिसहस्रांगानि चान्या व्याहृति देवताः॥ ८॥ इतिस्वित्वा महोरूपब्रह्मणो

८× तथ्यानस्य प्रतीकं तु व्याहृतिचयमुच्यते ॥८
५× प्रतीकत्वेनतव्याहृत्यंतरमुच्यते॥ ४×

७× सोमपाग्रोबुवकुक्षिततला ब्रमसोमहान्॥ तस्य तस्य वर्तते सापंमहाचमसर्इरितः॥ महाचमसस्यस्य स्यस्य दपरि

त्यं परि कीर्तितः। ध्यानायोपदिशित्येतां प्राधान्येन
तुनी श्वरः॥ उक्तस्येतिनिपातोऽयं प्रसिद्धयर्थः। ज को
नः॥ भद्रकालित्यादिना हरिहरविरोधपरस्तत्र जुकृत्ये॥ विध्येय

प्रकीर्तिताः॥
॥ चतुर्विध
लोप्रत्येकं॥
संख्याउरूणा
भवेत्॥
वीप्सा
च ...
ल्लादौ सर्वे
त्रीसंग्रहा
यत्र व्याहृतु
पासनविधि
स्याकेदेवेद्वि
वाक्यतः॥ २×

२× लोकादि हष्टि रूकाद्युक्तिरित्यादिनोच्यते॥ आदित्यत्वासि तालोकः इत्याव्यवहृतिसमाः॥ यत्तो महत्त्वस्य युक्तादित्यस्वरूपता॥ वेदमुउ
लवत्तीनि तानि इत्यानि ओमिति हि ॐ कारस्तेहि पुरुषेतसर्व वेदाः गादयः॥ वेदसंज्ञीतिन कुर्युः स्वलः प्राणवद्वर्के॥ उक्तेनात्र न तस्यं तिप्रा
ण स्तेश्वा नेतीस्यच॥ ता वा एता इतिकृत्यानुवेनदुपसंहतिः॥ याश्वतसो व्याहृतयो हरित्यादयई रिताः॥ लोकादिहष्टि सत्कालोऽस्तीत्युक्ति
योगवृत्ति भिः॥ यद्वा महः प्रशस्यं तत्पूज्यायां वा यकन्नतः॥ पूज्यं ब्रह्मस्वरूपेण स्तुतिमुक्तातएवहि ॥ १०
देहांगे स्योयथात्मैवमितरव्याहृति प्रजातं॥ तुर्यव्याहृतिरूपेण न वेतीत्यवगम्यते॥ ११॥ अथवात्रि
ऋकारादि प्रक्रियात्र प्रदर्श्यते॥ आदित्यचंद्र ब्रह्मान्न भूतैर्व्यापिनायतः॥ १२॥ लोकदेवादयो व्या
प्रा आत्मा तेन महोलवेत॥ ऋहतिताहि व्याहृतयः स्मृह्याते न हेतुना॥ १३॥ तत्यागे नोदितं ब्रह्मनारोहति
मतिं ततः॥ व्याहृत्यवयवं ब्रह्म ध्येयमंतहृदि घ्यते॥ १४॥ कर्तव्यांगि ब्रह्महष्टि र्महत्वव्यापकत्वतः॥
चतुर्थव्याहृता वन्यास्तदंगत्वेन कल्पिताः॥ १५॥ आद्यापादौ द्वितीये तु भुजावन्याशिरो भवेत्॥ व्याहृत्य
वयवं ब्रह्मोपासीतेति विधीयते॥ १६॥ महीयते यतः सर्वे आदित्या ह्यासनापरे॥ महइत्येव मुक्तेनतं
स्मादात्मा नवेमहः॥ १७॥ लोकादे हष्टि हेतुत्वादधुनात्सचमुच्यते॥ चतुर्थव्याहृतेः पूर्वव्यापकत्वेन
कीर्तितं॥ १८॥ अंगानां हष्टि हेतुत्वाद्वदतस्य मध्यमः॥ रागआत्मायथा तद्ब्रह्मणो मध्यमः स्य
नः॥ १९॥ लोकादि हष्टि हेतुत्वात्सर्वलोकादिरूपिणः॥ महइति शेष॥ अयंलोको ग्निरूग्वेदः

प्राणश्चेति चतुर्विधा ॥ भूरिति व्याहृतिर्लेषा तथैवान्या यथाक्रमं ॥२१॥ अंतरिक्षं च वायुश्च साम
व्यापानएव च ॥ चतुर्धा तु वदेत्येषा द्वितीया व्याहृतिर्मता ॥ द्यौरादित्योयजुश्चेतिव्यानश्चेति चतुर्विधा ॥
तृतीया सुवरित्येषा चतुर्थ्यपि चतुर्विधा ॥२३॥ आदित्यश्चेद्र [illegible] परिकीर्तनात् ॥ भूरि
त्यादिकस्तोत्रवाक्यस्य ब्रह्मत्वादतः ॥२४॥ प्रणवः कथितः शब्दप्रक्रमादितिगम्यतां ॥ उत्पत्तिविधि
रुक्तः प्रागधुनांग विधिर्भवेत् ॥२५॥ चतुर्विधत्वं प्रत्येकं व्याहृतीनां पुरोदितं ॥ तावाएता इतिश्रु
त्या रुवेदत्रोपसंहृतिः ॥२६॥ [illegible]
[illegible] ॥ चतुर्विधत्वे प्रत्येकमुपास्तिर्नियमिष्यते ॥ उपास्यः षोडशात्कलः पुमा
नत्रेति संत्स्यति ॥२७॥ विशेषार्थज्ञापकत्वादधिकोक्तेरिहस्फुटौ ॥ नातश्चतस्र इत्यादेर्वाक्यस्य व्यर्थ
ता भवेत् ॥२८॥ तायो वेदेति वाक्येस्मिन्नधिकारविधिः स्फुटः ॥ तद्धसेत्यादिवाक्येन तत्र्यं व्याहृतिसू १८
पतः ॥३०॥ [illegible] उक्तत्वाद्ब्रह्मलोकेऽपि निर्दिष्टोयं हृष्टेति चेत् ॥ अनुवाकद्वयेनैवं

⁊× तस्मै मोक्षोधयामीति श्रुतेरर्थोवधार्यतः ॥ तत्तसेवनमेवस्याद्धेयो हेतुर्न चेतरत् ॥४७
⁊× बक्तृशिष्यप्रदेसेत्रो हृष्टान्तो न्यायधृश्यते ॥४२
[illegible]
[illegible]दे त्वय्येव निमज्जेद्दुःखं ततः ॥ युस्मात्त्वदात्मभूतोस्मि तस्मात्त्वापदयोमम ॥५०॥ भक्तिर्
मित्र एव स्यान्निमित्ता चाहि सम्मम् ॥ भगवच्छब्दपर्यायो भगवच्छब्दः स्मृतो मतः ॥५१॥ द्रुत मोपा
यथायंति निम्ननम्नराल्ययं ॥ तथैवायं तु मां सर्वे समंता ब्रह्मचारिणः ॥५२॥ अहान्यं तत्र्व
त्स्यस्मिन्नित्यहर्जरउच्यते ॥ अहर्जरस्य यथामासायंतिसंवत्सरात्मनि ॥५३॥ जलवच्चरयोपेता मा
सवशानतिक्रमे ॥ कुर्वंति सर्वदेशान्मामायांतु ब्रह्मचारिणः ॥५४॥ [illegible]
[illegible]नमेवच ॥५५॥ आस त्वग्गृहपर्यायः प्रतिवेश इहोच्यते ॥५६॥ प्रतिवेश इवालिलंसर्वदुःखाप
नोदकृत् ॥ प्रतिप्राणिप्रवेशा[illegible]द्वा प्रतिवेश इतीर्यते ॥५७॥ मां प्रत्यतः प्रभाहित्वं प्रमापद्यस्व
चांजसा ॥ इत्युपस्थानमंत्रार्थो वार्तिकाचार्यवर्णितः ॥५८॥ सर्वगत्वात्स्वरूपं मां प्रति त्वं प्रद्रा
राय ॥ रसविद्धं लोहमिव त्वन्मयं कुरु मां प्रभो ॥५९॥ इत्यंत्यस्यो चरार्द्धस्य तदीयस्यार्थ ईरितः ॥

१×इत्यादिकं सुरेश्वरीयं माधवीयं तु कथ्यते ॥ उपाख्तिः पंचमे गानोपषष्ठे तु ब्रह्मलोकिन ॥ सय इत्यादितन्त्रोपास्ये स्वरूपेणो
५×इत्यपतेर्ग्रिय [illegible] याबुध्याप रसात्से त्तिसंयुतः ॥×५
नोच्यते ॥×२

पस्य ब्रह्मणस्थानमार्गयोः ॥ गुणनोपाधिसिद्ध्यर्थं स य इत्यादिरुच्यते ॥ ४४ ॥ स यो गुह्यमितन आकाशो
वर्त्तते हृदयांतरे ॥ हृदयं मांसखंडोय पुष्ठं नालोप्यधोमुखः ॥ पद्मोविकास्यपानेयः प्रसिद्धउपल
भ्यते ॥ इह सामीप्यवाचित्वात्तस्य एव इति श्रुतः ॥ ४५ ॥ योगशास्त्रे प्रसिद्धस्यास च ब्रह्मत्वं तरेष्यत
नस्मिन्नेव पुरुषोऽस्त्यस्य सर्वगत्वे प्युपास्यये ॥ ४६ ॥ उपलब्धेर्वा स्थाने हृदये हि समाधिना ॥ नि
रूढं मनए कांत्ये योग्यं स्याद्दात्मदर्शने ॥ ४७ ॥ तस्माद्धात्कन्ति योग्यत्वं चमयं त्वाद्धेन कीर्त्यते ॥ दहरा
दिकविद्यासु स्पतए वस्त्रदुच्यते ॥ ४८ ॥ आकाशस्तस्य मध्ये यो वृद्धेरायतनं सदा ॥ तस्मिन्नयं पुरुषो
ज्ञेय इत्युक्तं वार्त्तिकेप्युत ॥ ४९ ॥ शयनात्पुरि पूर्णत्वादथवा पुरुषः स्मृतः ॥ पूर्णत्वादयो लोका
येनासौ पुरुषोऽथवा ॥ ५० ॥ पूर्वमेवस्थितो नेति पुरुषः कीर्तितोऽथवा ॥ पूर्वमेवाहमिहासमिति तत्पु १८
रुषत्वमिति श्रुतेरिति ज्ञाव ॥ शास्त्रिस्थरां व ज्ञानात्मनस्य वोपलभ्यते ॥ मनुते ज्ञानवाचित्वान्म
नोमय इति स्मृतः ॥ ५२ ॥ विषयान्मनुते नेनेत्यनंतः करणमुच्यते ॥ मनस्त्वाद्दत्तिमानित्वान्मनोमय
१×त्वानमितिस्मृतः ॥ ज्ञानात्कत्यापरिणते ×कुर मनस्यवोपलभ्यते ॥ ध्यानतश्चीतेरितितातो मनो ×२

४×अस्य मार्गविशेषक्तिरंतरे लोनिवाक्यतः ॥ इत्यादिनेत्यर्थः ॥×४
३×वस्तुतो मनसोणस्यो द्रष्टृ यस्यैव मनोमयः ॥×२

इति स्मृतः ॥ अथ वा य मिहज्ञेयस्तल्लिंगं त्वान्मनोमयः ॥ मनसा तेन लिंगेन [illegible] गम्यस्तल्लिंगं मउच्य
ते ॥ जडस्य मनसो हृद्यान्नदृत्तिं त्वनुमापते ॥ हिरण्मयो ज्ञोतिष्ठानात नन्तस्तल्लिंगता स्मृता ॥ इति टिप्प
णकृत्स्वाहतल्लिंगो वेत्तिन्नाष्यतः ॥ अमृतोऽमृतहीनः स्याद्धिरण्यं ज्योतिरुच्यते ॥ ५५ ॥ अमृतत्वादिरूपेण
ब्रह्मध्याये दुपासकः ॥ मुखमध्ये रसज्ञाया मूलस्योपरियोस्थितो ॥ ५६ ॥ वामदक्षिणभागौ तौ तालुके
इति कीर्तिते ॥ तयोर्मध्ये [illegible] मांसखंडो यो बस्तास्तनवत्स्थितः ॥ ५७ ॥ [illegible]
[illegible] ॥ योगशास्त्रप्रसिद्धत्वात्तस्य पञ्च
शुद्धितः ॥ योगिभिः क्रियसंस्पर्शात्परस्य च तु येव च ॥ ५८ ॥ प्रत्यक्तत्वाद्युतावेतत्पदमित्यवगम्यतां
तस्योप्रविष्टमेकार्य्यं सन्निवेतं ब्रह्मदर्शने ॥ ६० ॥ योग्यं स्यादिति स्थानाडी परेस्थानमुच्यते ॥ ६१ ॥ ए
कार्य्यं सदिति छंदः ॥ सुषुम्णा तु परे लीना विरजा ब्रह्मरूपिणी ॥ इडा तिष्ठति वामेन पिंगला द
क्षिणेन तु ॥ ६२ ॥ तयोर्मध्ये परं स्थानं यस्तं वेद स वेदवित् ॥ क्षुरिकोपनिषद्येवमभिप्रेत्य हि पठ्य
ते ॥ ६३ ॥ मार्गत्वाच्चामृतत्वस्य ब्रह्मस्थानमितीर्यते ॥ तन्मार्गत्वमपि प्रोक्तं शतं चेत्यादिवाक्यतः ॥ ६४ ॥
×सस्थानं परमेशास्य शाखा ग्रैवं कुनयाऽवत् ॥ अयं हि स्वसमीपस्थां सुषुम्णामुपलक्षयेत् ॥×४

सावित्रिद्य कपाले द्वे विदारेसो वामदक्षिणे ॥ यत्र मूर्द्धप्रदेशेऽस्ति केशांतस्तत्र वर्त्तते ॥६५॥ विशेषेणास्तु
षुम्णोयं मूलं स्यादंतरश्रितं ॥ अग्रस्योपरि केशानां सत्त्वाद नतनायथा ॥६६॥ मूलादधोपि केशा
नामसत्त्वादंततात्तथा ॥ केशावसानं केशांतो विभागे नैव वर्त्तते ॥६७॥ विवर्त्तते यत्र मूर्द्धेत्यादिकं ना
ध्यरुजंगौ ॥ इत्थं फलस्य प्राप्त्यर्थं निर्गमद्वारमीरितं ॥६८॥ अथोच्यते फलं भूरित्यग्नावित्यादि
वाक्यतः ॥ व्याहृतित्रितयध्यानादग्न्यादौ प्रतितिष्ठति ॥६९॥ अग्न्यादीनां यदैश्वर्यं तत्सं प्राप्नोत्युपा
सकः ॥ चतुर्थव्याहृतिध्यानादैश्वर्यं ब्रह्मणस्तथा ॥७०॥ स्वाराज्यादिकं वा [illegible] कैपच्च नदेवेदं प्रपंच्य
ते ॥ स्वयमेवांगदेवानां राजास्यादंत एव हि ॥७१॥ यच्छंति बलिमित्युक्तं किंच स्वाराज्यमेव न ॥ किंतु
सवस्मिन्कूले नसर्वेषामनं समस्य तिं ॥७२॥ तत्पनित्वमवाप्नोति तत्त्वेनोधिपतिर्भवेत् ॥ मनसश्चरणोश्च
क्ष्योक्ते विज्ञानेन कर्त्तृशक्तितः ॥७३॥ एकदेहस्त्व विज्ञानादेर्भूदधिपतिः पुरा ॥ विराज्येत्यादिमानं तु विषय्य २०
सकलाधिपः ॥७४॥ स्वाराज्यं स्वांगभूतानां देवतानामिहोच्यते ॥ जगत्स्थ ब्रह्मादिकैश्वर्यं नेत्याह प्रकटं
सर्ववागा[illegible]द्यधिपतिः सर्वमाप्पा सवर्तत ॥ऽ॥

विवक्षितमुपासने ॥ इति प्रवकुमुक्तस्यानुवादो नहि दुष्यति ॥ स्य एषोंत इत्यादिवक्ष्यमाणानुवाक
गे ॥३२॥ वस्तूपास्यमिहैवेति स वेदेति पुनर्वचः ॥ एकवाक्यत्वमेतस्माद्द्वयोरप्यनुवाकयोः ॥ ब्रह्मवे
दनमत्रोक्तं नफलत्वेन किंतु तत् ॥ वक्ष्यमाणानुवाकेन गुणविध्यर्थमुच्यते ॥३४॥ व्याहृत्यवयवं ब्रह्मो
पास्यं चेत्तदुपासितुः ॥ आद्यव्याहृतिरूपाग्नौ प्रतिष्ठा किं स्मयुज्यते ॥३५॥ व्याहृत्यात्मकदेवाद्यैः कथनं
लिंगमिष्यते ॥ उपासनैकपद्इत्यादिवार्त्तिकायादिरश्रितं ॥३६॥ बलिमस्मै प्रयच्छंति सर्वे देवादयः सुराः ॥
प्रजामुपासकायेति फलमेतदुपासितुः ॥३७॥ प्रतीकोपासकस्यास्य ब्रह्मप्राप्तेरसंभवतः ॥ सर्वदेवत्व
ज्यर्त्थं नयुक्तमिति चेन्नतत् ॥३८॥ यस्तावेदसतु ब्रह्मवक्ष्यमाणानुवाकगे ॥ वेदोपास्ते प्रधानं स्याद्ब्रह्मोपा
सनमेव हि ॥ तस्माद्ब्रह्मणि सेशाप्ते सर्वदेवैः प्रदृश्यते ॥ यस्य पर्णमयीत्यादौ कतुनिष्पत्त्यसंभवतः ॥३९॥
पर्णतामंतरा तस्याः क्रत्वंगत्वेपि तेसति ॥ फलाकांक्षोदयाभावात्स्यात्फलस्यार्थवादता ॥ विना तु व्या
हृतिध्यानं ब्रह्मोपासननिसिद्धितः ॥ फलायैव व्याहृतीनां ध्यानमित्यवगम्यतां ॥४०॥ महोव्याहृतिरू

जीवस्य प्राणधारित्वात्तत्सत्वेपि न वास्यतत् ॥ अप्राणो हीति वाक्येन प्राणेन रहितत्वतः ॥८६॥
इति प्राचीनयोग्येतिवाक्येनोपासनाविधिः ॥ नित्यनैमित्तिकैः पापे क्षीणे योग्योऽभवत्स्वयं ॥८७॥
उपास्तीनां हृदंतं शिष्य गुरुरस्माह पुरोदितः ॥ स्मय इत्यादिवाक्योक्तं प्रकारं संजगाविति ॥८८॥ पा
साम्नद्वाति चाक्रादिशारीरादिगुणोनपि ॥ एतत्तद्यति श्रुत्वा विराड्ब्रह्मैदनंतरं ॥८९॥ ब्रह्म
णाव फलस्येव प्रतिज्ञानतकारणात् ॥ वियदेहादिवस्तूनां मूर्तिरूपाभिधायकं ॥९०॥ तथापु
पास्यफलयोस्तैयथेत्यादिवाक्यतः ॥ एकत्वाश्रवणात्तेषां गुणानां स्यादुपास्यता ॥९१॥ तदुपास्य
गुणत्वेनत्वाचार्ये योजितं तततः ॥ ततोधिकं न वत्येत वक्ष्यमाणविशेषणं ॥९२॥ वियदेहादिकं
हीति भोग्यकारोत्र भाषितं ॥ उपास्तिः पंचमे षष्ठे तु वाके स्मिन्न विद्यते ॥९३॥ एकाधिका
रिता भक्त्योपास्तिरेकैव युज्यते ॥ व्याहृत्युपासकस्येव ब्रह्मोपास्यधिकारिता ॥९४॥ तयोर्वेदस २९

३× प्रतीकं पंचमे सर्वं षष्ठे तु ब्रह्मसेव्यते ॥ शुक्लं मनोमयत्वाद्ये रित्युपास्यविनिर्दतः ॥ पंचमे बलिदानोक्तेः
षष्ठे स्वाराज्यकीर्तनात् ॥ फलभेदाच्च तद्भेद इति वोद्यमतोगतेः ॥९५
वेदेति श्रूयते पंचमे स्फुटं ॥ व्याहृत्युपासनफलं ब्रह्मोपास्तिफलं तथा ॥ नैरित्यग्नेतिष्ठतीति स्वाराज्येगच्छ
तीति च ॥ षष्ठे स्वहेव पठितेयाचोपास्यविभिन्नता ॥९६॥ साङ्गोगिभावभेदेनाप्युपद्यत एव हि ॥
सर्वेस्मा इति यज्ञीतं तदंगफलं भवेत् ॥९७॥ नन्वेवं वक्ष्यमाणस्याप्यनेनाभिन्नतेति चेत् ॥ सोऽपि
ल्पदहरन्यायादुभयोर्भेदसंभवात् ॥९८॥ नभिन्नानुगतं दृष्टं तेन शांडिल्यदहरादयः ॥ समस्तोपा
सनं स्त्वेवं ह्यस्य स्याद् अभिन्नता ॥ केनानंतासु विद्यासु तद्धी कुरुणतो भवेत् ॥ कर्तुं शक्यमनु
ष्ठानमिति विद्योविभिन्नता ॥१००॥ गुणाभेदेन वेद्यस्याभिन्नत्वान्नैव च स्थितिः ॥ तस्मान्नानाचमेव
×दे स्याद्विद्यानामितिसंस्थितं ॥१०१॥ एवं जैतयोः कार्यमेकमेव ह्युपासनं ॥ तत्प्रयोजनमीशस्य साक्षात्का
रः स चैकतः ॥१०२॥ सिद्धश्चेदन्यवैयर्थ्यं किं चायं न प्रमाणजः ॥ ध्येयाभेदाभिमानोयं सदा भाव न
पासना ॥१०३॥ एकामुपास्तिं कृत्वातां त्यक्त्वान्यत्र स्थितस्य च ॥ पुंसश्चित्तस्य विक्षेपे कथं नाम दृढीभ
वेत् ॥१०४॥ सत्वके यमिन्यन्वयः ॥ तस्माद्विकल्पो विक्षेपाद् न्यानर्थक्यतल्लयोः ॥ तत्वबोधेयथातेद्व
द्ब्रह्मोपास्त्वावग्रहः ॥१०५॥ मनोमयो मनोयः स्यात्स्वप्रात्मा हिरण्मयः ॥ सोहमस्मीत्युपास्यं स्याद्ब्रह्म सर्वं च

१× दहरादीनि भिद्यंते पृथक् पृथगुपक्रमात् ॥१×
२× अन्यानर्थक्यविक्षेपो विकल्पस्य नियामकौ ॥×२

४× उपासनार्थं सोपाधेः स्यात्वनोमयतादिकं ॥ आदिपदात्प्राणशरीरत्वं ॥ ×४

३× मर्यादा धारणप्राप्ति सुपाधिस्थतया स्मानि ॥ सोपाधिकेपि सुप्येनैनिरूपाधा वक्ना वनः ×१

मनोमयो ॥ पुरुषो ध्येय इति ज्ञेयं पूर्णार्थस्यादितत्पदं ॥ पुरुशेनेतथैतत्पर्थे जीवः स्यादिति चेन्नतत् ॥
नायावेदेति वाक्येन प्रश्नो तत्वान्यरात्मनः ॥ आकाशादेहं ब्रह्मेति तस्यांते चोपसंहृतेः ॥ तस्मात्पुरु
षशब्दोक्तः परमात्मा विशिष्यते ॥ मनोमयपदे नात्र यथाश्रमवबोगतः ॥९॥ ब्रह्मलिंगस्य विद्यावच
नेन तत्पदेन तथेह च ॥ हिरण्मयपदं चान्न ब्रह्मात्मवसीयते ॥१०॥ सत्यात्मत्वामनत्वादिब्रह्म
लिंगस्य सत्वतः ॥ छांदोग्योपनिषन्निष्ठ हिरण्मयपदं यथा ॥११॥ सार्वात्म्यादिब्रह्मलिंगाद्बुद्धि
र्थं तद्धृदन्तर ॥ छांदोग्येति ॥ अथय एषोंतरादित्ये हिरण्मयः पुरुषो दृश्यत इत्यादिवाक्यस्थि
तस्य ॥ तस्मान्मनोमयत्वादेर्युक्त ईशो विचिंत्यतां ॥ वेद्यस्य प्रत्यगिज्ञानाद्यथोक्तगुणशालि
नः ॥१२॥ स्वगतत्वादेरपि विद्येक्यं पेवाग्निन्यायतो भवेत् ॥ गुणाः स्वगतत्वेऽन्योन्ययोज्या विद्यै
क्यसिद्धितः ॥१३॥ वाक्येति ॥ छांदोग्ये मनोमयः प्राणशरीरो भारूपः इत्यादौ ॥ बृहदारण्यके
तु मनोमयोऽयं पुरुषो भाः सत्या इत्यादौ ॥ नीसर्वगुणोपेतेयावत्तादात्म्यमानिता ॥ तावद्रावर्तनं कु
र्यादुपास्तियोगि सत्तमः ॥१४॥ अंत्यप्रत्ययतो जन्म व्यतस्तत्र मसे द्धये ॥ आत्मनिरामनेऽस्मि २२

२× सत्य ×२ १× तेः ×२ १× सत्यसंकल्प ×१ ४× तनेना ×

१× तेनाकाशात्मा निमानाख्य सात्काशोदयेपि च ॥ तदिति तस्मिन्ब्रह्मणीत्यर्थः ॥ साक्षात्काशरदयेपि मतेः कार्यं त्यत्वयः ×१

र्थकृत ॥१५॥ ततः सकलरूपस्य विराजः प्राग्नंतरं ॥ उत्पन्नब्रह्मबोधः सन्स्वज्ञानादज्ञानहा
नतः ॥१६॥ एवं चेत्तत्स्वरूपं तत्वाकाशो स्यादिनोच्यते ॥ आकाशवत्तन्मूर्तिहीनं स्वरूपं यस्य
तत्तथा ॥१७॥ यद्वाकाशः स्वरूपस्याच्छलक्षणो यस्य तत्तथा ॥ नामरूपाख्यजगतः खे सच्छिद्रादिव
दृश्यते ॥१८॥ आद्यस्य कल्पितत्वेन ब्रह्मत्वेप्युत्तरस्य तु ॥ अधिष्ठानस्य सत्यत्वाद्ब्रह्मत्वमुपप
द्यते ॥१९॥ इदमेकाकि संधार्य सत्यात्मेति प्रकीर्त्यते ॥ यस्याबाध्यं स्वरूपं तत्सत्यात्म ब्रह्मलक्ष
च्यते ॥२०॥ प्राणस्यारामसंपत्ति व्यापारो यत्र तत्तथा ॥ आनंदो मनसो यस्मिंस्तत्तथा ब्रह्मसंज्ञि
त्तिर्नि ॥२१॥ मनसो विषयासक्त्या घोषावेशोऽमहत्सुखं ॥ चित्तविक्षेपराहित्यं शांतिः पूर्णतयावत
तः ॥२२॥ आनंदात्मा निमग्नस्य विक्षेपो मनसो न हि ॥ शान्तात्मीयं परां शांतिं प्राप्नोतीति ॥ सा श्र
नाः ॥२३॥ तस्मान्मनस्थ यावांतु त्यासमद्रुमपवातया ॥ स्वनिष्ठयेव पूर्णं स्यात्कूटस्थत्वात्पुरात्म
नः ॥२४॥ नहि विक्रीयते ब्रह्म मायावज्जगदात्मनः ॥ प्राणस्य देहात्रिष्क्रांतिर्मरणं तेन वर्जितं ॥

विदुर्यथावित् ॥ मूर्द्धन्यनाड्याध्यानवात्तयै वासौ व्रजेन्मुनिः ॥ एतत्तं चेत्यादिकस्य स्या चायमर्थः स्फुटी
कृतः॥२६॥ एवं इंद्रियाणां मनसि हंसिमात्रे लयो स्पष्टः॥ प्राणे प्राणस्य जीवे चेत्येषा दृष्टिलयात्मि
का॥२७॥ मार्गोपिक्रमपर्यंतास्या उत्क्रांतिः समाविषु॥ धर्माधर्मप्रवृत्तेर्वोपासकेतलवेदिनि॥
२८॥ यज्जीवविलयाधारं भूतपंचकमस्मितत्र॥ अस्मितत्त्वानन्नि तस्य परे द्वयैव लीयते॥२९॥ भू
तपंचकरूपस्य लिंगस्य विलये सति॥ इव जन्मसमाप्तस्या घटो पासनगलितः॥ मूर्द्धन्यना
ड्या निःक्रांति ब्रह्मलोकाप्ययेतदा॥ शीर्षः कपालपर्यंतादंतरे लेतिवाक्यतः॥३०॥ कथितासाव
मार्गस्य प्राप्त्यां तस्योपलक्षणं॥ अर्चिरादध्वना लोको ब्रह्मणः प्राप्यते चतं॥३१॥ विज्ञानपतिरि
त्यत्राभूरित्यस्याविति स्मृति प्रपंचयति तत्राहो समष्टिव्यष्टिमानिता॥३२॥ स्यातयोर्व्यष्टिमा
४५ नेनप्राप्यवक्ष्याद्यंतिनतां॥ वक्ष्याद्यैश्वर्यमाप्नोति समष्टिमानतः॥३३॥ यद्भूलोकाद्यधि
ष्ठातृब्रह्मतद्भूलाभनतः॥ स्वराज्यमेति तल्लोके साति निर्गुणवेदने॥३४॥ ब्रह्मलोकावसानेव प २३
रं कैवल्यमश्नुते॥ एतच्चतदितिस्कंत्या चायमर्थः स्फुटीकृतः॥ कार्यस्य ब्रह्मलोकस्य प्रलये सत्य
×अथयत्रैतिदित्यादिस्कंत्यादित्यस्य रश्मिभिः॥ संमं धउत्क्रो मूर्द्धन्यनाडी निष्क्रां। तयोर्मितः॥ रात्रौ मृतस्य तस्यापि तत्रा
त्या सदात्मरूपत्वं ब्रह्मणोवगतं यतः ॥ अतोत्र सत्यशब्देन सद्रूपात्मावगम्यते ॥४०॥ तमस्त्वेतेऽज्ञसो य
द्वस्तुतो सत्ता न युज्यते ॥ श्रुत्येति ॥ सदेव त्वुपक्रम्य तत्सत्यं स आत्मेति श्रुत्येत्यर्थः ॥ परस्परविरोधेन न
प्रकारांतरस्थितिः ॥ इति न्यायेन राहित्यमुभयोर्नेति चेन्न तत् ॥४३॥ यथा नपुंसकव्यक्त्याभावः स्त्री ४२

त्वपुंस्त्वयोः ॥ तथैतयोरत्राभावस्या परस्परविरुद्धयोः ॥४४॥ सत्यत्वोपमिता चेत्सा श्रुत्या ब्रह्म गमीयतां ॥
श्रुतिस्त्वा सत्यं ब्रह्मेति सत्यशब्दाभिधेयतां ॥४५॥ ब्रुवंती सत्यताधर्ममित्यपेतीति चेन्न न तत् ॥ यतो वा
चो निवर्त्तंत इति वाच्यत्ववारणात् ॥४६॥ व्यावहारिकसत्यत्वं सत्यशब्दो वदत्ययं ॥ ब्रह्मण्यारोपितं
चैतत्सत्यत्वमुपजीव्य च ॥ तद्विरुद्धं निराकुर्वन्मिथ्यात्वं ब्रह्म लक्षयेत् ॥ एतद्व्यावहारिकमित्यर्थः ॥
तद्विरुद्धमिति ॥ घटादावविरोधस्त्वयोरिति चेत् ॥ सत्यं ॥ द्विविधं व्यावहारिकसत्यत्वं व्यवहारान्य
काले बाध्यत्वे सति व्यवहारकालाबाध्यत्वं ॥ तदविरोधितं व्यवहारकालाबाध्यत्वं चेति ॥ आद्ये विरो
धाज्ञावेष्यं त्वविरोधः ॥ कालत्रयाबाध्यस्यापि व्यवहारकालाबाध्यत्वमस्तीति तस्य मिथ्यात्वविरोधात् ॥
प्रकृते तस्यैव विवक्षितत्वादिसाकृः ॥ वस्तुतस्तु परेषां व्यावहारिकान्यत्पारमार्थिकं नेति तस्य मिथ्यात्व
विरोधेस्स्येवेत्यप्याकूतं ॥ यथा पादतले लग्नं कंटकं कंटकांतरात् ॥ उद्धृत्य केवलं पादं कंटकद्वयवर्जितं ॥४७॥
नरो वशोषयेत्तद्वद्ब्रह्म लोकद्वयवर्जितं ॥ तस्मान्निर्दुष्टमेवेदं सत्यं ब्रह्मेति लक्षणं ॥४८॥ ज्ञावर्थिकः र

× निष्कलं निष्क्रियमित्यादिश्रुत्येत्यर्थः ॥५३

तै० सं० णार्थो वा ज्ञानशब्दोऽभ्युपेयते ॥ क्रियारूपत्वमाद्यस्य ब्रह्मणो नान्तिमो भवेत् ॥ तत्क्रियाकारणत्वं स्यान्न चै
तन्नेष्यते द्वयं ॥ क्रियायाश्चा निषिद्धा हि निष्कलादिगिरेति चेत् ॥५१॥ तत्क्रियेति ज्ञानक्रियाकारणत्वमित्य
र्थः ॥ लक्षको ज्ञानशब्दोऽयं विज्ञेयः सत्यशब्दवत् ॥ धात्वर्थो बुद्धिवृत्तिः स्यात्तथैवाचार्यभाषितं ॥५२॥
तथैवेति ॥ आत्माभासस्वरूपी व्याप्तो धात्वर्थश्च धियः क्रिया ॥ उभयं चाविवेकेन जानातीत्युच्यते मृषा ॥
चैतन्यप्रतिबिंबेन व्याप्तो बोधोऽभिजायते ॥ बुद्धेः शब्दादिनिर्भासस्तेन मोमुह्यते जगदित्युपदेशसाह
स्र्या मित्यर्थः ॥ चैतन्यप्रतिबिंबेन व्याप्ता विषयभासिका ॥ या बुद्धिवृत्तिस्तद्वाची ज्ञानशब्दः परा
त्मनि ॥५४॥ सर्वरूपावभासित्वं कल्पितं जाड्यनुत्तये ॥ उपजीव्याथ तेनापि रहितं ब्रह्मलक्ष्यते ॥
५५ ॥ प्रत्यगात्मस्वरूपं यन्नित्यज्ञानं तदात्मकं ॥ अत्रास्वाद्यं सुरेशास्य वार्तिकामृतमुत्तमं ॥ स्वरूप
मात्मनो ज्ञानं न तस्माद्व्यतिरिच्यते ॥ बुद्धेः प्रत्ययकारित्वात्तत्साक्षिण्युपचर्यते ॥५७॥ आत्मनो ज्ञा ५८
नकर्तृत्वं परोक्तं न हि युज्यते ॥ तत्रारोपितमेतस्याद्वृत्तिमद्बुद्ध्युपाधिकं ॥५८॥ इत्युक्तपार्द्दव्यावस्ये

तद्विवर्जितं ॥२४॥ मिथ्यात्वादिरहितमित्यर्थः ॥ विशेषणत्वपक्षेऽपि सत्यादिकपदत्रयं ॥ नियामकतयान्यो
न्यं मिलित्वा ब्रह्म बोधयेत् ॥२५॥ केवलविशेषणत्वपक्षे इत्यर्थः ॥ परस्परनियामकत्वेन मिलित्वेत्यर्थः ॥
अस्ति सत्यादिशब्दानां यद्यपि ब्रह्मणान्वयः ॥ तथाप्यरुणयेत्यादिन्यायतः पार्ष्णिकान्वया ॥२७॥ अन्यो
न्यवृत्तिनियमं कुर्वन्त्यन्योन्यसन्निधौ ॥ सत्यत्वं त्रिविधं वक्ति बाधाभावस्य वाचकः ॥२८॥ सत्यशब्द
स्तथाव्याप्यं त्रिषु प्रातीतिकादिषु ॥ स्थितः संज्ञानशब्देनानेन शब्देन संयतः ॥२९॥ ब्रह्मण्येवावतिष्ठेत
दित्यानेतेन तद्द्वयोः ॥ संयतः नियमितः ॥ तदिति प्रातीतिकव्यावहारिकयोरित्यर्थः ॥ ज्ञानशब्दः स्थि
तो वृत्तौ विकल्प्येत तथाप्ययं ॥ सत्यानंतपदोपेतो ब्रह्मण्येवावतिष्ठते ॥ न ब्रह्मवदबाध्या वा वृत्तिरंत
विवर्जिता ॥ देशतो यः परिच्छेदस्तद्धीनेऽव्याप्तिसंस्थितः ॥३१॥ सर्वतोऽप्यपरिच्छिन्नेऽनंतशब्दः परात्मनि ॥
सत्यज्ञानपदोपेतो ब्रह्मण्येवावतिष्ठते ॥३२॥ पारमार्थिकसत्यत्वे स्फूर्तिर्वा नास्ति खस्य हि ॥ तस्मात्स
त्यादिकः शब्दः संयतश्च परस्परं ॥३३॥ कूटस्थं चैवाचिद्रूपमद्वयं ब्रह्म बोधयेत् ॥ तदुक्तं पूर्वाचार्यैः

सदिति ॥ अनन्तं ब्रह्मेति लक्षणं निर्दिष्टमित्यर्थः ॥ इदमेवाभिसंधाय कालाकाशादिवन्नित्वं ॥ कालाका-
शादियोनित्वात्सर्वोत्सत्वात्तथात्मनः ॥ ६८ ॥ वस्तुतत्त्वस्य चासत्त्वान्मुख्यानन्त्यं परात्मनः ॥ कल्पितेन परि-
च्छेदेन ह्यकल्पितवस्तुनि ॥ ६९ ॥ कल्पितं चेह कालादि वाचारंभणमात्रत्वेन तच्छब्दप्रयोगात् ॥
उक्तमित्रोषः ॥ आनंदादिकशब्दाश्च सत्यादिन्यायतः सतः ॥ प्रत्येकं लक्षणत्वेन योज्याः श्रुत्यन्तरोदि-
ताः ॥ ७० ॥ सत्यादीति ॥ अनेनैव सत्यादिन्यायेन ॥ विज्ञानमानंदं ब्रह्म ॥ अत्रायं पुरुषः स्वयंज्यो-
तिर्भवति ॥ पूर्णमदः पूर्णमिदमित्यादिश्रुत्यन्तरपठिता आनंदस्वयंज्योतिःपूर्णादिशब्दा इत्य-
र्थः ॥ सतः ब्रह्मणः ॥ द्विनिवर्तनीयानां पुंस्त्वादीनां बहुत्वतः ॥ लक्षणस्य बहुत्वेपि ब्रह्मणो
बहुता नहि ॥ सर्वेष्वपि लक्षणेष्वेते निवर्त्यवैशिष्ट्यं निवर्त्यते ॥ बहुता बहुविधत्वमित्यर्थः ॥ उपकोसल-
विद्यायां वामनीत्वादयो गुणाः ॥ श्रुता दहरविद्यायां सत्यकामादिकौ अपि ॥ नान्योन्यमुपसंहार्यौ
यथा तद्वदिहेति चेत् ॥ वामनी सत्यकामो देर्घ्य यतो विधानतः ॥ ७२ ॥ यथाविधिव्यवस्थास्ति ग्रति ४५

एवं सत्यादिवाक्येष्वपि त्वखंडं ब्रह्म लक्षितं ॥ तद्वदत्रास्त्वबोधस्याजगत्कर्त्रादियुक् ॥ तस्मात्तात्पर्यमुल्लेन
तस्य प्राप्तत्वकारणाद् ॥ गुणानुपंचको शोधनस्तेऽन्यथा कृता विधि ॥ आसीज्ज्ञानं हि सा ज्ञासु परम [illegible] व्योमकृष्यते ॥
तत्रस्यानि हितं ब्रह्म स्थितमित्यर्थः इति ॥ समानोधिकरणत्वेन गुहाव्याकृतमेव वा ॥ सर्वस्य जगतस्तत्र निमूढत्वात् गुहो-
पत्तिफलास्त्विमे ॥ आनंदादिगुणा नो हि नव्यवस्थापको विधिः ॥ धृतिपत्तिफलं तुल्यं सर्वत्रेत्युपसंहृतिः ॥
अत्रानंदस्वयंज्योतिःपूर्णादिगुणसंहृतेः ॥ ७४ ॥ [illegible] सर्वदुःखविही-
नायाः सुषुप्तेः स्थानं यतो भवेत् ॥ ७५ ॥ समाधेश्च ततो हार्दं परमं व्योम नेनरत् ॥ जाग्रच्च वहते हेतु बहिः खे दे-
हमध्यगं ॥ स्वप्नव्यवहृते हेतुर्यस्मात्तत्ववरं न तत् ॥ हार्दस्थिता गुहा बुद्धिर्गुहा भोगमोक्षयोः ॥ ७७ ॥
ज्ञानत्वेयत्तानवपस्तर्व्यवहृतेरपि ॥ तया बुध्योपलभ्यत्वाद्ब्रह्म तत्र स्थितं भवेत् ॥ ७८ ॥ स्वरूपमपि तद्ब्र-
ह्म नोपलभ्यं बहिर्मुखैः ॥ कामाविद्याधिकतया तद्धाधादुपलभ्यते ॥ नडकं ॥ निगूढमस्यां तद्ब्रह्म स-
कामाविद्याद्युपद्रवात् ॥ प्रत्यग्धियोत्तु पक्षपत्तिर्नतु बाह्यधियो परे ॥ ७९ ॥ सत्याद्यर्थविरूढेभ्यः सम्य-
ग्व्याहृतेधीयतिः ॥ धियः प्रत्यक्प्रविश्याथ सत्यात्मानं प्रपद्यते ॥ ८० ॥ धारत्तधीरसत्यादेर्बुद्धेः प्रत्य-
क्त्वमांतरं ॥ कारणं संप्रविश्यायं कारणव्यतिरेकतः ॥ ८१ ॥ अभावं कार्यमात्रस्य हेतोः शुद्धादिरेकतः ॥
ज्ञात्वाभावं साक्षितत्वं शुद्धमित्यध्यवस्यति ॥ ८२ ॥ इत्यर्थोस्य पद्यस्यानन्दज्ञानयतीरितः ॥ प्रवि-
श्य प्रत्यस्यार्थो ज्ञात्वाभावमित्यन्तेन ॥ तटस्थब्रह्मबोधेन जीवलभ्यां गुहां नतः ॥ ८४ ॥ प्रत्यक्तत्त्वं गु-

ब्ध्वा गुहोच्यते ॥ यद्वा हृदकाशमध्ये खं परम व्योम ... इति शास्त्रेति ॥ सित्यादिकर्तृमित्याद्यनुमानगम्यं ... पास्त्व नूनतइतिरात्रितायपीत्वादनुमानगम्यस्य ... वास्तवत्वेनेति भावः ॥ ४२

हास्वरूपं ब्रह्मत्वेनैव बुध्यते ॥ पादद्वयेन सूत्रोक्ते व्याख्याने ब्रह्मवेदने । अथोत्तराभ्यां पादाभ्यां ब्रह्म
प्राप्तिरुदीर्यते ॥ व्याख्यायत इत्यर्थः ॥ सर्वप्राणिगतानन्दो गांस्तद्विद्युगपदश्नुते ॥ सर्वज्ञब्रह्मरूपेणे
त्युक्तं तच्च तृतीयपा ॥ अज्ञानी जीवरूपेण चक्षुरादिव्यपेक्षया ॥ क्रमेणानुभवेद्भोगान् ज्ञानी तु ब्रह्मरू
पतः ॥ जीवत्वभ्रमनाशेनानुभवत्यक्रमेण तान् ॥ ४७ ॥ तदुक्तं अवगत्याखिलानन्दानाने कदा क्रमस्थ
त्यया ॥ ब्रह्मज्ञानी सदा वेत्ति ततः सर्वत्र ईरित इति ॥ आद्यावन्ते तथा मध्ये धियो नैकद्वारोद्गाः ॥ निर्विज्ञो
पेक्ष विद्या सा अनन्यानुभवात्मनेति च ॥ ननु च द्वा सुपर्णेति मंत्रे द्वौ पुरुषौ स्मृतौ ॥ देहस्थावगतौ
भोगे भोक्ता जीवेन लभ्यते ॥ ४८ ॥ सोपाधिप्रतिबिंबेन ब्रह्मणस्त्वनुपाधिना ॥ प्रकाश्यते समस्तश्च
भोगः सर्वगसाक्षिणा ॥ ४९ ॥ विदुषो विदुषश्चैव तत्समानामिति चेन्न तत् ॥ ब्रह्ममेवास्त्वं रूपं सर्वभोग
प्रकाशकं ॥ ५० ॥ इति ज्ञात्वा स हृष्टः स्याद्विद्वान्नसूक्ष्मस्तथा नहि । ननु ब्रह्म विना दुःखसुखवद्बुध्य
ध्यते खिलो ॥ ५१ ॥ तत्साम्याद्विदुषः क्लेशाः प्रसज्यते तिचेन्न तत् ॥ सूर्यो यथा सर्वचक्षुर्बाह्यदोषैर्नलि ४६
प्यते ॥ ५२ ॥ इत्यादिश्रुतितो ब्रह्म साक्षी दुःखेन लिप्यते ॥ सुखेनापि न लेपः स्यादिति चेत्सत्यमीरितं ॥ ५३ ॥

×त्रै२

पद्यस्यानंदसंघतिः ॥ वह्निव्याप्तमयो यद्वद्दह्यतावास्फुलिंगकान् ॥ ५८ ॥ आत्मव्याप्ता तथा बुद्धिश्चै
तन्याभासरूपिता ॥ यतो नानाविधा वृत्तीः कुरुतेनेन भासते ॥ ६० ॥ इत्युपाधिकचैतन्यं कार्यं न न वस्तु
तः ॥ चेतनं परवच्चितान् दृष्ट्वा भ्रान्त्या बुद्धिकर्तृकान् ॥ ६१ ॥ ज्ञानं क्रियत इत्यज्ञाः कूटस्थमपि मन्वते ॥
आविर्भावतिरोभावौ बुद्धेर्यत्साक्षिकौ नृणां ॥ ६२ ॥ ततोन्यं कंसमाश्रित्य साक्षि कर्तृत्वमुच्यते ॥ चैत
न्यं बुध्यभावेनावच्छिन्नं प्राकृतदुःस्ववात् ॥ ६३ ॥ यथैकरूपमात्मास्थं तदभावस्य साधकं ॥ न तु त्वत्ता
वपि तथास्याद्भावुत्पत्तिसाधकं ॥ ६४ ॥ तदेकरूपमास्थेयं विशेषानुपलंभतः ॥ अतः कूटस्थमास्थे
यमनुभूतिबलेन तदिति ॥ त्रिविधो यः परिच्छेदस्तन्निषेधादनंततः ॥ तदभावविशिष्टत्वादखं
डं ब्रह्मनेति चेतत् ॥ ६५ ॥ अनंततः अनंतशब्देनेत्यर्थः ॥ वस्तुतस्त्वपरिच्छेदाद्ब्रह्मान्याभावभंग
तः ॥ अविद्याकार्यमेवेममभावमनुपजीव्य च ॥ ६६ ॥ परिच्छेदनिराकृत्य तमभावं निरस्य च ॥ सदे
कं लक्ष्यते तस्मात्तृतीयं लक्षणं च सत् ॥ ६७ ॥ अथान्यदिति ॥ पारमार्थिकाभावस्यापि निषेधादित्यर्थः ॥
×नहि द्रष्टुरिति श्रुत्या सयथा सैंधवेति च ॥ नित्यचैतन्यरूपत्वात् लक्ष्यता ज्ञानादरास्य च ॥ नि
र्गुणमेव च वक्ति ज्ञानं ब्रह्मेति लक्षणं ॥ तादृशस्यैवेत्यर्थः ॥ ×४

स्मृतेः॥ विद्योपास्त्योर्ज्ञेयाः संहितोपसनादयः॥ येन हृस्योपदेशाः स्फुरन्त्यास्त्यूपनिर्दिष्टः स्मृताः॥ श्लो
कास्तु दृश्यन्ते हि दिष्यंतेस्म चं ब्रह्मविदादिके॥ ४॥ ब्रह्मविदाप्नोति परमित्यादिके इत्यर्थः॥ अनुव्या
ख्यानमेतत्स्यात्सत्यं ज्ञानमितीरितं॥ ५॥ कूटस्थरूपेदं तात्पर्यं कथ्यते तु क्रमादहः॥ तस्मिन् कुतु
क्लितो योर्थस्तस्य विस्पष्टमीरणं॥ ६॥ व्याख्यानं तद्यतस्माद्वा इत्यादौ तु प्रकथ्यते॥ तत्रत्यानन्त्य
सिद्ध्यर्थं सृष्टेरत्रोपपादनात्॥ ७॥ परोक्षवाचीतच्छब्दो ब्रह्मवाक्यस्थ एव चेत्॥ प्रसिद्ध्यर्थकवैशद्या
त्तस्यशाखास्तु प्रसिद्धता॥ ८॥ एतच्छब्दः परोक्षार्थस्तेन स्यात्प्रत्यगात्मता॥ वक्ष्यत्स्पष्टीकृतं चैतदासम
दादथानयोः॥ ९॥ सामानाधिकरण्येन प्रत्यग्ब्रह्मैक्यमुच्यते॥ तस्मादिति॥ प्रत्यक्च गम्य प्रत्यगात्मैक्य
कारं वक्ष्यतीत्यर्थः॥ अनयोः॥ तस्मादेतस्मादिति पदयोरित्यर्थः॥ किंच ब्रह्मण्यात्मशब्दः प्रयुक्तो दृश्यते
स च॥ आत्मत्वे ब्रह्मणो युक्तः प्रतीचोन्यत्र नैव हि॥ १०॥ आत्मशब्दप्रयोगोस्ति तस्मादात्मेश्वरे कृता॥
पंचमी प्रकृतौ ज्ञेया जनिकर्तुरिति स्मृतेः॥ ११॥ उत्पद्यते प्रकर्षेणानुगतया कार्यमित्यतः॥ प्रकृतिः स्या ६७

दुपादानं न निमित्तं विवक्षितं॥ प्रकर्षोनुगमः कार्येष्वुपादानस्य विद्यते॥ मायां तु प्रकृतिं विद्यादिति
सा प्रकृतिर्ननु॥ इति चेद् ब्रह्मशक्तित्वात्तस्याः स्यान्न स्वतंत्रता॥ देवात्मशक्तिमित्यादिश्रुत्या शक्तिर्हि
सा मता॥ १४॥ तस्याः प्रकृतित्वं स्यात्तदेव ब्रह्मणो मतं॥ सर्वानन्याविकार्येकसत्कार्यकारणं परं॥ १५॥
ब्रह्मस्वभावमालंब्य सृष्टिर्वक्तुं न शक्यते॥ ब्रह्मस्वभावमालंब्य न सृष्टिः प्रतिपाद्यते॥ १६॥ किंतु हेत्व
नुरोधेनेत्येतदत्र न संगतं॥ कारणं ब्रह्मणो भिन्नमभिन्नं वेति कथ्यतां॥ १७॥ ब्रह्माभिन्नत्वतः सर्वका
र्यमिथ्य विवक्षितं॥ मूलहेतुरसिद्धः स्यादितिनाद्यो न चापरः॥ १८॥ कूटस्थस्यापि हेतुत्वमयस्कान्तव
देव चेत्॥ ब्रह्मसंनिधिसातत्याज्जगत्सृष्टिः सदा भवेत्॥ १९॥ देशादौ जायते सर्वं न देशादि तदा भवेत्॥
देशस्य देशः कालस्य कालो वा न हि विद्यते॥ २०॥ न चावस्थान्तरं सिद्धेदवस्थायास्तथा सति॥ अन
वस्थाप्रसज्येतेत्यतः सर्गः सदा कथं॥ २१॥ भूतकालाद्यवच्छेद्यो सृष्टिरेतुं न शक्यते॥ भूतकालादि
संगस्याभावात्कुतः परात्मनः॥ २२॥ किं सज्ज्ञाप्येतसद्भावाधः संबंधहानतः॥ हेतुनाभिद्वितीयः

स्यात्सर्वविनाशस्य सत्त्वतः ॥ उत्पत्तिलक्षणस्तस्य न घस्त्यतिशयस्ततः ॥ जन्मादीनां विकाराणां जन्मादी
नामसंभवात् ॥२४॥ कौटस्थ्यं क्रमतः सृष्टिर्मायिकाभ्युपगम्यतां ॥ जन्मनो यदि जन्म स्यादन
वस्थाप्रसज्यते ॥२५॥ नाशादेरपि नाशादावनवस्थाप्रसंगतः ॥ ॥परिणामादिकेष्वेवं परिणामा
द्यसंभवात् ॥२६॥ कौटस्थ्यस्यात्र चेच्छं तत्तस्मात्सृष्ट्यादिकल्पितं ॥ कालकर्मेश्वरादीनां मायिकत्व
त्वहेतुता ॥२७॥ मायामयी जगत्सृष्टिर्विद्याकर्मविनाशतः ॥ सृष्टिर्मायामयी चेत्स्यात्कथमात्मन उ
च्यते ॥२८॥ कस्त्याकाशादिसंभूतिरिति चेदभिधीयते ॥ तस्माद्वा एतस्मादुत्पन्नो मायिनः परमात्मनः ॥
२९॥ आकाशादिकरूपेण परमात्मैव भासते ॥ मायाविशिष्टं यद्ब्रह्म तदुपादानकं मतः ॥३०॥
आकाशोऽस्तीति वाऽस्ति खं ब्रह्माज्ञो भावभासते ॥ प्रतिबिंबो यथा भानि खस्य निच्छिद्रदर्पणे ॥३१॥ आ
श्चर्यरूपमाकाशः परब्रह्मणि भासते ॥ ऐन्द्रजालिककल्पित्वेन यथा दिगिरणस्य हि ॥३२॥ अन्तःक
करणत्वेन यथैवाश्चर्यरूपता ॥ ईशानिर्मितिरस्वादेश्च जीवेनान्येन केनचित् ॥३३॥ विनिर्मातुमशक्य

४८

सुखं हि ब्रह्मरूपं स्यात्सर्ववेदान्तघोषतः ॥ अज्ञोऽपि विषयालाभात्किंचिन्नो जातु पुण्यतः ॥ विषया
नो नैदिकायानिवृत्तो समुदेति या ॥९६॥ सात्विक्यन्तर्मुखी वृत्तिः परिच्छिन्नेन तया सुखं ॥ ब्रह्मस्वरूपम
विदं विषयानंद उच्यते ॥ ह्यस्यवच्छिन्न परमब्रह्मानंदलवात्मकः ॥ सर्वप्राणिगतो यस्य विषया
नंदसंज्ञकः ॥ सर्वान्कामानिति श्रुत्यात एवात्र विवक्षिताः ॥ विषयातत्परिच्छेदबाधितावरणम
इयं ॥९७॥ सुखं ब्रह्मात्मनो बुद्धा ब्रह्मवित्परितुष्यति ॥ परिनोऽपि य मेव स्यादज्ञे वे मूढ विलक्षणः
९८॥ तदेवं ब्रह्मतज्ज्ञानतत्कामाः कीदृश इति ॥ ओंकारो यानि इत्यर्थत्रयमेतन्निरूपितं ॥९९॥
के वक्तव्याः समास्यर्थमिति शब्दः प्रयुज्यते ॥ मंत्रब्राह्मणभेदेन द्विविधो वेद ईरितः ॥२००॥ तत्र ब्राह्म
णसंज्ञाता न वस्तुपनिषत्स्थियं ॥ ब्राह्मणं चाष्टधा भिन्नमितिहासादिभेदतः ॥२०१॥ इतिहासपुराणे
च विद्योपनिषदस्तथा ॥ श्लोकाः सूत्राण्यनुव्याख्या व्याख्यानानीति वाष्टधा ॥२०२॥ आद्यं भृगुर्वाइ
त्यादिसंतोवाइतिवापरं ॥ यो तो वाङ्मानी त्यादि द्वितीयमित्यथ ॥ यत्र सर्गादिकं वक्ति तत्पुराणमिति

×ब्रा ५

तै० सं० संसारे खिन्नानां प्राणिनां प्रभुः कृपया ॥ कुरुते महार्थसंहृतिमेते यामे व विश्रांत्यै ॥ कर्मविपाव
न हेतोः प्रभुदयया पुनरपीह परमेशः ॥ सृष्टिं विधायते षां कर्मविपाचयति देहभृतामिति ॥ मा
यायाश्चेश्वरस्यापि सर्वसाधारणत्वतः ॥ ईश्वरोपाधिराकाशो वायुः साधारणो ततः ॥ ४२ ॥ आ
काशवायुरित्येकं स्वर्गोभुवो प्यवनितलं ॥ वायोर्गुणः स्यात्कंपस्तु व्यूहनं परिकीर्तितं ॥ ४३ ॥ यथा
वाकाशकत्वं स्यादवकाशप्रदातृता ॥ तस्मिन्कारणधर्मश्च सत्वादिरनुगच्छति ॥ ४४ ॥ अदृष्टत्वेन
वान्यत्र वस्तुष्वाश्चर्यलक्षणः ॥ वायोः स्वभावो यस्तिष्ठे मायाधर्मः स ईरितः ॥ ४५ ॥ सिंधुनीरादि
वर्तो महतः पवनस्य यः ॥ आकाशधर्मः शब्दः सावेव मृगन्यादिकेष्वपि ॥ ४६ ॥ अग्नेर्नेतस्त्विरुरूपं स्या
द्गुणः कार्यप्रकाशनं ॥ यदाश्चर्यकरत्वं स्याद्धेलक्षणेन सर्वतः ॥ ४७ ॥ मायाधर्मः स विज्ञेय स्साधो
कुंडकुंडवत् ॥ आकाशधर्मः स्पर्शोस्य वायुधर्मः प्रकीर्तितः ॥ ४८ ॥ खादे विलक्षणत्वेन शब्दादि
र्नासिते हि यः ॥ मायाप्रभुश्च एव स्यात्सोप्याश्चर्यकरत्वतः ॥ ४९ ॥ आपोप्याश्चर्यरूपाः स्युर्विलक्ष ४९

××नीलपीतादिकं स्मृतं ॥ रसः पृथिव्या विज्ञेयो ×२

णतया न्यतः ॥ पाषाणप्रचुरे देशे शाड्वुले वुलेत्ययं ॥ ५० ॥ स्पर्शश्शीतः श्वेतरूपं गंधः स्यात्पृथिवी
गुणः ॥ शब्दः कटकटेत्येवं मूर्तयोर्घर्षणाद्भवेत् ॥ ५१ ॥ स्पर्शस्तु कठिनो रूपं मधुरास्वादघनेकधा ॥ अ
न्यत्राप्युक्तं ॥ प्रतिध्वनिर्वियच्छब्दो वायोर्वीजिति शब्दनं मिसादि ॥ खादीनां पंचभूतानां सृष्टिरेवं समी
रिता ॥ ओषध्यन्नपुमांसस्तु भौतिकाः स्फुरद्युक्तितः ॥ ५२ ॥ नदीगिरिसमुद्रादिसर्वभौतिकसर्जनं ॥
उपलक्ष्यतदुत्पत्तिर्जोषः ॥ यत्तुन्नरे वदेहस्यारंभकेति न तद्भवेत् ॥ खेदादर्दर्शनाद्देहे पांचभौतिको मता ॥ ५३ ॥ ×ता५
कार्यत्वाद्देवदत्तस्य शरीरं करकादिवत् ॥ भूयस्तत्वविशिष्टान्यासमवेतत्ववर्जितं ॥ ५४ ॥ एकसत्वेद्वयं
नेत्रियथैवं न चतुष्टयं ॥ अतोन्यासमवेतत्वं दृष्टांते स्ति तथा सति ॥ ५५ ॥ विशेषणस्य विरहाद्विशि
ष्टविरहे सति ॥ दृष्टांते साध्यसिद्धिः स्यात्सेतु न तथा नवेत् ॥ ५६ ॥ देवदत्तशरीरं पृथिवीसमवेत
त्वे सत्युदकासमवेतत्वे तेजोसमवेतत्वे वाय्वसमवेतत्वाकाशासमवेतत्वरहितं कार्यत्वात्करका
दिवदित्यनुमानमभिप्रेत्याह कार्यत्वादिति पद्ये विशेष्याभावप्रयुक्तविशिष्टाभावमादाय

साध्यपर्यवसानां त्रीण्यादिसृष्टेर्वेन तस्य सिद्धिरिति भावः॥ श्रुतिः पृथिव्या इत्यादिरोषधीनां जनि
र्जगौ॥ पंचीकृतानां भूतानां पंचानामुदयस्ततः॥५७॥ तदुत्पत्त्या विराजोपि तादृग्भूतशरीरिणः॥
उदय इत्यनुषंगः॥ विराट्कारणभूतं तु सूत्रं चात्र विवक्षितं॥ तदुत्पत्तेः पुरा कार्यमपि सूत्रं स्व
हेतुना॥ अक्षणस्य विभक्तत्वादिति सूक्ष्मत्वहेतुना॥ कार्ये व्यवहृते योग्यं न स्यादेव तदेव तु॥५९॥
विराडात्मानमुत्पाद्य मृदादीव घटादिकं॥ याति कार्यव्यवहृते योग्यत्वं स्थौल्यलाभतः॥६०॥ विरा
डात्मदादेश्च घटादिद्वारतो यथा॥ ननु पंचीकृतेर्नात्र भूतानां श्रुतिकोपतः॥६१॥ त्रिवृत्करण
मुक्तं हि छांदोग्य इति चेन्न तत्॥ तत्स्रष्टाकाशं च वायुं च न तेजोसृजदित्ययं॥६२॥ गुणोपसंहृति
न्यायाच्छांदोग्येपि हि निश्चितः॥ इत्यर्थमथ इत्यन्वयः॥ तत्रेमास्तिस्र इत्यादावविदंत्रक्षोदितानि
हि॥ पंचभूतानि तेषां च पंचीकरणमुच्यते॥ त्रिवृत्करणमत्रत्यमन्यस्याप्युपलक्षणं॥ अन्य
थेमास्तिस्र इति तासां त्रिवृतमित्यपि॥ द्वैविध्यार्थपरमत्रापि पदजातं विरुध्यते॥ श्रोतृवाचो ५०

च्यानयेवाश्चर्यरूपता॥ आश्चर्यरूपता चेयं मायायां शोभनं गच्छति॥ आश्चर्यात्मकता चेयं मायेति
व्यपदिश्यते॥ मायिनी गृहदीर्घमायेति व्यवहारतः॥३५॥ आकाशभागो विज्ञेयो यश्चावका
शप्रदानतः॥ वस्तूनामवकाशदानयोग्यस्वरूपमित्यर्थः॥ एवं चास्याश्चर्यरूपमवकाशप्रद
मित्येवं ब्रह्मांशमायांशस्यानुगतं स्वभावतीति भावः॥ प्रतिध्वनिर्गृहादौ यः सोयं व्योमगुणः
स्मृतः॥ अवकाशप्रदस्यास्य शब्दैकगुणशालिनः॥३६॥ सृजने कामसंकल्पौ साधनं मायि
नो विदुः॥ तस्यास्याकाशमित्येवं सिद्धौ कामौ महेश्वितुः॥३७॥ उक्तस्वरूप आकाशो जायतामिति
भावना॥ संकल्पस्तौ महेशस्य मायायाश्च सकामतौ॥३८॥ सर्वोपि व्यवहारो स्यात्विंत्यशक्तिबलो
द्भुतः॥३९॥ अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स श्रृणोत्यकर्णः इति श्रुत्युक्त इत्यर्थः॥
स्वमस्तप्राणिकर्माणि पूर्वसृष्टेकृतानि तु॥ अपक्वानि पुरा तानि प्रलये मायिनीश्वरे॥४०॥
स्थित्वा तान्येव पच्यंते परिपक्वेषु कर्मसु॥ सृजेद्भोगप्रदानाय जगत्सर्वं महेश्वरः॥४१॥ तदुक्तं॥

१०४ षड्विधो नरसो ह्लादिर्मा नापि नावैसेवितः ॥ ४१०

णामेकप्रकृतित्वान हि ॥ स्थूलारंभकता युक्ता स्थूलानामेव नान्यथा ॥ अतो पंचीकृतेस्तस्मं
स्थूलं पंचीकृते मतं ॥ ७३॥ वायुव्योम्नोश्चाक्षुषत्वं भवेत्पंचीकृतौ तव ॥ पृथिव्यवनलास त्वमि
मित्याद्युक्त्यानिश्चेतनत्तु ॥ पृथिव्यवनलौ तत्वं गगने पवने पिवेत् ॥ रूपवत्वमहत्वाभ्यां चाक्षुषत्वं
प्रसज्यत इति वचनेनेत्यर्थः ॥ नागाधिक्यात्पृथिव्यादिव्यवहारो यथा भवेत् ॥ श्रीमद्व्यासेन
वेदोष्या न ह्यादइ निकीर्त्तनात् ॥ ७६॥ तथैव रूपवत्त्वागाधिक्याच्चाक्षुषा मतो ॥ स्पर्शवत्वागभू
यस्त्वात्स्पार्शनित्वं च वसं भवेत् ॥ ७४॥ रूपस्पर्शविहीनो यो नागमात्स्याधिकलतः ॥ अचाक्षुषत्वमि
त्येन द्यवरत्तासमवस्थितेः ॥ अन्यथा गुणसांकर्य्यं तवापि स्यात्तथोदितं ॥ पृथिव्यवनलासं
त्वं पृथिव्यादेः परस्परं ॥ ७५॥ यदि स्यात्स्नेहगंधादेः सांकर्य्यं तेज आदिषु त्युत मित्यर्थः ॥ तस्मा
त्प्रमाणतः सिद्धं पंचीकरणमित्यले ॥ अन्नात्पुरुष इत्युक्तमयुक्तं नहि केवलात् ॥ ७६॥ अन्नाद्वृत्त
नकृत्पत्तिरिति चेदभिधीयते ॥ अन्धात्रमन्नाद्रसोत्पत्तिः रोहितं जायते रसात् ॥ ७७॥ जायते रुधिरा
२ × यतूक्तं परमाणुभ्यो जगत्स्यादिति तन्न सत् ॥ सत्वात् द्विवः स्याद्यंकर्म स्यात्परमाणुष्वत
तः संयोगास्तेन द्यणुकादिक्रमाज्जगत् ॥ तत्कर्म निर्निमित्तं चेत्सर्वदा स्याज्जगत्तवाप्रय
लो वा नित्ययोगोऽदृष्टो पुरा नहि ॥ नित्यस्य त्वयत्नस्य तत्कार्य्यं कहेतुता ॥ अदृ
ष्टादाद्यकर्म स्यादिति चेत्तन्नयुज्यते ॥ तस्यात्म समवेतस्य नसं (यो) गः परमाणुभिः ॥

मांसं मेदस्ततस्ततोऽभवः ॥ मेदसोऽस्थीनि जायन्ते मज्जाप्यस्थिसमुद्भवा ॥ ततः शुक्रस्य निष्पत्ति
शुक्लं मातृरज आयुतं ॥ नरस्योत्पत्तिबीजं स्यात्कं दिदं स्पष्टमुच्यते ॥ ८९॥ तस्य योनौ निषिक्तस्य
कर्मादिवशनिमित्ततः ॥ जायते कललावस्था ततो बुद्बुदरूपिणी ॥ ९०॥ तस्य शुक्रस्य ॥ बुद्बुदाज्जा
यते पेशी पेशीतो जायते घनं ॥ घनाद्देहाङ्गनिष्पत्तिः केशरोमाणि देहतः ॥ ९१॥ घनेन काठिन कार्य
स्यात्पेशी मांस प्रकीर्तितं ॥ सर्वदेहस्य हेतुर्यद्भूतं पंचकमिष्यते ॥ ९२॥ तद्देवास्य शरीरस्योपा
दानं कारणमिष्व ॥ व्यस्तंनेन कृतान्यस्मिन् स्मृति संकीर्तिनत्वतः ॥ ९३॥ स्मृति स्तत्र यथा पंचात्मका
रीत्याद्यवगम्यतां ॥ देहेयः स्थूलभागोऽस्ति सोऽनवच्छिन्नरूपिणः ॥ ९४॥ विराजः कामकर्मभ्यां सबं
धान्मोहतो भवेत् ॥ एतावन्मात्ररूपोऽस्मीत्यवच्छेदः प्रजायते ॥ ९५॥ यः समष्ट्यात्म लिंगस्थः सूक्ष्मभा
गोऽन्न वर्तते ॥ ससमष्ट्यादिरूपस्यावच्छेदः सूत्रसंज्ञिनः ॥ ९६॥ अवच्छेदद्वयस्यापि हेतुरव्यक्तमुच्य
ते ॥ तस्य सोषुप्तरूपं तु देहवच्छेद ईश्वरः ॥ ९७॥ सोऽत्र तारव्यविद्याभासो यः शरीरे च वर्तते ॥
सकार्यकरणान्यस्यावच्छेदः परमात्मनः ॥ ९८॥ सोऽत्रज्ञो वापिमो विद्धीत्युक्तत्वाज्जीव ईश्वरः ॥ अ

वरुद्दानियानि स्फुरत्तेवानुरूवतामिह ॥ जीवत्वहेत्वविद्येव कारणं परिकीर्तितं ॥ आत्मचैतन्यबल
तः सिद्धो तस्मान्नप्रमाणतः ॥२९९॥ यथादित्तितमो बुद्ध्यो लक्ष्यस्य चानुमन्वितः ॥ रात्रिर्जीतितथैवे
यचिद्व्यस्यानुभूतितः ॥३००॥ प्रमाणोत्पन्नया बुद्ध्या योगविद्यां इष्टुमिच्छति ॥ दीपेनासौ ध्रुवं
पश्येत् कुहाकुक्षिगतं तमः ॥३०१॥ विनात्माच्छादनं रूपमविद्यायाः न विद्यते ॥ अन्नावृत्ते त्ववि
द्यायावस्त्वाच्छादकता कुतः ॥३०२॥ अविद्येति न अस्त्विहि कोर्थ इत्यत्र भण्यते ॥ न अर्थस्तु द्वितीयत्व
त्वं नाद्विरूढत्वमेव वा ॥३०३॥ अमित्रादौ यथा तद्वत् न तत्वं न तदभावना ॥ तस्माद्दावरकत्वे सत्यवि
द्यैवोपपद्यते ॥३०४॥ तयासंवीतचित्तेयं त्यक्तादेहपुरातनं ॥ लिंगात्मा प्रविष्टो योनिकर्मादि
मरुतेतिः ॥५॥ चित्तं विवेकविज्ञानं लिंगात्मा जीव उच्यते ॥ अ[illegible]न्मात्पुरुष इत्यु[illegible] तस्मा
द्भुक्तं समास्यतां ॥६॥ गुहाहितत्वं यस्त्रोक्तं तत्समर्थयितुं पुनः ॥ विवेककोशकोशेभ्यो ब्रह्मतत्व
मथादितः ॥७॥ प्राहान्नमयकोशं तु स वा एष इति श्रुतिः ॥ आदितः आदावित्यर्थः ॥ कार्यादित्रि

स्मार ५२

स्थूलभागौ शब्दस्पर्शौ खवातयोः ॥ पंचवेत्यादिवाक्येच गीतायां ला[illegible] भागौ ॥७०॥ स्थू
लभूतपरत्वेन महिस्तेत्य भवेत्तयोः ॥ भूतांतरप्रवेशोन विनेत्यपितदादरः ॥७१॥ पंचेंद्रि
पंचचेंद्रियगोचरा इत्यादिवाक्यइत्यर्थः ॥ प्रत्यक्षत्वाच्च कार्यस्य पंचीकरणमिष्यते
७२॥ तथमेव पृथिव्यादि प्रत्यक्षत्वात्रिवृत्कृत ॥ इतिचेत्यवनस्यापि प्रत्यक्षत्वाद्यतु कृतिः ॥७३॥
रूपादिरहितत्वेन पवनोमास्तु चाक्षुषः ॥ स्पार्शनस्तु भवेत्येव रूपं तत्राप्रयोजकं ॥७४॥
चाक्षुषत्वे यथा स्पर्शोन प्रयोजक इष्यते ॥ ननु व्योम्नः परोक्षत्वात्कथं पंचीकृतिर्भवेत् ॥७५॥ सा
क्षिप्रत्यक्षवेद्यत्वं मनसोपीतिचेन्नतत् ॥ चक्षुरादींद्रियग्राह्यगुणत्वं विवक्षितं ॥७६॥ व्योम्नः श्रोत्रें
द्रियग्राह्यः शब्दोस्तीति न दूषणं ॥७७॥ प्रत्यक्षत्वं च शब्दस्य नस्यात्पंचीकृतिं विना ॥ यदि स्याद्गुणि
नोप्येवमन्यस्याध्यक्षतास्थितेः ॥७८॥ त्रिवृत्करणपक्षोपि तवनैव प्रसिध्यति ॥ किंच पंचीकृतिः स्व
ढं गतेपि निबद्धिस्कृता ॥७९॥ पंचात्मकमिति स्कृत्या पंचीकरणकीर्तनात् ॥ पंचात्मकं पंचसु
वर्तमानमित्यादिस्कृत्येत्यर्थः ॥ पंचभूतोद्भवत्वं च स्थूलदेहस्य गम्यते ॥ स्थूलानां चैव सूक्ष्मा

स्यज्ञात्वा वंदनयेनाह॥ ब्रह्मबोधार्थमुक्तस्यमस्तकादिकपंचकं॥ पक्ष्याकारतयोपास्त्यै चिन्त्याग्निव
दिहोच्यते॥१९॥ इदमेव प्रसिद्धं स्याच्छिरो स्यान्नमयस्य तु॥ अयं दक्षिणबाहुः स्यात्स्वं वक्षिमुखवर्त्ति
नः॥२०॥ दक्षिणः पक्ष इत्युक्तः सव्योयं बाहुरुत्तरः॥ वामशरीरेस[illegible]स्यादित्यमुरः॥२१॥ कंठादधस्तान्नाभ्यू
र्ध्वभागआसेति कीर्तिते॥ जीवस्थितिप्रदेशोयं मध्यदेशः स्मृतो ह्यसौ॥२२॥ मध्यं ह्येषामंगानामात्मेति
श्रुत्युक्तइत्यर्थः॥ नाभेरधस्तनांगं तु पुच्छस्थानीयमुच्यते॥ तच्चाधारः प्रतिष्ठा स्यान्नाभ्यूर्ध्वं प्रत्यध
स्तनं॥२३॥ गवादिकशरीरेतु मस्तिकादिशिरासतः॥ पुच्छस्याधारता ज्ञेया नमुख्याधारता मता॥२४॥
पुच्छस्याधारतोक्तिस्तूपासनार्था प्रकीर्तिता॥ शिरआदि प्रसिद्धं स्यात्तु प्राण[illegible]दिवकृवेत्॥२४॥ क
ल्पनेनिलापनार्थस्त्वेवकारः प्रकीर्तितः॥ तस्मिन्नर्थे भवत्येषश्लोकोपि श्रौतमुच्यते॥२५॥ अन्नाद्वैत्या
दिकः श्लोकश्चतुर्दशभिरन्वितः॥ पादैश्छंदो विशेषोयं वेदएव प्रसिद्ध्यति॥२६॥ अन्नादेव प्रजाः सर्वा
जायंतेन्नेन वर्द्धिताः॥ विवर्द्धंतेन्नमेवैताः प्रविलीयंति सर्वशः॥२७॥ हि यस्मात्कारणाच्चान्नं भूतानां ५२

२ ×आयुर्बलं किं तत्पश्न अन्ने विलयमाप्नुयुः॥ व्याख्येयंत
यान्नं हि मृगादेर्विलयोलवेत्॥२९

३× पादश्लोकस्य मंत्रोयं संवादः प्रसयावहः॥ अ
भिप्रसमुच्चयार्थः स्यात् [illegible] कस्तूत्रा येहि कीर्तिता॥ ×३

कारणं स्मृतं॥ तस्मात्सर्वौषधं तेषां क्षुद्रोगस्य निवर्त्तकं॥ निवर्त्तते हि क्षुद्रोगे जीवनास्यास्थि
तिस्ततः॥ स्थितिहेतुत्वसिद्ध्यर्थं क्षुन्निवर्त्तकतोदिता॥ सर्वौषधपदार्थोत्र सुरेशोक्तः प्रदर्श्यते॥
उष्णदाह इति प्रोक्तेरोषणे दहने स्मृते॥३०॥ अत्रालाके हि कुत्स्याग्निर्धातुर्नेव दह्यते ततः॥ वह्निरोष
[illegible] इति प्रोक्तोधानेपानमिति स्मृतं॥३१॥ धानात्तु पशमान्ने तेजो ननादं न मोषधं॥ अन्नेन जाठरा
ग्नेर्हि भवेदुपशमो नृणां॥३२॥ सर्वेषां जाठराग्न्यास्य वस्तुं चोष्णादिनिस्तनेः॥ अन्नंगोधयितेयस्मा
त्सर्वौषधमतोन्नवैदिति॥३३॥ लेह्यं नहंतं च नो ज्येच चोष्यादीत्यादिशब्दतः॥ वार्त्तिकेवत्समित्यत्र र
सस्याध्याहृतिमूर्तिः॥३४॥ सर्वमित्यादिनोपात्तिः सकलात्र विधीयते॥ येमानवाः प्रतीकेन्न ब्रह्मदृ
ष्टिं प्रकुर्वते॥३५॥ देहाकारेण संजाते ब्रह्मदर्शनसंस्तुतं॥ अन्नं मूर्द्धादिकेषु क्रममिति ध्यायंतिसंत
ते॥३६॥ लभंते सर्वमन्नं ते भक्ष्यादिकचतुर्विधं॥ यद्वान्नदेहरूपेण विराड्रूपतावस्थितं॥३७॥
यज्ञात्ब्रह्मणः स्वादेस्तदन्नोपाधिना युतं॥ येब्रह्मोपासनेमत्यास्ते विराड्रूपलोकं ततः॥३८॥ लभंते
सर्वमेवान्नं यथाहं सर्वदेहिनां॥ स्वादेः आकाशादिपरंपरयेत्यर्थः॥ विराडात्मकमन्नं येदीर्घका

१ × प्रांत्यन्तरस्त्वेव भ्रम्य जात रोगादिना स्मृतिं ॥ अतो
निःसहस्त्यत्र सूतानीबुध्यते ॥ २५ ॥

त्वा दिरादिना ॥ अहंग्रहेण ध्यायंति ते विराडात्मरूपतः ॥ ३८ ॥ आध्यात्मिकं यदन्नं तत् सर्वमेवामुवं
न्यते ॥ सर्वात्रा त्रा विराडात्मा यथैव मिति वार्त्तिके ॥ ३९ ॥ उक्तुलयोः को न्नाबोधार्थमं न्नेहीत्यादिकी
र्त्तितं ॥ उपास्यस्य प्रशंसार्थं पुनरप्यत्र कीर्त्यते ॥ ४० ॥ यस्मादतिशये नान्नं हेतुकारणमुच्यते ॥ तस्मा
त्संसाररोगस्य समस्तस्य निवर्त्तकं ॥ ४१ ॥ एवं पाक्तिर्विराडात्माक्रममुक्तिफलायतः ॥ अतः प्रशं
सामन्ने स्याहंहोत्यत्यादिनापि च ॥ ४२ ॥ किं चैवमन्नेशब्दस्य नितुत्यालोचने कृते ॥ सर्वहेतुन
यान्नस्य प्राधान्यमवगम्यते ॥ ४३ ॥ अद्यते त्ति च भूतानि तस्मादन्नं तदुच्यते ॥ इति शब्दः समाप्त्यर्थः
श्लोकयोः श्लोककोशयोः ॥ ४४ ॥ गुहा रूढब्रह्मबोधस्य द्वारभूतोयमीरितः ॥ पुत्राद्यासक्तिहानेन दे
हासक्तिकरत्वतः ॥ ४५ ॥ देहमात्रे त्यर्थः ॥ बाह्यासक्तिवशाद्योत्र स कदाचिन्नतिष्ठति ॥ तस्यात्रासक्ति
सिद्ध्यर्थमुपास्तिश्च समीरिता ॥ ४६ ॥ इत्थं न्नमयतां प्राप्त इति यो ब्राह्मणोदितः ॥ तस्मादेव ब्राह्म
णात्कादेतस्माल्लोककीर्तिता ॥ ४७ ॥ अहं मनुष्य इत्येवं मन्यमानाद्विलक्षणः ॥ अयं तु रप्रदेशाश्चे ५८
दक्षितश्चाण्मयात्स्मिय ॥ ४८ ॥ तेनेयं न्नमयः शरीरमापादतलमस्तकं ॥ स्नानशौचक्रियाद्यानां
४ × स्वस्नानां वनोहि पुत्रादावात्मव्यवहृति र्भवेत् ॥ लोस्यायमात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयते ॥ इत्यादिक श्रुतावात्मव्यवहार
स्य सूच्यते ॥ अथास्याय मितरआत्मा कृतकृत्योवयोगतः प्रैतीत्यतर्दश्रुत्यर्थ ॥ तावात्मा नो गृहस्थस्य पिता पुत्र इति श्रुतौ ॥
कर्मानुष्ठानसिद्ध्यर्थं गृहेवस्थाप्यते सुतः ॥ पितानुकृतकृत्यत्वाच्चाद्यत्यायुर्वविवर्जितः ॥ स्वस्माद्देहस्य सिद्धत्वात्
अमुष्यात्मेति चेत् ॥ नैवं हत्यतद्बुद्धिको योयमतद्रूपस्तः ॥ अभिप्रायोयमेवास्य कल्पस्यपश्चात् करिष्यते ॥ ४४ ॥

२ × आकाशादिक्रमाज्जातः शिरः प्राण्यादिमान् पुमान् ॥ यः सत्योत्पन्नः स एवेषु अस्मद्देहो नुरूपते ॥ अस्मद्देहत्वेनेत्यर्थः ॥
यद्यप्ययं न सत्तादेर्ज्ञानोपापि समुच्यते ॥ अन्नेन त्वेनसाज्जात्याद्युक्तमाधर्वेन तु ॥ ४२ ॥

न्नमात्मानमुपादायसन्नादृतः ॥ वैशद्येनानुसंधातुं न्यात्तस्य परात्मनः ॥ सैष वाविषया पञ्चको
शानां समुपासतः ॥ एवमस्य परोक्षत्वात् अस्यगात्मोपदिश्यते ॥ ९ ॥ असंगत्वादिमुक्त्या च न जायत इति
श्रुतेः ॥ आत्मनो विक्रियाहानादेहस्यात्र विकारता ॥ १० ॥ आत्मापि तदुपाधित्वात् तथैव व्यपदिश्यते ॥
स्थूलाध्यात्मिकदेहेन लिंगदेहयुतेन च ॥ ११ ॥ ब्रह्माण्डदेह उक्तो यो वैराजो ह्याधिदैविकः ॥ अत एव श्रुते
वायें दिग्भादीत्यादि कीर्तितं ॥ १२ ॥ दिगादिकरणो देवः पंचभूतशरीरभृत् ॥ सर्वेस्मिन् ल्यभिमानेन्द्रा
विराडेव प्रजायते त्युक्तमित्यर्थः ॥ आत्मैवेदमिति श्रुत्या न्नविधत्वं हि वारणात् ॥ वपुर्विराजो रेक्य स्यवि
वक्षितनयात्मता ॥ येन्न मित्यादिवाक्येन ध्यानस्याप्युपदेशतः ॥ १४ ॥ शरीर आदिप्रसक्तो ध्यानार्थवि
नहेतुना ॥ विराडात्मा स्वदेहोत्र ग्राह्यस्यादिति युज्यते ॥ १५ ॥ वपुर्विराजो रेकत्वं किमर्थमिति चेदिह ॥
उपासनातः कार्यस्य विराड्डीवेनरंतरः ॥ प्राणो हिरण्यगर्भः स्यात्तत तद्रुपाधिकः ॥ आत्मास्याद
नवच्छिन्नो यथा ध्वस्तघटादिके ॥ १७ ॥ दीपस्मिन्दंतरस्तेजोमात्र त्यपि वार्त्तिके ॥ अस्यान्नमयकोश

४ बाह्यः पवन एवांऽस्य संचारः प्राण उच्यते ॥ सामान्येन्द्रियवृत्तिर्वा प्राणः स्वलक्षणा स्थिता ॥ ननु तत्रांतरं किं विद्या
णाख्यमितिचेत्तन्न ... प्राणो वायुरेति वाक्यानुग्राह्यतास्फूर्तेः ॥ यः प्राण इति वाक्यात्स वायुरेव तिर्यग्गत
॥ यः प्राणः स वायुरिति वाक्यादित्यर्थः ॥ कोशं नवस्तुतो भिन्नहेतुना हीति सा श्रुतिः सामान्येन्द्रियवृत्तिर्वं सांख्योक्त
नानाप्राणमेक
मध्यगतो नाडीः समीपस्थो निधीयते ॥ देशे आकाशदेशे ऽनन्तदेवो नोपलभ्यते ॥ समानः सोऽय
मात्मास्या मध्यभागः प्रकीर्तितः ॥ उदानः पृथिवी शब्दः ... प्राणोऽधिकारतः ॥ प्राणेनोत्थि
तिहेतुर्वायुरिति ... पृथिवी यथा ॥ तथा प्राणादिवायूनां देहस्थितिकारणत्वतः ॥६२॥ प्रतिष्ठा स्याद
थयावद्वायुः ... जनयेन्न हि ॥ तावत्प्राणादिवायूनां देहे संस्थितिरिष्यते ॥६३॥ अत्रात्मनीव
हाप्याह श्लोकं प्राणमयात्मनि ॥ देवा यो लौकिका देवा मनुष्या राक्षसा अपि ॥६४॥ तामसाः पशवः
सर्वे चेष्टन्त मनुसृत्य च ॥ प्राणं प्राणेति चेष्टन्ते प्राणो देहं हित्वा लयेत ॥६५॥ आयुर्हेतुर्हि तेनाप्रा
णः सर्वमायुर्यतस्ततः ॥ प्राणस्य नामधेयं तत्सर्वायुषमितीरितं ॥६७॥ एतत्कोशज्ञानमात्रात्तु वर्ण
...॥ अत्राकुर्वंतस्त्यक्तुं नत्संस्कारनिश्चये ॥६८॥ ये प्राणोपाधिकं ब्रह्मोपासते तेऽधि
कारिणः ॥ एतदाध्यात्मिकं प्राणोपाधिकं ब्रह्मचिंतनात्तु ॥६९॥ अपमृत्युविनाशेन सर्वमायुरवा
प्नुयुः ॥ आधिदैविकरूपश्च प्राणो वा सन्निसिद्धितः ॥७०॥ जन्मांतरे च तद्रूपास्ते महाप्रलय ५५
॥ ... तदादि सर्वदेहेषु तेषु देहेः समभूते ॥ समः प्लुषिणा समो
... दिश्यते इत्यर्थः ॥ तस्मात्प्राणो ... ॥ हिरण्यगर्भप्राणस्य समष्टिव्यष्टिरूपतः ॥
स्थितत्वादि ... वायुरेवेति श्रुतेः ॥ वायुरेव व्यष्टिर्वायुः समष्टिरिति श्रुतेरित्यर्थः ॥ उपास्यो विभुतोक्तिस
... ॥ प्राण आध्यात्मिको ह्रस्वः परिच्छिन्नो यथेन्द्रियं ॥ ५४

न समेन जसं
रूपास्य व्यापि
शब्दो नास्व:
॥ देहक्रियानु
कूलावान्तस्मा
न्तान्तरं तव
त ॥ प्राणे प्र
विभुरस्मो
विभुस्यात्तु
सुपक्रमे ॥ हि
रण्यगर्भस्य
यतेः सर्वदे
हसमोक्तितः
मनसुकेनै
स्थितत्वादि
महत्वादिक

वधि ॥ प्राप्नुवंत्त्विममस्मायुरिति तत्फलमीरितं ॥ तद्रूपा इति ॥ स्वयमेव हिरण्यगर्भाः सन्त इत्य
र्थः ॥ सर्वकोशप्राणसार्थं प्राणो हित्वादिकीर्तितं ॥ उपासनप्रश्नसार्थं पुनरप्यत्र कीर्त्यते ॥ उपा
स्तियत्फलं प्रसयः सन्तत्फलं भाग्भवेत्तु ॥ इति विद्याफलप्राप्त्यै हेतुत्वार्थं पुनरुक्ततो ॥७३॥ प्रा
णोऽहीत्यादिकं वाक्यद्वयमित्याह भाष्यकृत् ॥ तात्पर्यं किं स्फुटको ... इति वाक्यतः ॥७४॥
यः प्राणमयकोशः स्यादिदानीमेष एव हि ॥ तस्य पूर्वस्य शारीर आत्मेत्यर्थः प्रकीर्तितः ॥७५॥ ...
... ॥ प्राणमयोपदेशस्येत्यर्थः ॥ ... यदा प्राणमयस्य हि ॥ तदानीमात्मता
प्राप्ति गच्छत्यन्नमयं ततः ॥ शरीरव्यापी प्राणमयो देहोऽन्नमय इत्ययं ॥७६॥ निश्चयः स्यात्त
के कत्र द्वयोरात्मत्वसंभवः ॥७७॥ ब्रह्मभिन्ना जगद्धेतुर्मायास्या त्रिगुणात्मिका ॥ आद्यमन्नम
येऽभाति तत्तमोभागजं च तत् ॥७८॥ रजोजन्ये प्राणमये क्रियाशक्तिः प्रतीयते ॥ मनोमयादि वि
ज्ञानमये सत्त्वभागजे ॥७९॥ ज्ञानशक्तिः स्मामी ... सत्त्वहेतुर्मनोमये ॥ अतस्तामसता

गस्य धर्मा रागादयो त्र हि ॥ रजोमिश्रः सत्वगुणो विज्ञानमयकारणं ॥ त्यागकृप्यादि कर्तृत्वम
नोऽस्मिन्न वज्ञासते ॥८२॥ आनंदमयहेतुस्तु शुद्धः सत्वगुणः स्मृतः ॥ अतः सुखविशेषोऽस्मिन्प्रि
यादिर्जीतिने नरः ॥८३॥ ज्ञानशक्तिक्रियाशक्तिद्वैधेकोपि तदवान्तरभेदतः ॥ आद्या करणशक्तिः स्यान्
कर्तृशक्तिस्तथा परा ॥८४॥ योगशक्तिस्थिती यास्यान्मनः करणशक्तिजे ॥ कामादिवृत्तिसंघोयं
तद्विकारो मनोमयः ॥८५॥ अयं प्राणमयादन्योऽप्यन्तरश्चात एव हि ॥ प्रत्यासन्नतया व्यक्तोऽवि
तिसर्वान्तरात्र च ॥८६॥ आसामप्यविदन्निव्यक्तेरतएवमनोमयः ॥ मनोमयेन तेनैव प्रा
णमयो बहिः ॥८७॥ बाह्य इत्यर्थः ॥ आपादमस्तकव्याप्तिः क्रियाशक्तेर्यथा भवेत् ॥ तथैव ज्ञा
नशक्तेश्च संव्याप्तिरुपलभ्यते ॥८८॥ मनसाप्युपलक्ष्यंते वागादीनीन्द्रियाण्यतः ॥ कर्मज्ञानेन्द्रि
याणां स्यादत्र नवी मनोमये ॥८९॥ मुख्यत्वान्मनसस्तेषां मनोमय इतीयते ॥ तैः स्वस्वव्यव
हारेषु मानसस्युपजीव्यते ॥९०॥ विवाक्षादिकरूपायाः प्रज्ञाशब्देन कीर्तितः ॥ पुरस्तात्पम ५६

२४ अज्ञाणां प्राणरूपत्वान्न तत्कोनरतेति चेत् ॥ तेषां प्राणानुवृत्तित्वात्तद्रूपत्वादिकं स्मृतं ॥ अयमर्थमादिभेदा
नेवाणि तद्रूपनामानी ॥ स्यात्वस्येव वागित्यादित्यादिनाथ विषये श्रोत्यादिकमुक्त्वा अथैम मेवमाह्
यमध्यमः प्राण इत्यादिना तस्य तदभावोक्तेरित्यर्थः ॥ ४२

४× अमुष्यात्मत्व साम्येपि द्वयोंतरविच्छेदतः ॥ गौणात्मत्वं मृषात्मत्वं कीर्तितं पुत्रदेहयोः ॥ स्व स्मान्मेदधियः सत्वा
दसत्वाच्च क्रमात्तयोः ॥ तदुक्तं ॥ गौणमिथ्यात्मनोसत्वे पुत्रदेहादिबाधनादिति ॥ ४५

सत्त्रे लिंगात्मनिष्ठिते ॥४९॥ क्रियाशक्तेः कार्यभूतः प्राणस्तद्विवृतिः पुनः ॥ पंचवृत्तिसमूहोयं भ
वेत्प्राणमयाभिधः ॥५०॥ स्यादहं प्राणिमीत्येवमुख्यत्वात्साद्विकरत्वतः ॥ अहंप्रत्ययगम्यत्वादात्म
न्यारोपणादपि ॥५१॥ आत्मत्वं तदपि प्रत्यक्त्वरूपत्वमुदीरितं ॥ देहादभ्यंतरे तस्मिन्नुक्ते प्राणम
यात्मनि ॥५२॥ मुख्यात्मत्वे शरीरस्य वारितं स्याद्यथा तथा ॥ देहात्मत्वोपदेशो न पुत्रादौ तन्निवारि
ते ॥५३॥ देहात्मवासनादार्ढ्याद्देहात्मत्वानिवर्तने ॥ तद्वासनानिवृत्त्यर्थं विधातव्यमुपासनं ॥
५४॥ सवा एष इति श्रुत्योपास्यरूपं प्रदर्श्यते ॥ स्वतो नावयवा अस्य देहस्येव तथापि तान् ॥५५॥
संपाद्य पुरुषाकारश्चिंत्यः प्राणमयो भवेत् ॥ तत्संपादनमेवास्य कथं स्यादिति चेच्छृणु ॥५६॥ पुरु
षाकारतां तस्यान्नमयस्येव तदंतरे ॥ पूर्णत्वेन स्थितो प्यत्र पुरुषाकार उच्यते ॥५७॥ मूषानिषिक्त
ताम्रं हि प्रतिमाकारमाप्नुयात् ॥ अग्रे व्यत्वेवं स वा एष इत्यादि वचनत्रयं ॥५८॥ स वा एष पुरुषवि
ध एवास्य पुरुषविधतां ॥ अन्वयं पुरुषविधस्तस्य तदनु व्येवं व्याख्येयमित्यर्थः ॥ इतुरून
तस्मात् प्राणो मूर्द्धेति चिंत्यते ॥ नाडीषु संचरस्त्यानो व्यानो धो निगतो दः ॥ नोक्तन्दर्यो ॥ कुक्षि
२४ रूपेण चिंतनीयो मनाक्षिणः ॥ ४१

× अथर्वाख्यांगिरो नाम मुनिदृष्टा भवंतिये ॥ तस्य वेदगता मंत्रास्तेऽथर्वांगिरसः स्मृताः ॥ ऐहिकेष्टप्रा
प्त्यनिष्ट... परिहारककरत्वतः ॥ तन्मयत्वात्प्रतिष्ठात्व मित्युक्तं माधवेन च ॥

रिभिः ॥ वाच्यानां यजुरादीनां मनोरूपत्वमेवतु ॥ तैः शब्दैरुपलक्ष्यंते तद्वाच्यो वचनलक्षणा
मनोवृत्तिविशेषाइत्यतः किंचिन्नदूषणं ॥ ९६ ॥ यजुरादिशब्दराशौ वाच्ये रूढस्तथापि नः ॥
श्रुतेरनतिशंकत्वाद्यजुर्वेदमयीमहे ॥ ९७ ॥ एतत्क्रमकवर्गाये ते यजुर्वेदरूपतः ॥ अध्ये ×८३
नव्याप्तयत्नेन त्वेवं संकल्पवृत्तिः ॥ ९८ ॥ विशिष्टमानसीवृत्तिर्योग्येति प्रकटार्थकृत् ॥ वि
शिष्टमानसीवृत्तिः यद्वाक्यादिसंयुता ॥ ९९ ॥ मनःश्रोत्रद्वयग्राह्या यजुःस्यादितिवान्विकि ॥ इतो
परं तु चैतन्यं वृत्तिर्विर्वातद्विरोधिता ॥ १०० ॥ यजुराद्यैः पदैर्ग्राह्येत्याह नंदयतीश्वरः ॥ अप्राप्यानंदमीश
स्यस्वरूपं मनसासह ॥ १०१ ॥ शब्दाद्यतो निवर्त्तंते तं विद्वान्न बिभेत्ययं ॥ तज्ज्ञमनोमयोपाधिं पर
मेशं कदाचन ॥ १०२ ॥ षष्ठी गुणक्रियाजातिद्रव्यादीनामभावतः ॥ शब्दानां न प्रवृत्तिः स्याद्वचनानां
महात्मनि ॥ १०३ ॥ संकल्पयेन्मनस्तोहं गोहं व्यक्तिरितिवायुनः ॥ नचेत्तद्रूपयं ब्रह्मस्वरूपतस्तत्र भवनंति ॥ १०४ ॥
तदुक्तं ॥ अग्राह्याणां विषयत्वाद्धि परोक्षत्वाद्गुच्यते ॥ विषयी नाम विषयः स्वत्वान्नास्य परोक्षतेति ॥ ५१

१ × विद्यात्रिविधिर्धर्मस्तुरूपास्तिर्वचिकर्मदेत ॥ ऐकार्थ्यं विद्युपास्त्योर्हि तत्र तत्र श्रुतौ श्रुते ॥ मनो ब्रह्मे
त्युपासीतेत्युपास्ति नोपक्रम्यज्ञाति च तपति च कीर्त्यायशसा ब्रह्मवर्चसेनय एवं वेदेत्यत्र विदिनोपसं
हारश्रुतमित्यर्थः ॥ ×१

उक्तोपाधिविशिष्टस्योपासनं स्याद्विवक्षितं ॥ अन्यथा शिरआदीनां कल्पना विफला भवेत् ॥ ६ ॥ उपा
सीनस्य सततं रोगद्वेषाद्यभावतः ॥ इत्युक्ते... स्यात्क्रममुक्तेस्तु सत्वतः ॥ ७ ॥ परत्रेतु न यं म
त्वा कदाचन पदं श्रुतौ ॥ मनोमयोपदेशस्य तात्पर्यं व्यालिगद्यते ॥ तस्यैष एव शारीर आत्मेत्यादिकवा
क्यतः ॥ शारीरस्यात्मनोमयस्तत्स्वामी तु मनोमयः ॥ ८ ॥ आत्मेति निश्चयः स्यादित्यस्यार्थः परिकीर्त्ति
तः ॥ उपासनविवक्षेति कथमत्र समीरितं ॥ ९ ॥ अभ्यासैक्य परेय्येये वाक्यभेदादिहेति चेत् ॥ स्याद
त्रोत तरतात्पर्यमुपास्तौ परमात्मनि ॥ १० ॥ महातात्पर्यमित्येव मस्माकं प्रतिभासते ॥ अहंकामयइत्ये
वं मनुजेयोनुभूयते ॥ ११ ॥ तस्मान्मनोमयादन्यो विज्ञानमयसंज्ञकः ॥ तेनात्मनान्तरस्तेन पूर्ण
एषो वतिष्ठते ॥ १२ ॥ इतिवाक्यः संकल्पयामीत्यादेः प्रदर्शनार्थं ॥ सतु उक्तानराकौहिणो भोगी र
ज्ञसाग्युतः ॥ १३ ॥ स एव कर्तृतो चेतं विज्ञानमिति कीर्त्यते ॥ यथा भोगस्तमोमिश्रो रागाद्युक्तं मनो मतं ॥
१४ ॥ अहं कर्त्रेति च ज्ञानं विशिष्टं वृत्तिमध्यतः ॥ कर्तृत्वधर्मिलोयस्य वक्तनो ग्राहकं भवेत् ॥ न द्विजो

नं वा हि तद्विकारो विज्ञानमयउच्यते ॥ तद्वस्तु विज्ञानमित्यर्थः ॥ रजो विमिश्र सत्वोत्थं विज्ञानं मं स्वरूपतः
॥ विकारमेति मन्तव्या चाहं धिया विषयीकृतः ॥ द्विविधं मानसं ज्ञानमिदमित्यहमित्यपि ॥ बहिर्मुख
नयेदं धीर्मार्चान्तःस्वार्थगोचरा ॥१७॥ अंतर्मुख्या त्वहं बुद्धिः प्रमातारं प्रकाशयेत् ॥ ननु प्रमातार्मैथे
क्यमिति चेद्दृश्यते हि न तद् ॥१८॥ दृष्टे कोनुपपत्तिः स्यात् तत्त्वाकर्ष्यं न दुष्यति ॥ अहं धी विषयो मंता
स्याद्विज्ञानमयस्ततः ॥१९॥ अत एवैष हि [illegible] नाममेति संज्ञकः ॥ वस्तुतो हमिति ज्ञानं साक्षितन्ना
स्य एव सः ॥२०॥ तद्वृत्तिरावृत्ति ध्वंसे संस्कारात्याधवोच्यते ॥ सा स्वादनावृत्ते साक्षि एष्यासा तस्य
नादिमः ॥२१॥ घटादिधीतस्तत्सिद्धेर्न वृत्ती योपियुज्यते ॥ यद्वृत्तियुत चैतन्यं यावत्सत्ता विनि
श्चयः ॥२२॥ संस्कारस्तावतो ह्येय स्तद्वियेत्कुरी कृते ॥ इहोरी कृत तद्वृत्तिमुपेत्याहमाधवः ॥२३॥
अहमाकार हि निर्हिन्चलिंहाश्रमवारिता ॥ औपाधिकं हि कर्तृत्वमात्मनस्तत्रसज्जितं ॥२४॥ तद्वा
वात्स्यादिभिः कर्तृ कर्तृहीनस्तुते यथा ॥ तथात्मापि स्वतो कर्ता कर्त्तावागादिकैरिति ॥२५॥ यथा ५८
चनतोऽन्यथोतिस्तूत्रित मित्यर्थः ॥ बाह्यांतरिंद्रियोघाख्य मनो मय युतात्मनः ॥२६॥ कर्तृत्वे कि

नो हन्निंतान्ते व्यवहरन्ति हि ॥ प्रज्ञया वाचमित्यादि श्रुतिसंकीर्तितत्वतः ॥२७॥ विवाक्षादीत्या
दित्राद्धे नदिदृक्षाश्रुश्रूषादिग्रहः ॥ ते इंद्रियाभिमानि न इत्यर्थः ॥ श्रुतीति ॥ अन्वय व्यतिरेका
भ्यां श्रुत्युक्तत्वादित्यर्थः ॥ प्रज्ञया वाचं समारुह्य वाचा सर्वाणि नामान्याप्नोति ॥ प्रज्ञया चक्षुः
समारुह्य चक्षुषा सर्वाणि रूपाण्याप्नोतीत्यादिरन्वयः ॥ न हि प्रज्ञापेता वाङ्नाम किंचन प्र
ज्ञापयेदन्यत्र मे मनोऽभूदित्याह नाहमेतन्नाम प्रज्ञासिषमिति ॥ न हि प्रज्ञापेतं चक्षु रूपं
किंचन प्रज्ञापयेदन्यत्र मे मनोऽभूदित्याह नाहमेतद्रूपं प्रज्ञासिषमित्यादि व्यतिरेकः ॥ स्या
त्तावाएषइस्यादिवाक्यव्याख्या च पूर्ववत् ॥ आसत्वे नोपादिश्येयस्स एवैष इतीयते ॥ अ
हं संकल्पयामीति विस्पष्टमनुभूतितः ॥२८॥ वेदत्रय गतामंत्रा यजुराद्याः प्रकीर्तिताः ॥
विधायकत्वादादेशो ब्राह्मणे परिकीर्तितः ॥२९॥ अथर्वणांगिरसा दृष्टमंत्राः प्रकीर्तिताः
॥ अथर्वांगिरसस्तत्र शांतियोष्ट्यादिकर्मकाः ॥३०॥ प्रति छ ॥ त्वमिति प्रोक्तं ग्राम दाक्षिणकं
२४ आदिश्यते यनेनेति विधायकं उदीरितः ॥४२

चनेद समाश्रयात्॥ व्यापाराः करणस्यैव मनोबुद्ध्यादयो मताः॥ करणात्कर्तृरूपं च पृथगेवावगम्यते॥
बुद्धिशब्दादिना तत्र कीर्त्यते तत्र तत्र च॥३९॥ आत्मानं रथिनं विद्धीत्यत्र बुद्धिपदं कृतं॥ स्वतंत्रा सा
रथिर्यद्वत् चिच्छायासहितत्वतः॥४०॥ चेतनांशेऽनुतुल्येन मनसा करणेन च॥ नियंत्री तुरगाक्षा
णि देहं व्यापारयंत्यतः॥४१॥ स्याद्बुद्धिमनसोर्भेदः कदाचिन्नैककालता॥ अंतःकरणमेवैकं क्र
तुशक्त्यादिमत्त्वतः॥४२॥ बुद्धिर्मन इति द्वेधा जनवनीत्यत्र नामिमे॥ रजस्तमोयुतात्सत्त्वाज्जन्यत्वेन
क्तिकेहितत्र॥४३॥ ते कर्तृकरणताकीयस्यतत्तथोक्तं॥ विज्ञानस्यारथित्वं स्यान्मनःप्रग्रहवा
नसः॥ इत्यादिश्रुतिवाक्ये तु विज्ञानपदमीरितं॥ अयमेव पदार्थश्च जीवात्मेतिपरोदितः॥ मनोम
हानहंकारश्चेत्यंतःकरणं त्रिधा॥ इति सांख्याजगुस्तत्र हंकारश्चित्प्रमोयुतः॥ विज्ञानमयश
ब्दार्थस्तेन यूलो मनोमयः॥४५॥ नाहं प्राणो मयव्याप्तोयः प्राणमय ईरितः॥ तेन स्थूले शरीरे त्वि
न्द्रियापादतलमस्तकं॥४६॥ अहं मनुष्य इत्येवमभिमानः प्रतीयते॥ चिच्छायासहितत्वेन स्याद्धि
४ ×विज्ञानेऽथमोपाधिः संसृत्यैर्न्नत्यगात्मनः॥ तस्माद्बहिर्मनस्तस्मात्प्राणो बहिरितिश्रुतं॥ स वा अ
यमात्मा विज्ञानमयो मनोमयः प्राणमय इतिश्रुतमित्यर्थः॥×॥

य

५८

ज्ञानमयो स्यतु॥ विज्ञानत्वेन विज्ञाने प्रकृतिश्चेतिनामिमे॥४७॥ विज्ञानपदस्य सर्वत्रापि संबंधः॥
श्रद्धाद्याहृतिरूपत्वान्मनोमयसमुद्भवा॥ तथाप्येतस्य कर्तृत्वात्सामिलाहृतितद्गतोः॥४९॥ तदी
या एतदीयाश्चेत्यतः श्रद्धाशिरः स्मृतं॥ गुरूक्तत्वकतत्वादौ श्रद्धाविश्वासउच्यते॥५०॥ आदिशब्द
तत्त्वबोधोपाय॥ कार्तस्त्यपदाभ्यां चेतनकर्तृत्वाभिमानिता॥५१॥ संप्रज्ञातसमाध्यादियोगइत्य
भिधीयते॥ कार्तकर्तृत्वाभिमानः कार्तस्त्यकर्तृत्वाभिमानस्सत्यमित्यर्थः॥ आदिपदान्निर्विकल्प
कग्रहः॥ अन्यदोक्तं सत्यवचः स्वस्मिन्रधत्ते विवेकधीः॥ इत्यसौ कथिता श्रद्धा ब्रह्मवाश्रत्यदोदि
ते॥५२॥ धीःश्रमादियुता यस्माद्धारयेत्प्रत्यगात्मनि॥ अतो यथोक्तधीरेव श्रद्धा स्यादिति वार्ति
के॥५३॥ हस्तादयो देहमध्यमाश्रित्य व्याप्नुतिस्थमाः॥ यथा तथैव सत्यादीन्युक्तयोगाश्रयाणि
हि॥५४॥ यथार्थधीसमर्थानीत्येतत्तात्पर्यमन्यतः॥ देहांगानां मध्यमात्मा योग इत्युक्तिरिहेति च॥५५॥
वार्तिके इत्यर्थः॥ यागादिकक्रियाः श्रौताः कृष्याद्या लौकिकक्रियाः॥ कर्तृशक्तिकविज्ञानं कुरु
×महो हिरण्यगर्भोऽखंयमहत्तत्वं विवक्षितं॥ कर्त्रीसमष्टिर्बाल्प्रतिष्ठा श्रूयते तथा॥ उत्तरतापनी
ये सर्वाहं मयो हिरण्यगर्भ इति श्रूयत इत्यर्थः॥ सर्वाहं प्रत्ययगम्यानां समष्टिरितिकृत्यर्थः॥×१

४× जाविजन्मास्य दुःखस्य हेतवः पाप्मनादिताः ॥५४

तेन नु चेतनः ॥५५॥ ज्येष्ठब्रह्मात्मना तद्वोपासनेवासवादयः ॥ देहो हिरण्यगर्भस्यो ज्येष्ठः प्रथ
मजश्च तः ॥५६॥ विज्ञानोपाधिकं ब्रह्मयो वेदेंद्रादिदेववत् ॥ ब्रह्मणो न प्रमाद्येद्वै प्रमादः कोपय
मुच्यते ॥५८॥ ब्रह्मास्मीति धियस्त्यक्त्वा कर्त्तो लोके तिमूढवत् ॥ व्यवहारः प्रमादः स्यात्तं न कुर्या
द्यदा तदा ॥५९॥ द्वासी रेवर्त्तमानस्स नूत्यत्क्वा सकलपाप्मनः ॥ ब्रह्मलोके खिलान्भोगान्प्राप्नोति संक
ल्पमात्रतः ॥६०॥ उत्क्रान्ताने समुत्पन्ने विमुच्येत समानवः ॥ तस्मै ब्रह्मेति वाक्यं च पूर्ववद्योज्यतामिदं ॥
६१॥ करणस्यात्मतान्नात्वा देहता परिशिष्यते ॥ मनोमयस्य कोशस्य त्यक्ति प्रायो वगम्यतां ॥६२॥ विज्ञा
नमयकोशेस्मिन्नात्मत्वमतिहानये ॥ अथानंदमयः कोशस्तदन्योन्तर उच्यते ॥६३॥ आनंद
स्य विकारोयं प्रियमोदादिकृन्मजः ॥ आनंदमयु इत्युक्तो ब्रह्मैवानंद उच्यते ॥६४॥ कल्पितेन्व परिच्छे
दे साक्षिकत्वात्तदात्मनि ॥ प्रियादिकाल्मनानंदो ब्रह्म विज्ञयते परं ॥६५॥ यथा प्राणमयक्वा ६०
ति देहे हक्त्वे प्रतीयते ॥ प्राणस्य कार्यं चिल्लनं यथा च प्राणसंयुते ॥६६॥ मनोमयेन दृश्यं तैमनः

मनेनस्यादितिचेन्नैनुच्यते ॥ अनेनैव नयेनास्य नन्द्वैयर्थ्यसंभवात् ॥६७॥ वाक्यादियुक्तविशादेः
प्रासादादिकस्त्वरः ॥ हर्म्यादिगोचरज्ञानक्रियाशक्त्योरभावतः ॥६८॥ विषादेस्त्वपेक्षा स्यादिति
चेत्तुल्यमत्रच ॥ सर्वार्थगोचरज्ञानक्रियाशक्तिस्त्वपेक्ष्यतां ॥६९॥ शंकते हर्म्यादीति ॥ शक्तिः न दृष्टि
ष्टइत्यर्थः ॥ विनाशोपमसंगस्य न चरात्क्रियं भवेत् ॥७०॥ कश्चिन्मुख्यस्य चारोपो दृश्यते ह्याश्रयांतरे ॥
विलाहि मुख्याहिलस्य रज्वावारोपदर्शनात् ॥७१॥ उपाधिना परिछिन्नस्ते चरं तमनुस्वयं ॥ उक्तो वर
तिलोकावित्यत एव श्रुतीरितं ॥७२॥ स समानस्सन्नुभौ लोकावनुसंचरतीति श्रुत्युक्तमित्यर्थः ॥
आत्माध्यसंचरन्नैवतसंचारात्संचरन्निव ॥ अतो लेलायतीवेति श्रुताविव पदं श्रुतं ॥७३॥ नन्वेक
स्य चतस्रः स्फुरंतयो मनआदिकाः ॥ मनसः संशयरूपं स्याद्बुद्धिः स्यान्निश्चयात्मिका ॥७४॥ अहंकारो
भिमानः स्याच्चित्तं स्याच्चेतनात्मकं ॥ अनुसंधानरूपं स्याच्चित्तमित्यपरे जगुः ॥७५॥ स्थलिकाः काल
भेदेन ज्ञायंते ताश्च वृत्तयः ॥ युगपज्ज्ञानानुत्पत्तिर्मनसो लिंगमिष्यते ॥७६॥ मनो विज्ञानमययो
र्वृत्तिमात्रा सकलतः ॥ भिन्नकालत्वतस्त्वांतर्बहिर्भावो न हीति चेत् ॥७७॥ तयोः कर्त्रादिरूपेण न

निमात्रामस्येतिहि श्रुतिः ॥ अयं च प्रतिबिंबः स्यादवच्छिन्नं इति द्विधा ७७ ॥ पूर्वाचार्योक्तिपद्योघस्तत्राद्यो
संप्रदर्श्यते ॥ तथात्र विषयानंदो ब्रह्मानंदांशरूपभाक् ॥७८॥ निरूप्यते द्वारभूतस्तदंशस्तं श्रुतिर्ज-
गौ ॥ एषोस्यपरमानंदो योऽखंडैकरसात्मकः ॥७९॥ अन्यानि भूतान्येतस्य मात्रामेवोपभुंजते ॥ शांता
घोरास्तथा मूढा मानसा वृत्तयस्त्रिधा ॥८०॥ वैराग्यं क्षांतिरौदार्यमित्याद्याः शांतवृत्तयः ॥ तृष्णास्ने-
हो रागलोभावित्याद्या घोरवृत्तयः ॥८१॥ संमोहो भयमित्याद्याः कथिता मूढवृत्तयः ॥ वृत्तिष्वेतासु
सर्वासु ब्रह्मणश्चित्स्वभावता ॥८२॥ प्रतिबिंबति शांतासु सुखं च प्रतिबिंबति ॥ रूपं रूपं बभूवासौ प्र-
तिरूपमिति श्रुतिः ॥८३॥ उपमा सूर्यकादीति सूत्रयामास सूत्रकृत् ॥८४॥ एक एव तु भूतात्मा भू-
ते भूते व्यवस्थितः ॥ एकधा बहुधा चैव दृश्यते जलचंद्रवत् ॥८५॥ जले प्रविष्टश्चंद्रोयमस्पष्टः क-
लुषे जले ॥ विस्पष्टो निर्मले तद्वद्द्वेधा ब्रह्मापि वृत्तिषु ॥८६॥ घोरमूढासु मालिन्यात्सुखांशश्च
तिरोहितः ॥ ईषन्नैर्मल्यतस्तत्र चिदंशः प्रतिबिंबति ॥८७॥ यथापि निर्मले नीरे वह्नेरौष्ण्यस्य संक्रमः ॥ ६१

न प्रकाशस्य तद्वत्स्याच्चिन्मात्रोद्भूतिरत्र हि ॥८८॥ काष्ठे त्वौष्ण्यप्रकाशौ द्वावुद्भवं गच्छतो यथा ॥ शांता-
सु सुखचैतन्ये तथैवोद्भूतिमाप्नुत इति ॥ जीवस्वरूपानंदोयं परमप्रीतिगोचरः ॥ देहाद्युपाध्य-
वच्छेदादवच्छिन्नः स उच्यते ॥८९॥ स च स्वात्माविवेकत्वेन बिंबरूपोयमुच्यते ॥ अनुकूलेषु तादात्म्या-
त्तासु स्थितवत्तपः ॥९०॥ तदीयप्रतिबिंबस्तु तासु वृत्तिषु भासते ॥ तदीयेति ॥ अवच्छिन्नजी-
वस्वरूपानंदप्रतिबिंब इत्यर्थः ॥ चित्तेपि प्रतिबिंबोस्तु किमवच्छिन्नतेति चेत् ॥ चित्तादिकि नावच्छे-
दो कि प्रतीतेति तानि मे ॥९१॥ नन्वत्र प्रतिबिंबोस्य योग्योपाधौ हि कल्प्यते ॥ वीच्यां न प्रतिबिंबो वाव-
च्छेदो वा विचक्षणैः ॥९२॥ श्रीमत्तत्वविवेकादाववच्छेदस्तु वारितः ॥ प्रतिबिंबस्य मिथ्यात्वान्न मुख्यानं-
दरूपता ॥९३॥ अवच्छिन्नस्य वस्तुत्वेप्यवच्छेदस्य दोषतः ॥ दुष्टत्वान्नास्य मुख्यत्वं योवच्छेदेन वर्जि-
तः ॥९४॥ ब्रह्मस्वरूप आनंदस्स मुख्यः परिकीर्तितः ॥ दृष्टृदर्शनदृश्यादित्रिपुटीरहितत्वतः ॥९५॥
भूमा सुखात्मको न्यस्तु दुःखरूपोल्प उच्यते ॥ यो वै भूमा तदमृतं यदल्पं मर्त्यमेव तत् ॥९६॥ नान्ये
[illegible] ४४ तस्माच्चित्तेपि तद्द्वौ प्रतिबिंबोस्य मुच्यते ॥ किमिति ॥ चित्तावच्छिन्नता
किमर्थमस्य स्पर्धा ॥४४

सुखाभिमतान्नसा सुखमे(स्वे)तिसंस्कृतेः ॥९३॥ नृमे वसुखमित्यन्वयः ॥ तस्माद्दुःखविमिश्रत्वादनंत्यो न
हि मुख्यता ॥ किं तु नृमेव मुख्यः स्याद्दुःखहेतुविवर्जनात् ॥९४॥ स वृत्तिप्रतिबिंबाः स्युः प्रियमोदा
दयो मताः ॥ सात्विकवृत्तिस्था विक्रेत्यर्थः ॥ प्रियमिष्टसुतादीनां संदर्शनसमुद्भवे ॥ मोदस्तल्लाभजोन्यस्तु ता
क्रतोपक्रियोद्भवः ॥ अज्ञाने प्रतिबिंबः स्यादानंद इति कीर्तितः ॥ यद्वावच्छिन्न आनंदो बिंबरूपो
नीयउच्यते ॥९६॥ अनवच्छिन्न आनंदः प्रतिष्ठा ब्रह्म कीर्त्यते ॥ अवछिन्नस्य चान्येषां तदधीनत
याश्रयः ॥९७॥ अन्येषां प्रतिबिंबानामित्यर्थः ॥ मनोवृत्तिविशेषत्वात्प्रियादीनां तु यद्यपि ॥ कर्तृ
विज्ञानमयतो बाह्यतेवं तथापि तां ॥९८॥ ब्रह्मानंदस्य चान्यस्य धारत्वं तां तरस्य हि ॥ प्रतिबिंब
मतस्तस्माद्विज्ञानमयकोशतः ॥९९॥ आनंदमयकोशोयमांतरः परिकीर्तितः ॥ अन्यस्य जीवानं ५२
दस्येत्यर्थः ॥ साक्षात्करोत्युपासीनो यदा भावनया नरः ॥ आनंदमयमात्मानं तदा पुरुतयोक्तिते
५००॥ ब्रह्मत्वेकाग्रमापन्ना वृत्तिः साक्षात्करोति च ॥ प्रतिबिंबत्वतो ब्रह्मसौकाग्र्यो तत्र हि स्म ॥५०१॥

कार्यमतीयते ॥ चेतनत्वास्मिकादेहज्ञानशक्तिस्समंततः ॥ विज्ञानमयसंव्याप्ते मनःप्राणयुते यथा ॥ अहं
कर्त्तेति कर्तृत्वं प्रारेस्फातिसर्वतः ॥ तथानंदमयव्याप्तो देहे हस्तपदादिषु ॥ सविज्ञानमनःप्राणे विनो
दास्पदसुखस्य हि ॥६९॥ तेनांहीत्येतदानंदमय पूर्णत्वमुच्यते ॥ तथा तानीत्यन्वयः ॥ दुःखात्मिकानु
यात्रतिस्तद्धेतुर्यो मिनोमयः ॥ तेनदेहस्य पूर्णत्वाद्दुःखं जातिकराद्विदे ॥७०॥ दुःखं मनोमयस्यैव सु
खं तस्येति कथ्यते ॥ वीणास्वरस्य श्रवणादकस्माद्रुग्थितस्य हि ॥७१॥ विना दुःखपरामर्शं सुखस्य
प्रतिभासतः ॥ भावरूपत्वसिद्धिः स्यात्प्रतियोग्यनिरूपणात् ॥७२॥ नन्वानंदः क्रियारूपो न दिधात्व
र्थरूपतः ॥ क्रियार्थवचनादीनां पंचानामध्ययानतः ॥७३॥ गुणोद्भूयोत्थसत्त्वस्यास्य स्यान्मनोमयते
तिचेत् ॥ मनोमयांतःस्थानि तानीत्यर्थः ॥ तत्क्रियाव्यतिरिक्तस्यानंदस्यात्र विवक्षणात् ॥७४॥ सच स
त्वगुणस्यायं परिणाम इतीरितः ॥ सांख्यैरात्मगुणोयं स्यादिति नैयायिकैर्जगौ ॥७५॥ श्रुतिबाह्या
विमौपस्तौ कृत्वा ब्रह्मात्मकस्य हि ॥ नित्यानंदस्य लेशोयं विषयानंद ईरितः ॥७६॥ उपजीवंति नृता

३‸सम्य

यथा सो साधुरेवस्यादसन्नेवेति वेद चेत् ॥ सन्मार्गस्य न दर्थतो चास्तिको ब्रह्मनिरूपणात् ॥ अस्य सत्योपार्यं तया ब्रह्मापला ब्रह्मसाक्षी येन सन्मार्ग
तिवर्द्धतं तु सन्मार्गस्थापकं विदुः ॥११॥ सदिति वर्णाश्रमादिव्यवस्थारूपसन्मार्गस्य ... ॥ उपास्य दूषकेनास्ति
स्यकोऽस्तिकस्त्वितु लोकः परमार्थनि ॥ आत्मबुद्धिं हि रोकतुं तस्य षड्इतिकीर्त्तिने ॥१२॥ य आनंद कस्यादिय
मयः सोऽयं स्वामी सर्वस्य कीर्तितः ॥ स्याद्धि ज्ञानमयो देह आत्मानंदमयस्त्विति ॥१३॥ तस्य षड्वि र्थः ॥१२
वाक्यं तु पासकं प्रतियोजितं ॥ ब्रह्म नत्वेवं तु उत्सुर्यत्न प्रत्यस्वार्थ उच्यते ॥१४॥ यो ब्रह्म पुच्छमि
तुच्छः पदार्थे विषयवहि ॥ तस्य प्रियादेः पूर्वस्य शारीरात्म ऽवेदयं ॥१५॥ प्रियादिकं शारीर
स्तं ब्रह्मैवास्मेति योज्यतां ॥ इदमेवात्रिसंधाय प्राकृवृत्तिकिकारिता ॥१६॥ मिथ्यात्मनो हि सर्वे
ब्धोऽस्त्यादिगुणलक्षणे ॥ व्याविद्धाशेषसंसारमात्मा न संप्रवर्त्तते ॥१७॥ नह्यात्मवान् भवेत्स
पौ रज्ज्वाद्यध्यासरूपिणः ॥ आत्मनाऽवितथे नेव सर्परिज्वात्मनासेवानिति ॥ नेदंडाद्यात्मनास ६७
पः कल्पिते नात्मवान् भवेत् ॥ रज्ज्वात्मनेव सत्येन तथैवस्पर्थै निमस्यतु ॥१८॥ आनंदमयकोश

स्य ब्रह्मत्वं च निराकृतं ॥ समन्वयनयावस्थामस्याभिर्नेह तन्यते ॥ कठवल्ल्युक्तपुंन्यायाद्बुद्धैवेद्ने
यमुच्यते ॥ न त्रेद्रियेभ्य इत्यादि कठवल्लीषुपठ्यते ॥२०॥ विषयान्निखिलब्धप्राङ्मनसाऽथे ब्रु
यब्रवीहि ॥ विषयानकृते तेभ्योऽप्यक्षाणामांतरत्वतः ॥२१॥ परत्वमेवयुक्तं स्यात्तथाप्यर्थास्ततः पराः ॥
अखिलब्ध्यमाणानामवस्था आंतराद्ध्यवनत्पराः ॥२२॥ इन्द्रियेभ्यः परा इत्यर्थः ॥ अन्ये स्त्वतिग्रहाख्यार्थाः
पराः श्रेष्ठा इतीरितं ॥ तदुक्तं ॥ अतिग्रहत्वाद्विषयाः पराः स्युर्ग्रहलिंधानीद्रियतः कृतत्वात् ॥
गृह्णन्ति मर्त्यं स्ववशं नयंतीत्येवं ग्रहा ग्राहकता च तेषां ॥ ताभ्यां ह्यधीनाक्षि ततोऽर्थ वेपु रतिग्रहास्तेततन
एव मुख्या इति न्यायरत्नावल्यां ॥ मुख्याः श्रेष्ठा इत्यर्थः ॥ आंतरास्यान्मनो हि त्रिरर्थ लाभालिकत्
तः ॥ ह नेहैति मती बुद्धिरांतरा बुद्धितो महान् ॥२३॥ हिरण्यगर्भरूपोऽस्या वास्या स्यादांतरः परः ॥ हिर
स्वामित्वमेवोक्तं बुद्धेरित्यत्र नातिमे ॥२४॥ हृत्नि हि करणस्येव बुद्धेस्तस्वमिताततयोः ॥ हत्नेर्हृत्निमन
श्चैवं बुद्धिः स्यादांतरा मता ॥२५॥ अस्याः समष्टि बुध्यासा महान्परइतीरितः ॥ महतस्तदुपादाने
स्याः स्थूलत्वान्मांतर ॥२६॥ ततः अर्थेभ्य इत्यर्थः ॥ तद्धिष्ठानचैतन्यमज्ञानादांतरः पुमान् ॥ पुरु

२४ एवं सर्वेषु भूतेषु भूतवत् इत्यादिके कृते ॥ सर्वोत्तरत्वात्कूटस्थे नास्ते तन्मुखस्य हि ॥२३॥

प्रान्तपरं किं चित्स्य एवान्यन्तरः स्मृतः ॥ काष्ठा विश्रान्तिभूस्तस्य तारतम्यस्य कीर्तिता ॥ गेन व्यदेशः प
रम इति श्रुत्यर्थ इरितः ॥२८॥ तारतम्यस्येति अन्यन्तरत्तारतम्यस्य विश्रान्तिभूमिरित्यर्थः ॥ ज्ञेयः पु
रुष एवास्यान्नादियाननर्थहाननतः ॥ वाक्यशेषात एवोक्तो योगस्तज्ज्ञानसिद्धये ॥२९॥ योगेनैकाग्र्या
बुध्या सूक्ष्मया दृश्यते नतः ॥ सूक्ष्मार्थविषयत्वेन सूक्ष्मयेत्यवगम्यतां ॥३०॥
तस्यैव प्रतिपाद्यत्वे तदन्यो किंवर्थ इति चेत् ॥ बहिर्मुखस्य चित्तस्य क्रमात्तु सिप्रवेशने ॥ हेतुत्वात्क
थिता श्रुत्या हार्द्याकाशादिपरंपरा ॥३१॥ एतन्न्यायेन चात्रापि ब्रह्मानन्तोपपत्तये ॥ आकाशादिकसृष्टि
क्तिं गुहानिहिततोत्तरे ॥३२॥ उपपादयितुं कोशाः ज्ञेयं तु ब्रह्म नेतरत् ॥ गुहाहितत्वं ब्रह्मैव प्रत्य
गात्मेति बुध्यतां ॥३३॥ किं विद्यान्निक कारीय कोशस्य प्रक्रियोच्यते ॥ व्यात्म निप्रत्यगोत्मे हृन्द्वस्य
त्रं विना यथा ॥३४॥ एको न तिष्ठते सोयं परांच्यपि तथा नु वेत् ॥ पुष्पस्पंचकरूपेण व्यस्तपंचक ६४
रूपतः ॥३५॥ त्वा विद्यया विनिष्क्रलो [illegible] ॥ आत्मनो स्मद्धि नोगेन मयादि मयडर्थ
काः ॥३६॥ यथाहं प्रत्ययग्राह्याः पंचकोशान्नवं न्यमी ॥ अमी बांप्रत्यगात्मानः प्रकृस्यर्थास्तथा मताः ॥३७॥

प्रतिबिंबवत्त इति ॥ प्रतिबिंबभावाद्ब्रह्मसाक्षात्कारो त्येवेत्यर्थः ॥ मणिभ्रमेण तद्दीप्तोधावतोम
णिबुद्धिवत् ॥ साक्षात्कारोर्थसिद्धः स्याद्ब्रह्मणस्तदुपास्तितः ॥५०२॥ आनंदमयोपास्त्येत्यर्थः ॥
इदमेवाभिसंधायासं कोशस्य विकल्पांतरं ॥ ब्रह्मपुच्छं प्रतिष्ठेति श्रुत्या ब्रह्मैव कीर्तितं ॥५०३॥
अस्मिन् कोशे प्रधानस्य ब्रह्मणः प्रतिपादकः ॥ श्लोकोस्तीति तदप्येवं श्लोकरं स्यर्थ इरितः ॥४॥
इत्यस्यार्थ उक्त इत्यर्थः ॥ दृष्ट्यादिव्यवहार्यश्चेद्घटोस्तीति वदेन्नरः ॥ नोचेन्नास्तीत्यतो जंतुर्व्य
वहारेण वासितः ॥५०५॥ ब्रह्मणो व्यवहार्यस्याप्सत्त्वं वस्तु विवेकतः ॥ अन्यस्तु व्यवहार्याणां मि
थ्यात्वं प्रतिपद्यते ॥६॥ ब्रह्मणस्तदतीतस्य श्रुत्या सत्त्वं निश्चयात् ॥ सत्यत्वमेव प्रत्येति योस
त्वं ब्रह्मणो वदेत् ॥७॥ सन्नेस्यात्स्वयमेवायं कोशानात्मत्वकीर्तनात् ॥ ब्रह्मणश्चातिरिक्तस्यानंगी
करणतः स्वयं ॥८॥ अन्यस्य ब्रह्मणः स्वयमनंगीकृतेत्वाच्चेत्यर्थः ॥ एको शास्ती तमस्तीति वेदत
स्य तदेव हि ॥ ब्रह्मस्वरूपं ब्रह्मास्तीत्येतद्वदनतस्ततः ॥ एनं विवेकिनं सम्यं विद्यमानं विदुर्बुधाः ॥

×येतस्यो ×३

तै० सं० शयाः ॥ शिष्यधीदोषतस्तस्मात्क्रियते प्रश्नसंचयः ।३। आसु विनैक्यविभ्रान्तिः ध्वस्तेन विलियते ।
मननात्संशयच्छेदः प्रश्नोक्तिस्तेन संगता ॥३॥ छिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ॥ इति श्रु
त्याहि कथितं तयोर्जनं ॥४॥ प्रश्नद्वयोत्तरत्वादीयं किमर्थोऽप्यर्थकश्चन ॥ सोऽकामयतेति शब्दानां
त्रयाणामर्थ ईरितः ॥५॥ उतत्वेन लोकः शब्दानामित्यर्थः ॥ कोऽप्यविद्वान्परात्मानं प्रेत्याकं याति
वा न वा ॥ इत्येको विदुषस्त्वन्य इति प्रश्नद्वयं स्मृतं ॥६॥ असन्नेवेति पूर्वत्र कोटिद्वयसमुत्थिते ॥ ब्र
ह्मसद्भावविषयस्त्वाद्यः प्रश्न इति त्रयं ॥७॥ नत्वाद्यस्याभस्त्वेन ब्रह्मणः सत्त्वसिद्धये ॥ सोऽकामयत
त्कृत्यास्तृष्टिं वदति स श्रुतिः ॥८॥ इति श्रुत्यन्वयः ॥ कामनाकारता मायाविक्रियामेत्यतः परः ॥ सोऽका
मयत इत्युक्तो जीववैषम्यमस्य तु ॥९॥ कामिनार्थो विघातेन सत्यकामादि कथ्यते ॥ कामनास्वेव नि
र्दिष्टा बहु स्यामिति वाक्यतः ॥१०॥ बहुभूतिः कथं तस्याद्वयस्येत्यत उच्यते ॥ प्रजायेय प्रकर्षः स्या
द्दाधिक्यं हर्षरूपतः ॥११॥ ननूत्पत्तिरयुक्तास्या ब्रह्मणोऽस्येति चेन्नतत् ॥ ब्रह्मणोऽत्यंतमेदस्यास्त ६५
त्वान्नामरूपयोः ॥१२॥ अव्यक्ते नामरूपे च प्राग्यास्य व्यक्तिमागते ॥ सद्रूप नामसंत्यज्य ब्रह्म

×अव्यक्तरंगानात्यंतं ततो भिन्ना यथातथा ॥ भिद्येते नामरूपेन ब्रह्मणो जनिते ततः ×१

णः स्वयमप्युत ॥१३॥ सद्रूपत्वेन भासेते तद्धेदमिति संश्रुते ॥ तद्धेदं तर्ह्यव्याकृतमासीदित्यादि श्रु
तेरित्यर्थः ॥ तथा च मायया तस्य जगद्रूपेण भानतः ॥ प्रजायेयेति युज्येत स तपोऽतप्यत श्रुतेः ॥१४॥
आलोचनं तपः सृष्टेः स्वप्नमानार्थगोचरं ॥ नामरूपात्मके ह्येव सत्त्वं स्वादिषु दृश्यते ॥१५॥ आत्मा
नामादिकान्यस्यापाकाशो हि तसंश्रुतेः ॥ ब्रह्मेति व्यवहारोऽपि विकल्पो नरशृंगवत् ॥१६॥ शब्द
ज्ञानानुपाती स्याद्वस्तुशून्यो विकल्पकः ॥ इति सूत्रेण सद्वेति श्रुतिरप्यनुगृह्यते ॥१७॥ तस्मादनामरू
पेत न ह्यस्य सद्वादिनं प्रति ॥ अनुमाने सिद्ध दानीं सद्भावोऽस्य प्रसाध्यते ॥१८॥ शंकते ॥ नामरूपात्म
केष्वित्यादिना ॥ आकाशो ह इति ॥ आकाशो ह वै नामेत्यादि श्रुतौ यदंतरेति तदन्यत्वोक्तेरित्यर्थः ॥१९॥
सद्रूपः परमात्मायं कामित्वात्स्वर्गकामिवत् ॥ आलोचकत्वात्स्रष्टृत्वान्मंत्रिवत्कुंभकारवत् ॥२०॥
यत्तु नामादिके सत्त्वं तदेव ब्रह्मणो मतं ॥ कल्पितत्वादधिष्ठाने सद्रूपे नामरूपयोः ॥२१॥ एवं सृष्ट्वा
च सद्रूपं गृहादौ देवदत्तवत् ॥ बुद्ध्यादिकासिनाबुद्धा बुपलंभः प्रवेशनं ॥२२॥ यथा कश्चित् गृहं कृत्वा

×प्रविशन्नंतर्गुहास्थत्वं कोशाध्यारोपपायच ॥ ब्रह्मपुच्छमिति श्रुत्या पुनः स्पष्टयितुं वचः ॥ ख्यातिसिद्धवे
शायं स्तुष्टिर्यद्वदद्यते ॥×१

५ —सइति। स एष इह प्रविष्ट आ नखाग्रेभ्यो यथा क्षुरः क्षुरधानेऽवहितः स्याद्विश्वंभरो वा विश्वंभरकुलाय इति
वाक्येनेत्यर्थः॥ ×५

प्रविश्यात्मा नरस्थितः॥ एवं ब्रह्म जगत्सृष्ट्वा तस्य चान्तः प्रविष्टवत्॥ बुद्धौ हृदयसंस्थायां द्रष्ट्रो
त्रादिरूपतः॥ भासते सोऽयमेतस्य प्रवेश उपवर्ण्यते॥२२॥ घटादिकं नो नात्मा तथा बुद्धौ न हीति
चेत्॥ बुद्धिर्हृदयसंस्थैव विषये विकसत्यतः॥२३॥ तद्धिका सा रव्यवृत्तिः सा जलूकाया विकासवत्॥
बुद्धौ विषययुक्तायामस्या घटेति रूपतः॥२४॥ आत्मा द्रष्टादिरूपेण विज्ञातीत्यवगम्यते॥ स एष
इति वाक्येन प्रवेशोऽयं समीरितः॥२५॥ तदर्थबोधकाः श्लोका वाच्या वार्त्तिकसारगाः॥ तच्छब्देन प
रामृष्टः साक्ष्यव्याकृतनामकः॥२६॥ एतच्छब्देन कार्यस्थः प्रत्यक्त्व उपदिश्यते॥ इहेत्यनेन स्त
म्बादिस्थाणुपर्यन्तविग्रहाः॥२७॥ उच्यन्ते तेषु जीवोऽयं विस्पष्टमुपलभ्यते॥ प्रविष्ट इतिवादेन चि
दाभासतमोन्वितः॥२८॥ जीवत्वेनोपलब्धिर्या भवितः सेवाभिधीयते॥ चिदाभासप्रवेशः स्वप्र
त्यक्षो ग्रहे स्वतो भवेत्॥२९॥ तत्कार्येऽनुप्रविष्टस्य स्वोपाधिस्थित्प्रवेशने॥ जपाकुसुमरक्तिस्फ
स्फटिके कल्प्यते यथा॥३०॥ चिदात्मा सप्रवेशोऽयं चित्याध्यारोप्यते तथा॥ तत्त्वादिस्थाणुपर्यन्तं जगत्स ६६
र्वात्म मायया॥३१॥ स्वांशो सेकस्वभावेन सन एव प्राविशत्परः॥ आनखाग्रेभ्य इत्यस्य मर्यादास्य

युष्मकावेनाभिमतान्ते अहं बुद्ध्यन्तावतः॥ अन्नप्राणादयः पञ्च तदेवं दशितेस्मृताः॥३८॥ आत्मन इ
ति अस्मत्यैकरूपेण विज्ञात्मन्नीत्यर्थः॥ आध्यात्मिकान्मयद्वाच्यान्प्रकृत्यर्थेषु हेतुषु॥ अन्नादिधा
त्मकृतेषु कारणव्यतिरेकतः॥३९॥ कार्यत्वेतिधियैकैके विलाप्य नादिमान्नतः॥ विज्ञाय्या नम
यादीन्स्मानन्त्वे च प्राणस्यतः॥४०॥ प्राणं मनस्त्वे न मनो विज्ञाना सतया तथा॥ मूलकारणरूपेण
विज्ञानं च निरूपयेत्॥४१॥ हेतुव्यतिरेकेण कार्यत्वेतिधिया विलाप्य त्यस्यैवार्थोऽन्नादिमात्रतः
स्माद्विज्ञायेति॥४२॥ इत्येवमुपसंहृत्य हेतुमात्रतया बुधः॥ कार्यात्मतां ततो ज्ञात ब्रह्मरूपेण सं
स्थितः॥४३॥ विलाप्य कारणात्मत्वं महावाक्यजबोधतः॥ कार्यादिशून्यं ब्रह्मैव स्वस्य रूपतया श्रुते॥
४४॥ प्राणो मनश्च विज्ञाने कोशत्रयमुदीरितं॥ सूत्रात्मरूपं मन्ने तु विराडेवाद इति स्मृतः॥४५॥ आनं
दो हेतुकोशः स्यादिति प्रकृतिसंग्रहः॥ यथानंदः स्वरूपं स्यादन्नादीनां तथैव वा॥४६॥ चतुर्णां प्रत्यथा
र्थिनामानंदमय उच्यते॥ जीवलिङ्गत्वतस्त्वैवक्तः स त्वब्रह्मन्यत इति॥४७॥ ब्रह्मोपदेशरूपं य
द्वर्णनं तत्पुरोदितं॥ मननं प्रक्रियारूपे तत्पुनः कथ्यते त्वथ॥४८॥ उपदेशानुतत्रार्थे यस्मात् दृश्यं तिसं
×४५ १×बहिर्मुखानां मननं स्याद्युक्त्यालोचनासह॥×१

स्यैवं नोपलभ्योऽनुपाधिकः ॥ जडदेहाद्युपाधौ तु विस्पष्टमुपलभ्यते ॥ दर्पणाभिहता दृष्टिः
परावृत्य स्वमाननं ॥४४॥ व्याप्नुवत्याभिमुख्येन व्यस्तं दर्शयते मुखं ॥ देहाद्युपहितेवं धीरा
त्मानं व्याप्नुवंत्यसौ ॥४५॥ अविक्रियं विक्रियाभिर्युक्त इत्यवगम्यते ॥ एकोप्यनेकधा भाति
रविः पात्रभेदतः ॥४६॥ एवं नानादेहभेदादात्मैकोप्यनेकधा ॥ दृष्टश्रोत्रादिरूपोयं यथा बु
द्धिविवर्जितः ॥ बुद्धितत्कारणोपाधौ सेत्रशेश्वरसंज्ञको ॥ जीवात्मीममहंगेधमिति योवेत्त्यवि
क्रियः ॥४८॥ स सर्वसाक्षी सर्वात्मा मुपलक्षणमर्हति ॥ अ…प्यात्रो स्थापिताज्ञानोऽविविक्तानुपश्येस्य
ते ॥४९॥ सर्वसाक्षी तथा धीस्थात्कर्तृभोक्त्रादिलक्षणात् ॥ प्रकाशात्मा यथा चंद्रः खाखाद्यादतथा विधात्
प्ताल्लक्ष्यस्तथा चिदात्मापि कारणोपाधितो जडात् ॥ जीववच्चांतिरेषैवं प्रत्यग्बोधोपयोगतः ॥५१॥ ज
लपात्रार्कसाम्येन प्रवेश इति कल्प्यते ॥ सुरपात्रास्य दृष्टांताद्विरोधेण प्रवेशनं ॥५२॥ इन्दुर्यथा ध ६
ति विस्पष्टमुपलभ्यत्वमात्मनः ॥ यदग्निकाष्ठदृष्टांतात्सामान्येन प्रवेशनं ॥५३॥ तदधिष्ठानतू

४ वेदा

रूपेण कार्यव्यापित्वमुच्यते ॥ अधिष्ठानारोप्यभावमंतरेण न कुत्रचित् ॥ व्याप्यव्यापकयोः कृत्स्ना
स्वरूपव्याप्तिरिष्यते ॥ अत्यंतभिन्नयोर्व्याप्तिर्न हि दृष्टा गवाश्वयोः ॥ नाप्यत्यंतमभिन्नस्य व्याप्यव्या
पकवर्जनात् ॥ अधिष्ठानारोपितयोरेव व्याप्तिर्वलादियं ॥५८॥ व्यापित्वमुपलभ्यत्वमिति द्वेधा
प्रवेशनं ॥ सिद्धं प्रविष्टे घेदोषास्ताभिराचक्ष्महेधुना ॥५९॥ संसारित्वाप्रविष्टानां परस्य तदभे
दतः ॥ संसारित्वे प्रसक्तेवे नकुधाघत्यपक्रूते ॥६०॥ उपाधिजनितो यायं चिदात्मा सोऽवभा
सते ॥ दुःखाद्यनुभवस्तत्र सावकाशो भविष्यति ॥६१॥ दुःखी यदि भवेदात्मा कः साक्षी दुःखिनो भ
वेत् ॥ दुःखिनः साक्षिता नेव साक्षिणो दुःखिता तथा ॥६२॥ नर्ते स्याद्विक्रियां दुःखी साक्षिता का विकारि
णः ॥ धीविक्रिया सहस्राणां साक्ष्यतोहमविक्रियः ॥६३॥ शरीरेंद्रियसंघातआत्मत्वेनाभिमानिनी ॥
चिदाभासयुतो बुद्धिविशिष्टं तिसुखादयः ॥६४॥ उदासीनो यथा परस्पंदे डिनेकलहायते ॥ सुख
दुःखादिमद्बुद्धिं साक्षी तद्वदसंगतः ॥६५॥ एवं सति पराच्येव दुःखं प्रत्यक्त्विष्यते ॥ प्रतीच्यात्मनि
वेदोयमक्षादीनि निषेधति ॥ नौ नास्ति काये महद्दुःखं पादे गुच्छाग्र इत्यपि ॥ देहावयवगं दृष्टंदुःख
९ अविज्ञाताऽस्मरे केन विजानीयादिति श्रुतिः ॥ विदिताविदिताभ्यां तदन्यदेवेति च श्रुतिः ॥ अहं दुःखीति विज्ञा
नमात्मसत्ताये कर्मकं ॥ आत्मन्यारोप्यते भ्रांतैर्विद्वद्भिश्चोपचर्यते ॥६७

मात्मनि तत्कथं ॥६५॥ प्रतीचि चेद्भवेद्दुःखं व्याप्नुयाद्बोधवद्वपुः ॥ विद्वद्दृष्टस्वरूपत्वात्प्रतिकूलं
च नो रुचेत ॥६६॥ आत्मनस्त्वेव कामाय सर्वं प्रियमिति श्रुतेः ॥ सुखमात्मैकविषयमिति चेन्न
युज्यते ॥६७॥ यत्र वा अन्यश्रुतिः स्यात्तत्रान्योन्यत्वमसिध्यति ॥ इति भ्रांतात्मविषयं श्रुतं द्वैतं सु
खादिकं ॥६८॥ यत्रवान्यदिवस्यादिस्यादिश्रुतुकमित्यर्थः ॥ यत्र त्वास्मैव सर्वं स्यात्तत्र केन कं पश्य
ति ॥६९॥ इति बुद्धात्मनि द्वैते सुखदुःखादिवारितं ॥ तुल्यं न शोचते पापान्यया स्थित्यनुभूयते ॥
७०॥ प्रत्यक्त्ववणाद्दृष्ट्या संसारः कोऽपि नात्मनि ॥ अदुःखित्वे परस्येष्टे तदन्यस्याप्यभाव
तः ॥ कस्य दुःखनिवृत्त्यर्थमारब्धोपनिषत्त्वया ॥७१॥ प्रत्यगज्ञानहेतूत्थदुःखित्वादिभ्रमोत्रयः
॥ तद्ध्वंसमात्रसिध्यर्थमारब्धोपनिषन्मया ॥७२॥ इति वार्त्तिककारस्थाः श्लोकाः संगत्य दर्शि
ताः ॥ अस्य देहे प्रवेशाय प्राणोपाधिस्तु साधनं ॥७३॥ आत्मा वायुमिवात्मानं कृत्वाप्यंतरमाविश
त् ॥ इति मैत्र्योपनिषदि प्राणवायोस्तथा श्रुतेः ॥७४॥ स वायुमिवात्मानं कृत्वाप्यंतरं प्राविशदिति ६८

२न४

प्रवेशने ॥ उक्तास्य शेर्नित्यैतन्ये नस्वाप्या बधि लक्ष्यते ॥ सामान्येन विशेषाच्च चिद्देहं व्याप्य वर्त्तते ॥३३॥
दृष्टांताभ्यां द्वयी हति द्विविधा व्याप्तिरिहोच्यते ॥ दारु कृत्स्नमभिव्याप्य यथाग्निर्दारुणि स्थितः ॥३४॥ संव्या
प्य तद्वदखिलं देहमात्मा व्यवस्थितः ॥ तस्थाव सुव्याप्य यथा क्षुरपात्रे क्षुरस्तथा ॥३५॥ श्वासादिनाडीम
ध्यस्थस्तनुमव्याप्य संस्थितः ॥ क्षुरपात्रे स्थितो नेदाहि लिंद्यंते यथा क्षुराः ॥३६॥ नैतन्यानि विलिंद्यते
तथा नाडी विलेदतः ॥ प्राणोनिरुद्वजीवो स्वप्नजाग्रदस्थयोः ॥३७॥ सामान्यवृत्तिमेवैकां सुषुप्तो प्रति
पद्यते ॥ सामान्यवृत्तियोगात्रु जीवनायोपयुज्यते ॥३८॥ विशेषवृत्तयो देहे शब्दाद्यालोचनोद्य
ता ॥ ॥ अप्रविष्टस्य भावो यं दिग्देशाद्यनतिप्लुते ॥३९॥ कल्पितोस्य प्रवेशः स्याज्जलपात्रार्कविंबव
त् ॥ ननु चिद्देहयोर्योगो विभागश्च न हीति चेन्न ॥४०॥ विभागाद्यंशवैषम्येप्यस्ति साम्यं विवक्षितं ॥ उ
पाधावुपलभ्यत्वमन्यथात्वे न भासने ॥४१॥ बेज्ञवभानमित्यत दृष्टदार्ष्टतयोस्समं ॥ तेजोधि
करवे विंबमशक्यं दृष्टुमंजसा ॥४२॥ तथापि जलमध्ये तद्बिंबं सम्यगवेक्ष्यते ॥ स्वयंप्रकाशआ

वागाद्यामुखरं श्रादिगोलकस्थानसंस्थिताः ॥८३॥ प्राणाधारकता सेन्द्रजीवत्वोपाधिकात्मनः ॥
प्रवेशोऽनेनजीवेनेत्यादिश्रुत्या समीरितः ॥८४॥ सर्वप्रवेशबाध्यानोपर्यालोचनतस्ततः ॥ जीव
त्वेन प्रवेशः स्यात्परात्मन इति स्थितं ॥८५॥ अनुप्रविश्य तत्सृष्टदेहजातं परेश्वरः ॥ भोक्तृजीव
स्वरूपेण नेतरं नोग्यरूपतः ॥८६॥ अनृत्यरिणतस्तत्र त्रसखत्वयात्रेति शब्दतः ॥ वत्यत्वं यत्परो
क्षं तत्सर्वमिवोपपद्यते ॥८७॥ वकारद्वयतत्सत्र तदभावो समुस्थितो ॥ अनृत्यरिणतं ब्रह्मनक्ष
लुप्यरूपतः ॥८८॥ पृथुबुध्नोदराकारः स्थूलः कार्यक्षमो घटः ॥ पुरोवर्तीति निर्देशं वक्तुं शक्य
तया भवेत् ॥८९॥ निरुक्तमनिरुक्तं तु तद्विलक्षणमुच्यते ॥ केतकीचंपकादीनां गंधभेदं न कथ्य
न ॥९०॥ तत्तन्माधुर्यभेदं वा निःशेषं वदितुं क्षमः ॥ किंतु सामान्यरूपेण वक्तारावपि पूर्ववत् ॥
आधारो गुडपुष्पादिस्तित्सांनिलयनं स्थितं ॥ तं पां माधुर्यगंधादीनामित्यर्थः ॥ अथानिलनं ×य ९९
गंधरसाद्याधेयमुच्यते ॥ विज्ञानं चेतनं प्रोक्तमविज्ञानमचेतनं ॥९२॥ व्यावहारिकमेवात्र स

×अन्यथाभावएवात्र परिणामोविवक्षितः ॥ न धर्मिसमसत्ताकः स च तत्स्य निवारणात् ॥ कोऽपि हि वेदांतवाद
स्य विवर्तवाद इति ॥ २५

×सर्वसाधारणादित्यर्थः ॥×
५×ब्रह्मणः सर्वहेतुत्वे वैषम्यमिति चेन्मतं ॥ तन्नोक्तं मीनुसारेण सुखदुःखादिकल्पनतः ॥ न चास्वतंत्रताऽक्यात् कर्मापेक्षावकार
णात् ॥ स्यात्तद्रक्षार्थकोनाम व्यवस्था निवारणात् ॥ कर्मापेक्षत्वमुक्तं स्यान्मायिकास्तास्त्वनादयः ॥ वैषम्यजनकत्वेपि कर्मणां
वस्तकशक्तितः ॥ नव्यवस्थापकस्य स्याद्वैषम्यं परमात्मनः ॥ किं चेश्वरस्य न वैषम्यं दृष्टिवत् सर्वसाम्यतः ॥ सस्यादिवृद्धिहेतुत्वं
दृष्टव्यं यथा प्यथापि वा यवव्रीह्यादिबीजवैषम्य बीजानां स्वात्रिमित्तता यथायथं प्रवर्तंता जीवा इत्यस्युत्त था ॥ समप्रवर्त्तकत्वेपि वैषम्यं न परात्मनः ॥ कर्म

त्वमन्यत्तु वक्ष्यते ॥९३॥ अनंतमगतरक्षादिप्रातिभासिकमुच्यते ॥ ब्रह्मसत्यपदेनोक्तमनंतोप
रिवर्जितः ॥९४॥ ऋतरयमपि प्रायो ब्रह्मसद्रूपमुच्यते ॥ भोग्यात्मनान्यथा भावः क्षीरादिकव
दित्ययं ॥९५॥ अस्तित्वासत्त्वबाधोक्तौ निरस्तोक्तोनुमानतः ॥ शून्येयोक्तासत्वमस्याहस्तनामनुत्र
वादपि ॥९६॥ यदिदं किंच तत्सत्यं ब्रह्मेत्याचक्षते बुधाः ॥ अतोनुभवसिद्धस्य तस्यासत्त्वेन यु
ज्यते ॥९७॥ तस्मान्नैवास्य वैषम्यं सर्वकर्तुर्न विद्यते ॥ अथोक्तं ब्रह्मसत्वस्य साधको मंत्र उच्यते ॥
॥९८॥ इदं धियेदं शब्देन गम्यं सप्तुनि पञ्जगत् ॥ असत्त्वाकेदम्भ्रब्रह्मनामरूपविवर्जितं ॥
९९॥ नामरूपात्मकं सर्वमज्ञानात्मत्वातोह्यसत् ॥ यत्सदेकं परं ब्रह्म ततोवै सदजायत ॥१००॥
नत्यदोक्तं परं ब्रह्म स्वयं कर्तेरविना ॥ आत्मानं सच्चिदानंदं कृतवज्जगदाकृति ॥१०१॥ उपादा
नं निमित्तं वा ब्रह्मणोन्यन्नहि किंचन ॥ ब्रह्मैवोभयरूपं स्यात्तस्मात्सुकृतमुच्यते ॥१०२॥ सुकृतः स्व
यमर्थः स्यात्कर्तृस्यात्कृतशब्दिते ॥ स्वयं कर्तृपरं ब्रह्मेत्येवं विद्वद्भिरुच्यते ॥१०३॥ स्वयंकर्त्तृप्रसि
त्मनः ॥ कर्मणावासनानीचवैषम्यं जनकत्वतः ॥ —— नकर्मान्तरहेतुत्वं कर्मणामिति चेन्मतं ॥ स्वफलस्यप्र
दानाय जीवं व्यापारयत्तथा ॥ अर्थात्कर्मान्तरं कर्म जनयेत्फलदोप्यपि ॥ वासनानां तु साहेतु कर्महेतुत्वमुच्यते ॥
स्वार्थत्वा ॥×५

द्विष्ठ ब्रह्मलोकस्थित्वस्याधिका ॥ यद्वैतत्सुकृतं ब्रह्म रसो वै स इतीर्यते ॥ १०४ ॥ वाक्यजन्यमनोवृ
त्त्यास्वाद्यत्वाद्रसतोच्यते ॥ ब्रह्मजिज्ञासुभिः प्रीत्यायाच्यतां सा सुखं विना ॥ ५ ॥ नेच्छतो रसत्वाद्
न सुखरूपत्वमुच्यते ॥ धन्योऽहमस्मीत्यानंदाभासात्कृत्यरसं नवेद ॥ ६ ॥ विद्वत्तोनोपहेतुःस्या
दात्मलाभो न च तरः ॥ नह्येवानंदरूपत्वादपि सर्वं परात्मनः ॥ ७ ॥ विद्वत्सु सिद्धिरूपत्वास्याद्
संहीतिहिश्रुतः ॥ आकाश एष आनंदः परमात्मा न चेद्यदि ॥ ८ ॥ अन्याद्वेष्टन वा गाढे देहान्तः
कोहिमानवः ॥ अन्यादिजक्रियाकर्त्री स्यादात्मा क्षतिश्चासनात् ॥ ९ ॥ एष हि द्रष्टा श्रोता दिष्कृ
तु कृत्वादित्यर्थः ॥ प्राणेन कः कुर्यात् स कर्मं न चेदयं ॥ १० ॥ आत्माभ्यास क्रियाकर्ता प्राण
स्तत्करणान्न वेत्ता ॥ यः प्राणेन प्राणितीति बृहदारण्यकश्रुतेः ॥ ११ ॥ अन्यादि चेष्टाकर्तृत्वं विज्ञान
मययोगिनः ॥ न तूपाधिविहीनस्यासंगस्य तदभावतः ॥ १२ ॥ सप्तमं तं पदं वा स्यादाकाशइति
संस्कृतं ॥ निर्दिष्टहृदयाकाशे साक्षी प्रत्यङ् चेदिति ॥ १३ ॥ आनंदाभेषएवान्यान्यरितोभयतिस्व ७०

श्रुतेरित्यर्थः ॥ लिंगदेहस्य मध्यस्थत्वस्य स्थूलदेहे प्रवेशने ॥ उपाधिःस्यात्तथाप्यस्य प्राधान्यादे
वमीरितं ॥ पादाग्रयोः प्रविश्याधर्मारूढयोः परिसंस्थयोः ॥ ऊर्ध्वं कुक्षावुरोमूर्ध्नि लिंगदे
हः प्रतिष्ठितः ॥ ७८ ॥ श्रुतौ तत्प्रपदाभ्यामित्यादिना कथितत्वतः ॥ तं प्रपदाभ्यां प्रापद्यत ब्रह्मे
मं पुरुषमित्यादिवाक्येनेत्यर्थः ॥ सुषुम्नाग्रात्मकं द्वारं भित्वा मूर्धन्यवस्थितं ॥ अंतर्विवेश
तेनासौ द्वारेणेत्यपि संश्रुतः ॥ ७९ ॥ स एतमेव सीमानं विदार्येत्यैतरेयके ॥ विरोधो वाक्ययो
स्तत्र संज्ञा भवेदिति चेन्न तत ॥ ८० ॥ शंकते ॥ पादाग्रयोरित्यादिना ॥ तयोर्विषयभेदेन व्यवस्थास
मवस्थितेः ॥ ब्रह्मापि यजिकेका याह्यन्तिर्याचेतनसो भवेत् ॥ ८१ ॥ तस्यास्समाधिसंज्ञायां सुषुम्ना
यां हि संभवात् ॥ नत्तूपाधेस्तत्तत्र प्रवेश उपपद्यते ॥ ८० ॥ इदमेवाभिसंधाय हृत्तुरिकोपनिषद्य
पि ॥ सुषुम्नानु परे लीना विरजेत्यादि पठ्यते ॥ ८३ ॥ लौकिकव्यवहारस्य हेतोर्लिंगस्य तूच्यते ॥
प्रपदाभ्यां प्रवेशोयमिति तत्र व्यवस्थितिः ॥ ८२ ॥ प्रपदाभ्यां प्रविष्टस्य लिंगस्यावयवाः स्मृताः ॥

नै० सं०

नि:शेषेणानवाच्यं स्याद्यतो वाच इति श्रुतेः ॥७॥ अन्यत्वेनानुमानेन नाक्षत्वाच्चागम्यतोदिता ॥ लक्ष्य
रूपं च निर्वर्त्य सिद्धमेनावतात्मनः ॥८॥ अज्ञानादन्यतासिद्धौ चतुर्थं स्याद्विशेषणं ॥ आधारर
हितत्वेन ब्रह्माऽनिलयनं स्मृतं ॥९॥ अथावशिष्टसंदेहं निराचष्टे गुरूत्तमः ॥ यदेव लौकि
को मर्त्य एतस्मिन्नत्यगात्सति ॥१॥ पश्यत्वस्यामपि सिद्धांतदेवत्र्यवनीनिवेत ॥ उक्तदोष्यर्थ
कोत्रस्यादल्पाधिकमरं पदे ॥२॥ नेदस्यावास्तवत्वार्थं नवेदत्यमपीति गीः ॥ हिशब्दस्फीप्रसिद्धे
वाक्छ्रीप्राह्नेनेददर्शिनः ॥३॥ अन्योस्तमहत्कमित्यादिश्रुतौ तत्साधितवत ॥ वेन्नियः कर्म को
अर्थस्य गुणं आत्मवानरः ॥ विद्यावलेन तस्या विमुक्तिः स्यादतउच्यते ॥१॥ तत्वेव नयमित्यादि तुत्रा
दक्षो घनाशक ॥ अमत्यानस्य विदुषो ब्रह्मतत्वमजानतः ॥२॥ तदेवत्रयमित्यर्थो नेददर्शि विकार
एतत ॥ निर्विशेषकथं ज्ञेयमिति निवद्यनिधीयते ॥३॥ वेद्यादिजितयादेनमवेद्यादित्रयादपि ॥ आ
विद्यकात्पृथक्कृत्वा भिन्नादात्मानमुत्तमः ॥४॥ अहं ब्रह्मेति जानीयात्तत्वमित्यादिवाक्यतः ७१
ज्ञानेजडेषु वेद्यत्वे ज्ञानात्स्वमवेद्यता ॥५॥ एवं वेद्येषु वेद्यत्वे स्वाभासमनसो नवेत ॥ नास्ति नो वे

द्यतादिस्यात्स्फूटस्ताद्वयदृष्टितः ॥ तस्माद्ब्रह्माहमित्येव वेद्यादिकविवेकतः ॥ ज्ञानिनो मुक्तिरन्यस्य
नयं ब्रह्मैव सर्वदा ॥७॥ इत्येवं ज्ञानिनद्वय्यं नय ॥ नाहं वेत्ता नापि वेद्यो न विद्या नावेत्ता वा नाप्य विद्यो
प्य विद्या ॥ मायाकार्याशेषदृश्यपार्थक्यो ब्रह्मैवाहं सच्चिदानंदरूपः ॥८॥ विद्यात्रयस्युतस्यापि ब्रह्मस
तत्वमजानतः ॥९॥ त्रयमित्यत्र [illegible] वाम्मादिति श्लोक उदीर्यते ॥ एवं जन्मान्यनुष्ठायथ श्रेष्ठज्ञान
कर्मणः ॥ वायुदेवतयोत्पन्नः स्वप्नपामिनरूपिणः ॥१०॥ अग्नेरच्युतस्यापि ब्रह्मतत्वमजानतः ॥
त्रयमित्यत्र [illegible] स्मादिति श्लोक उदीर्यते ॥११॥ एवं जन्मान्यनुष्ठायथ श्रेष्ठज्ञानकर्मणः ॥ नृमुरुत्व
नयोत्पन्नः सोप्यनर्थानिरूपितः ॥१२॥ ब्रह्मणो नीतितो नित्यं चलत्वालस्यवर्जितः ॥ एवं सूर्यादिके
याज्यमग्निश्चेदश्वतानुजो ॥१३॥ स्वस्वव्यापारमेतस्माद्भयेन कुरुतः सदा ॥ मृत्युः लीलायुधाहन्तुं त
त्रतत्र प्रधावति ॥१४॥ नासंगनिर्गुणस्यास्य भीहेतुत्वं तथापि च ॥ अन्तर्यामिस्वरूपेण मायिनोस्य
तएव हि ॥१५॥ नियम्य कार्यमापेस्य नियंतेष नमो नमः [illegible] ॥ इति वार्त्तिककृत्प्राह योवायुर्भिर्वाक्य
रति १

४४ पद्माधिकारत्वेन तेषां नीत्युपपत्तितः॥ साक्षात्कारोऽस्ति मुक्तिस्तु कर्मान्ते संभविष्यति॥ तेषां नीः किं मुतां न्येषा मितिनावो स्यैव स्मृतः॥ अस्य लोष त्यादि श्लोकस्य। तेषां वानादीनामित्यर्थः॥ ननु तत्त्वोन्नतां तेषा मपि वक्तुं न शक्यते॥ अधि कारवतां वास्ति तत्त्वधीरिति वक्ष्यते॥ ४५

ति॥१६॥ एतस्यैवाक्षरस्य प्रशासने इति श्रुतिः॥ यइति॥ योवायुमन्तरो यमयती त्यादिकाचेत्यर्थः इंद्रादेरूपदेशस्थले ब्रह्मविद्या न चेत्कथं॥ न त्वैदज्ञानमात्रेणसं न वेदितिमन्यतां॥ ब्रह्मस्तुतप्र तिबंधेहि ब्रह्मसाक्षात्कृतिर्नहि॥ प्रातर्दनन्यादिश्च कुर्वेद्र स्ला घनायदि॥ वंके हि जानी हमामित्यपदेशा एवस्याशास्त्रदृष्ट्या सुरनायकस्य॥ ब्रह्माहमस्मीति शास्त्रदृष्ट्या पत्रपति देव्राहयथामुनी वामदेव्यादिना न्यायरत्नो वल्या मिति दिकू॥ यदुक्तं सोऽश्नुते सर्वान्कामानित्यादिश्रु तो॥ यदध्यानंदरूपत्वं रसो वै स इतीरितं॥ निर्वेतुं तद्वयं सेव्यानंदस्येति विचार्यते॥ श्रुत्यनंतरप्रसि द्धचं तच्छेदेन प्रस्तूयते॥२०॥ सयइत्यादिना तस्य विचारो हि प्रपंचितः॥ एतच्छेदेन चाजैवस्य मा णत्वमुच्यते॥२१॥ सयइति॥ सयो मनुष्याणां राद्धः समृद्ध इत्यादिने त्यर्थः॥ देहेन्द्रियादि पटुता यस्यासौ राद्ध उच्यते॥ विद्यादिगुणसंपन्नः समृद्धः स्तो हि तौ मतः॥२२॥ लौकिकानंदवक्ष्यं विषये न्द्रिययोगजः॥ स्वा लौकिको वत्यत्रेषे मीमांसा संप्रवर्तते॥२३॥ तत्रस्वालौकिकानंदनिश्चेतुद्वार ४२

७२

रव्दि ४

ये॥ अन्नीणविषये लब्धे न तत्रापि परित्यज्य मनो न्यविषये छातः॥ सर्वमन्तर्मुखं सुखं॥ प्र त्यक्षं स्वादयत्सोयं विषयानंद उच्यते॥१५॥ मनोन्तर्मुखं सत्त्वाद येदित्यन्वयः॥ हि विवेक प्र सिद्ध्यर्थं स्तस्माद्ब्रह्मास्ति शाश्वतं॥ विषयानंदहेतुत्वा चेष्टाहेतुत्वतोपिवा॥१६॥ ॥ वस्तु वत्यसक्षावारविद्विषयस्य तु॥ विद्वद्विषय संदेहो यद्वाहीति निवार्यते॥ ॥१॥ इति॥ इत्यादि वाक्येनेत्यर्थः॥ अन्यं देतरहितं यथा भवति न तथा एष जिज्ञासुरे तस्मिं स्वात्मधी स्थिरतां यदा॥२॥ लभते च तदा विद्वान ञ्यं मोक्षमश्नुते॥ स्वात्मबुद्धिस्थिरत्वं व्याप्ति दर्पणपदकीर्तितं॥ १॥ एवस्यादविलंबार्थ स्तदेवप्राप्नुयादिति॥ विद्वत्त्वसिद्धिं तु कार्थे हि शब्देन प्रदर्शितं॥ अद्द रूपाद्येषु तु निस्कं परं ब्रह्म विशेष्यते॥ चक्षुरादीन्द्रियागम्यमद्रूपं परिकीर्तितं॥ अनात्म्यं लिंगर हितमगम्यमनुमानतः॥ जीवसंबंधि लिंगं हि शरीरत्रयमुच्यते॥६॥ न किंचिद्विद्यते लिंगमद्व यब्रह्मसाधकं॥ निर्विकल्पमनन्तं च हेतुदृष्टान्तवर्जितं॥७॥ श्रुतिं प्रमाणयति निर्विकल्पमिति॥

लं नवेतं ॥ आरोहणोकः द्वाभ्यां देशं दक्षमर्लन्तवेदिति ॥ तद्धारयितु मत्रो केऽबलिष्ठेति बलीस्मृतः
॥ ३९ ॥ द्रढो वा क्रत्यसंपत्ति र्नोग्यसंपत्तिनुच्यते ॥ समुद्रवेष्टिता या भूः पृथ्वी वित्तेन सा खिला ॥
वित्तस्येति श्रुतौ षष्ठी ततोयार्थसमीरिता ॥ पूरिता भोग्यजातेन तदेतदुपलक्षणं ॥ ४० ॥ अन्या
धिपतिरित्यादेः कथितस्यापरश्रुतौ ॥ अन्यंतरो क्रस्यान्येषामधिपतिरित्यादेरूपलक्षणमित्य
र्थः ॥ सार्वभौमस्य कस्यापि स्यादिदं सकलं यदि ॥ तदायं मानुषानंदो नेतरो दुःखयोगतः ॥ ४१ ॥
न हि हिस्यार्वभौमान्यस्त्यस्मि मानुषपलभ्यते ॥ आनंदो नाम तृप्तिः स्यात्तस्या स्यात्त विरोधिनी ॥
॥ अलब्धविषये सा स्यात्सार्वभौमस्य नास्ति सा ॥ समस्तविषयावाप्तेर्विरोधिविरहे सति ॥
निर्विघ्नार्थमिरेतस्य व्यज्यते पृथिवीपतेः ॥ यावद्यावत्समुत्कृष्टमभिलाषनिवर्तनं ॥ ४२ ॥ ता
वत्तावत्समुत्कृष्टः स्यादानंदो यथोदितः ॥ इदमेवाभिसंधाय पूर्वेणिंदनो धिकः ॥ ४३ ॥ आनंद ७२
उच्यते ते ये शतमित्यादिवाक्यतः ॥ ये स्वन्निशतसंख्याकास्ते समूहेनवेदयं ॥ ४४ ॥ नरगंधर्व

× क्रा १

संज्ञानामेकदृत्यर्थ इति ॥ एतेषु सार्वभौमेषु यावती तृप्तिरिष्यते ॥ ४५ ॥ नरगंधर्वस्य चैकस्य तृप्ति
रस्य तावती ॥ एतेषु शतसंख्याकेष्वित्यर्थः ॥ आनंदप्रतिघातस्य घ सत्क्रस्यापि नाशने ॥ अस्ति
साधनसंपत्तिस्तत्र क्षिप्तप्रसादतः ॥ ४६ ॥ तेषां सुखविशेषस्य व्यक्तिस्तमुपपद्यते ॥ शतत्वं का
नयास्मात्सिद्धा वर्जोमसुखस्य हि ॥ ४७ ॥ नतत्र श्रोत्रियोक्तिः स्यान्नरगंधर्वसुखस्य तु ॥ अप्रसिद्धता
यातस्य प्रसिद्धिमिह कीर्तितुं ॥ ४८ ॥ श्रोत्रियोदाहृति र्वेयास्त्रवेदार्थपारगः ॥ इह हेति ॥ मनुष्य
लोके दर्शयितुं सचेति ॥ श्रोत्रियो वेदशास्त्रपारंगत इत्यर्थः ॥ न च सर्वेषु लोकेषु स्थितस्य वि
षयस्य हि ॥ अनित्यत्वादिदोषौघं ज्ञात्वा तेनानुगतेन च ॥ निश्चित्य तत्र निष्काम … वत्येवं तथास
ति ॥ नरगंधर्वलोकस्थ विषयब्रजभोगिनः ॥ ५० ॥ यावत्सुखं स्यात्तावच्च श्रोत्रियस्याप्यकामिनः
कामाहत न खमे तस्य दोषदर्शित या दृढं ॥ ५१ ॥ तल्लोकाद्गस्य भूतस्यवर्नमानंजसंप्रति ॥ चोप्यं नरगं
धर्वस्तिन्नत्ता … ॥ नत्र कामहतस्याद्धि श्रोत्रियस्येति चेन्न तत ॥ हर्षस्य
रऽर्थः ॥ कालांतरेसुखास्त्रेण तदस्ति शत्स्यनत्रपति ॥ कामाहतत्वं न ह्येक भोगेच्छाया समुद्भवे ॥ ५२

स्य तु गंधर्वाप्सरोगणसेवितमेतस्मिन्निति श्रुत्युक्त तद्भोक्तृवासिन इत्यर्थः ॥

स्तिकत्वेन मुख्यानंदत्वहानतः ॥ विषयानंदच्छायानिष्टत्वौ यानुगच्छति ॥ रम्ये स्ये व सुखे
मुख्ये तु शास्त्रस्य विनियोजनः ॥५४॥ सर्वत्रापि विरक्तत्वात्तथा च स्मर्यते बुधैः ॥ यच्च काम सुखं लो
के यच्च दिव्यं महत्सुखं ॥ तृष्णाक्षय सुखस्यैते नार्हतः षोडशीं कलामिति ॥ आनंदस्तत्र मनुष्य
न्गंधर्वसमोद्भवेत् ॥ श्रोत्रियस्याप्यकामस्य त्वेव मग्रेपि मन्यतां ॥५५॥ पर्यायेषु समस्तेषु तृप्ति
रूप सुखस्य च ॥ चित्तप्रसादवृद्ध्यैव विविच्यतां तत्रायोत्र वेत् ॥५६॥ अंतर्मिस्त्वर्त्य लोकस्था न्गंध
र्वाः प्रकीर्तिताः ॥ त्रिदिवे देवगंधर्वास्स्वर्गे देवसमुद्भवाः ॥५७॥ चिरकालस्थायिलोक चिरलो
कः प्रकीर्तितः ॥ ये तु माल्येकयुंतीति ते तथा क्ताः प्रकीर्तिताः ॥५८॥ पितृलोको धर्त्रावीस्याल्कश्चिद
जानसंज्ञकः ॥ देवलोकविशेषोयः तज्जा आजानजाः स्मृताः ॥५९॥ आजानदेवजोगाश्च संप्राप्तुं तो
गमुत्तमं ॥ ये हुत्वा वैदिकं कर्म प्राप्नुवंति वदेवताः ॥६०॥ ते कर्मदेवादेवास्तु त्रयस्त्रिंशाद्द विद्धि
जः ॥ वसवो ष्टौ तथा रुद्रा एकादश तथा परे ॥६१॥ आदित्या द्वादश इंद्र प्रजापतिरिति श्रुताः
त्रैलोक्यदेहस्थाश्चास्याधिराडिंद्रप्रजापतिः ॥६२॥ ब्रह्माधिराडयं गर्भः स्याद्धि तेन प्रथमसम्भि

५८

ल सत्ताः ॥ आनंदाः कथितास्तेषां द्वारत्वेकथमुच्यते ॥२४॥ ब्रह्मानंदस्य लेशत्वात्तथा वेदं प्रयुज्य
ते ॥ गणितानंदलेशाये तत्रागतिर्न सर्विकाः ॥२५॥ व्याघ्र त्रिपूर्वकावास्फलत्वेश लेन हेतुना ॥ हि
माचलो घृतानेक हेमलेशा यथा तथा ॥२६॥ परिच्छिन्नोपरिच्छिन्ने पर्यवस्यति कर्मजः ॥ तारतम्ये
न गम्यत्वात्परिमाणवदित्यपि ॥२७॥ विषयस्तु गुणज्ञानानंदानंदोन दोषवे ॥ वार्द्धके विषयानंदो
नास्तिनो कुमारकितः ॥ यूनएवात्रयोग्यत्वाद्युवास्याविति कीर्तितः ॥ पंचविंशाद्विकोयः स्यात्स
युवेति हि वार्त्तिके ॥२९॥ यौवने पि कुरूप वे क्रोधादे दुःखसंभवात् ॥ तन्नावाय निर्दिष्टः क्रतो
साधुयुवेत्ययं ॥३०॥ चतुःषष्टिकलाविद्यास्वेकस्या अप्यसंभवे ॥ दुःखं स्यात्तन्निवृत्यर्थं माध्या
यक इतीरितं ॥३१॥ विद्यावतोपि कार्येषु प्रवृत्तेर्मोघसंभवे ॥ लोजनेन्द्रस्य भावे वा वल्किमाथा दि
ना सुखं ॥३२॥ नास्तीति तन्निवृत्यर्थं माशिष्ठ इति कीर्तितं ॥ भवत्याश्रुतमः शीघ्रं स सर्वकार्यप्रवृ
त्तिमान् ॥३३॥ यद्वा सर्वेषु भोज्येषु रुचिवाकुल्य योगतः ॥ आधिक्येनाश्रिता प्रोक्तस्तादृशास्यापि
चेतसि ॥३४॥ दृढोपि नावर्हि पुष्पदोमीतिः स्यात्तन्निवृत्तये ॥ दृढिष्ठ इति धैर्येण युक्तस्यापि

१ ×श्रुतौ पुरुषशब्देन जुगुप्सुर्नर उच्यते ॥७१

श्यति ॥ जुगुप्सो पुरुषे कश्चिदानंदो विद्यते खलु ॥७२॥ स इत्यनेन न तत्सत्वे प्रसिद्धियोग्यता कीर्तिता ॥ आत्म
नश्चेदिति वाक्येन तस्य सिद्धिः प्रपंचिता ॥ आत्मनस्तु कामायेत्यादिवाक्येनेत्यर्थः ॥ आत्मशेषतया
प्रीतेर्विषयत्वे खिलस्य हि ॥ आत्मनः परमप्रीतिगोचरत्वात्सुखात्मना ॥७४॥ उपपादितेति शेषः ॥
अनुभूतिप्रसिद्धत्वमप्यं शाब्देन दर्शितं ॥ भूयासं सर्वदैवाहं मास्त्वसत्त्वं कदापि मे ॥ इत्यात्मानं
दरूपत्वे सर्वैरप्यनुभूयते ॥ प्राण्यन्तरगतानंदश्चकारेण समुच्चितः ॥७६॥ तेनाध्यात्मिक आनं
दोयं शश्वत्स्यादाधिभौतिकः ॥ आनंदः स समस्तोपि संगृहीतोत्र वेदितः ॥७७॥ अस्माल्लोकादमुं लो
कमित्यादौ प्रायशः श्रुतौ ॥ अदःशब्दः परोक्षार्थः प्रत्यक्षार्थमिदं पदं ॥ अतोसाविति शब्देन
परोक्षं स्थूलदेहगे ॥ सुखमुक्तं चकारेण देवान्तरसुखग्रहः ॥७८॥ ततः समस्तोप्यानंदो गृही
तो ह्याधिदैविकः ॥ अध्यात्ममधिभूतं चाप्यधिदैवमुपाधिषु ॥८०॥ सर्वेषु योयमानंदः स सर्वो ७५
प्येक उच्यते ॥ अन्यत्राप्युक्तं ॥ आनंदोस्मिन्युक्तिश्चास्ति मत्येश्चेत्याप्रेयानुक्रम आसान्यतो हि ॥

×सि१

भूयासं मे मास्त्वसत्वं कदापीत्यानंदत्वे सर्वसिद्धप्रतीचः ॥ तस्माद्वाक्ये सोयमित्येवमुक्ते तज्ज्ञानी
यानंदलाभार्थक स्यः ॥ तेनाध्यात्मं चाधिभूतं च सर्वोप्यानंदः स्यात्संगृहीतोत्र वाक्ये ॥ असावि
ति श्रौतगिरा परोक्ष आनंद आदित्यचारी रसस्थः ॥ देवान्तरानंदसमुच्चयार्थश्चकार उक्तो भवती
ति बोध्यं ॥ सर्वेषु चोपाधिषु यस्त्रिधास्ति स्वरूपतः सोखिल एक एव ॥ सोत्रादिके यत्सुखवार्द्धि
बिंदुस्सत्क्षिप्तदेके सुखमेव बोध्यं ॥ चेलक्षितस्यापहतिर्मताद्येतत्स्वाहितार्थस्य भवेद्द्वितीये ॥ त
देव मंत्ये तु महागिरः स्यात्तत्त्वे पदार्थाः स्फुटतेजुना तु इत्यादि ॥ अखंडैकरसानंदस्त्वेष जोस्यति श्रुतौ
श्रुतः ॥ एतस्यैवेति वाक्येन नदीयोभेद ईरितः ॥ उपजीवंति भूतानि मात्रामस्येति हि श्रुतिः ॥ हि
रण्यगर्भाद्यानंदा बिंदवोयत्सुखांबुधेः ॥८२॥ स एकः परमानंदो बोध्योयं तु मुमुक्षुभिः ॥ मीमांसा
निर्णयस्त्वेवं सिद्धोथ फलमुच्यते ॥८३॥ स य एवं विदित्युक्त्यानंदज्ञानस्य संप्रति ॥ उक्त्या ॥ श्रुत्ये
त्यर्थः ॥ मायावशाज्जगत्सृष्ट्वा गुहायां कोशपंचके ॥ प्रविष्ट इव तत्रातो निरुपाधिकरूपतः ॥८४॥ सा

दाकुरता योग्यं सत्य एवजुद्भाव तिष्ठते॥ अखंडानंदरूपं च तदित्येवं विजानतः॥८५॥ परमानंद
संप्राप्तो क्रमोयमभिधीयते॥ अंतः अभ्यंतर इत्यर्थः॥ आत्मादिदेहपर्यंतो हंवनीत्यवभासितः॥
लोका ज्ञवज्जगज्ज्ञगो देहाद्बहिरिदं धिया॥८६॥ नास्तु मानोजगज्ञगः पुत्रादिर्गौण उच्यते॥ तत्र
त्मव्यवहारोस्ति तत्सुखेन हं सुखीत्यतः॥८७॥ इति बुद्धिरित्यर्थः॥ तथापि तत्र नंदस्य स्वहंत्वस्या
प्रतीतितः॥ आत्मत्वं गौणमेवात्र न मुख्यमिति हि श्रुतिः॥ प्राणान्नमयमात्मानं कुर्बुद्धिरवगम्य
तां॥ अस्माल्लोकादिदं बुध्वा लोक्यमानात्मतादिकात्॥८८॥ प्रेत्यात्र निरपेक्षस्य प्राप्तोत्यन्नम
यं श्रुतं॥ तुच्छमेखीयतां बुद्धिं त्यक्त्वा देहे कनिष्ठता॥८९॥ देहसंक्रमणं नाम तथान्ये पांचगम्य
तां॥ तच्छमे॥ पुत्रादिसुखादावित्यर्थः॥ संक्रम्य चानंदमयं क्रमात्मस्का प्रियादिकं॥ ब्रह्मपुच्छ
मिति प्रोक्ते परेशे पर्यवस्यति॥९०॥ देहाद्युपाधियोगेन वेनत्वं परमात्मनः॥ अखंडानंदरूपेण
वेद्यत्वमुपपद्यते॥९१॥ ननु संक्रमणे नाम दृष्ट संयुक्तता मता॥ नासनो वेदितुस्तस्य निष्प्र
देशतयेति चेत्॥९२॥ विद्याफलभ्रमध्वंसस्य संक्रमोत्र विवक्षितः॥ नहि संक्रमणं मुख्यं ज्ञानेसा ७६

सांसारिकसुखोत्कर्षस्सन्निधिं चित्र आंतिमेत्यतः॥९३॥ समस्तानंदसंज्ञावाक्ष्रोत्रियेषु श्रुतिरिति
तः॥ एवोक्ते सर्वकामाप्तिस्समस्त उपपादिता॥९४॥ कामहानिके कारो लेकिं विद्वत्र प्रदर्प
ते॥ श्रोत्रियावृजिनत्वे हि सर्वत्रैव समे अपि॥९५॥ कामानुपहतत्वस्य हेतोक्कादौ विवक्षते॥
तस्माद्यथोक्तानंदस्य प्राप्तये साधनत्रयं॥९६॥ श्रोत्रियावृजिनत्वे च तथाऽकामहतात्मता॥
तुल्ये आब्रह्मणः एवैते वेदिस्तु तरस्य च॥९७॥ अकामहतनेवातः एवं स्यात्साधनेमिति॥ ×प
श्रुतत्वस्याविशिष्टत्वादितिन स्मात्पदोदितं॥९८॥ अपापो वृजिनो ज्ञेयो यथोक्तार्थश्च दिस्य
पि॥९९॥ अत्रावृजिनतानुक्तायाद्यादृत्य च दरोक्तितः॥ प्रकटपक्षे तस्याकृ एवत्र साधुपदादिति
९९॥ आद्यपर्यायमात्रोक्ते न तस्यान्वयीति चेत्॥ यः श्रोत्रियस्य चेत्युक्तस्तस्मादेवकारतः॥१००॥
साधुत्वाद्युदितार्थस्य लाभः स्यादिति भातिमे॥ तदेवं परमानंदद्वारभूत उदाहृतः॥१०१॥ सांसा
रिकसुखोत्कर्षश्रोत्रियाध्यक्षतः श्रुतेः॥ श्रुतिनिष्ठेत्यर्थः॥ अथबोध्यः परानंदो महावाक्ये प्रद

×ते।

रूपतः॥ अज्ञानात्किंचवक्षाति ज्ञानात्तस्याप्तिवत्तथा॥ वाप्यते शास्त्रतज्ज्ञानाज्जीवस्य ब्रह्मरूपता॥
ग्रामस्य गमनद्वारा मार्गधीः प्राप्तिसाधनं॥ यद्येवं ब्रह्मविज्ञानं स्वाभ्यासद्वारतो भवेत्॥ ८॥ ब्रह्मा
प्ते हेतुरित्येवं मुख्याप्तिसिद्ध्यतीति चेत्॥ शंकते ग्रामस्येति॥ यथा तत्त्वमसीत्यत्राभेदधीरुपदिश्य
ते॥ ब्रह्मोस्मि त्वमिति ज्ञानं नैवं तत्रोपदिश्यते॥ ७॥ मार्गस्यैवोपदिष्टत्वान्मुख्यात्तत्प्राप्तिरत्र तु॥ ज्ञा
नादज्ञानहानेन प्राप्तिः स्यादौपचारिकी॥ ९॥ नैवमुपदिश्यत इत्यन्वयः॥ विपश्चिद्व्यतिरेकेणाय
दीशोन्यो नविद्यते॥ तदा स्याद्द्वयप्राप्तिर्द्वितीयाद्वैभयश्रुतेः॥ ९॥ अथ योऽन्यामिति श्रुत्याभेदस्या
वस्तुनोक्तितः॥ एकधैवेत्यभेदस्य विधानान्नित्रिदातयोः॥ १०॥ यथा चैकैकविज्ञाने चंद्रद्वित्वाप्र
दर्शनात्॥ तद्द्वित्वं भ्रांतिसिद्धं स्यादेवं द्वैतं नगृह्यते॥ ११॥ कदाचिदप्यतो द्वैतमत्रानमिति चेन्नेतत्
सुषुप्तौ द्वैतधीर्नास्ति नाद्वैत्यादिकवाक्यतः॥ १२॥ ननु तद्द्वितीयमस्तीति वाक्याद्धित्यर्थः॥ तस्यात्मि
थ्यात्वनो द्वैतविभ्रांत्यैव विज्ञेभितं॥ इष्टासक्तमनस्कत्वात्तदन्यं सदपीतरः॥ १३॥ नपश्यतियथा

धन्वी तथा सुषुप्तावयं बुधाः॥ निरायासमुखासक्तेरपि संतं नपश्यति॥ १४॥ न तत्राभावान्यदार्थस्येत्येवंव
क्तुं न शक्यते॥ अस्त्यन्यादर्शनेप्यस्य बाणदृष्टिर्धनुष्मतः॥ १५॥ सुषुप्तौ नास्ति किंचिद्वै भातीति प्रत्ययाद
ग्रहस्त्वयं॥ सत्यस्य वस्तुनस्तत्राभावादित्येवमन्यतां॥ १६॥ यथा वै तत्त्वतामसा न घटस्य सतोपिधीः॥
तथा सुषुप्त्यवस्थायामात्मतत्त्वानभासते॥ १७॥ विद्यमानमपि द्वैतमिति चेन्नद्वसंगतं॥ निमित्त
निरपेक्षत्वात्सौषुप्तस्याग्रहस्य हि॥ १८॥ स्वाभाविकत्वाद्द्वैतस्याग्रहणं नाहतत्वतः॥ अग्रहणस्य विका
रत्वाद्धेतु अन्येन तथा भवेत्॥ १९॥ अस्वाभाविकतां तेन गृह्यमाणस्य च॥ दृश्यत्वात्कल्पितत्वेन
सुषुप्तावग्रहस्तथा॥ २०॥ अस्याविक्रियत्वेवस्याद्रूपं स्वाभाविकं परं॥ अस्येति सौषुप्ताग्रहस्येत्य
र्थः॥ स्वात्मरूपे यथामिथ्या तथासौ सुषुप्तमिथ्यातां॥ अवस्थया परिच्छिन्नेस्तौ स्यादिति न शंक्यतां॥
अन्यानपेक्षसौषुप्तमात्मरूपं न तत्समं॥ विनाशमिवेत्याद्येन वाक्येनात्मैव नेति चेत्॥ २२॥ वि
शेषधी विनाशो यो विनाशकवचनस्य हि॥ विनाशमेवापीतो भवतीति वचनस्येत्यर्थः॥ जीवेशयो

भिन्नाभिन्नत्वे भिन्नत्वे हेतुकार्ययोः ॥ भेदेन दृष्टा जीवस्य मुक्तिरीश्वरतो भवेत् ॥६९॥ अन्यस्य हेतो जी
स्य भ्रमहेतुत्वकारणात् ॥ द्वितीयादेव भयं पुंसां भवतीति हि श्रुतं ॥७०॥ अन्यत्वेपि महे
शस्य धर्मादेः सहकारिणः ॥ अज्ञानं वा स्वयं हेतुत्वं नेति चेन्न तदसंगतेः ॥७१॥ जीवस्याद्यास्य हेतोश्च
धर्मादिर्जीववर्तिनः ॥ सति भ्रान्तिर्निवर्तेत तन्निवृत्तिर्न संभवेत् ॥७२॥ निमित्तभिन्नरूपत्वे सदा
संसारी भवेत् ॥ नियतः स्वाभाविकत्वे च नाशः स्यादात्मनाशतः ॥७३॥ एकत्वपक्षे तेषां दोषो
नात्मनो भवेत् ॥ सदा संसारिता जातु न विमुक्तत्वमित्यपि ॥७४॥ बंधहेतोर्मुक्तिहेतोरानर्थक्यं
तथैव च ॥ रागस्यास्य च विरुद्धत्वमित्येषां कोपि नेष्यते ॥७५॥ भयस्याज्ञानहेतुत्वात्तन्निवृत्तौ निव
र्तते ॥ इति श्रीमत्सुरेश्वराचार्यसंगृहीता विचारणा ॥७६॥ जीवेश्वरभिदास्माभिर्निष्यावस्थाचवा
ऽस्तिना ॥ यदुक्तं ब्रह्मणो वागाद्यगम्यत्वेन संक्रमः ॥७७॥ विद्यमानोपि नोक्तस्स्यादिति तत्साधुनाक्तितः ॥ ७८
स्पष्टीकर्तुमगम्यत्वेयतनइत्यादिवक्ति च ॥७८॥ मनस्त्वाद्यानुसारेणातीन्द्रियेर्थे प्रवर्तते ॥ शब्देषु च
१ ×वाचोभिधायकाः शब्दा व्युत्पन्नाः सविकल्पके ॥ वस्तुन्येव निर्विकल्पेपि प्रयुक्तास्तद्बुद्धये ॥ अप्राप्य
नभिधायैव निवर्तन्ते यतो गिर इति ×१ ×वस्तुत्वसामान्यादित्यर्थः ×

१×न मनोमयमिति ज्ञानान्तरसंक्रमणमिष्यते ॥×१
ध्यमदर्शनात् ॥७९॥ अस्मात्सोक्तात्पराहंकारत्युक्त्या वाह्यसुतादिषु ॥ भ्रान्तेर्विनाशः कथित इति वेद
निधीयते ॥८०॥ कृत्वान्नमयसंक्रान्तेरुक्त्या तत्तनयादिषु ॥ प्रत्यगात्मत्वविश्रान्तेर्भूयोनुत्पत्तिरू
च्यते ॥८१॥ आद्यकोशात्मताभ्रान्तेर्भूयोनुत्पत्तिरेव च ॥ स्यात्प्राणमयसंक्रान्तिः प्राणात्प्राणमयात्म
नः ॥८२॥ देहादावात्मनाभावेष्यहंधीगम्यतात्मनः ॥ भ्रान्तेः प्रतीयमानत्वमुपेत्यात्मपदं स्मृतौ ॥८३॥ एव
मन्नमयमात्मानमित्यादौ संप्रयुज्यते ॥ पुच्छं ब्रह्मणि वागादेरगम्यत्वमुपेत्य च ॥८४॥ तत्संक्रमो
पि सन्नुक्त्या नोक्त इत्यवगम्यताम् ॥ विद्यमानोपीत्यर्थः ॥ कृतः कश्चिद्विचारोत्र सुरेश्वरार्यैः सउच्यते ॥ योसा
वेव विदित्युक्तः परस्मात्किमसौ भवेत् ॥ तद्धि प्रसिद्धितो ज्ञानं निश्चितं फलवद्भवेत् ॥ ब्रह्मवेदेति वाक्ये
न ब्रह्मभावश्च तत्त्वतः ॥१०१॥ जीवोन्य एव ज्ञानेन ब्रह्म प्राप्नोतीति चेन्न तत् ॥ प्राप्तस्याप्राप्तत्वस्य
नान्यभावो हि युज्यते ॥१०२॥ घटे नष्टे तथाऽनष्टे घटभावो हि नेष्यते ॥ अनन्यत्वे भवेद्विद्वान्प्राप्त
व्यानवतीति किं ॥ बाढं प्राप्तं परं ब्रह्म नानात्मा प्राप्नोतीत्येन तद् ॥ स्वरूपादृशमायदृग्जीवो ब्रह्मस्व

१४ इवाद ब्रह्मरूपे मूर्तिरेत्यादिश्रुतौ। मूर्तामूर्तं प्रपंचं तं ब्रह्म स्वरूपमिदं श्रुतं। मूर्तामूर्ते स्वरूपे यो नेरनुरूपि परात्मनः।
वाच्यत्वान्नेति नेतीति श्रुत्या पदेनोच्यते इति। इति श्रुतमित्यर्थः। अथात आदेशो नेति नेतीति श्रुतमित्यर्थः। यद्यद्दृश्यं न तत्सर्वं ब्रह्म
इति प्रतिषिध्यते। वीप्सया यदि नो वीप्सा स्यात्तदा नातिषेधतः। मूर्तामूर्त प्रपंचाभावो हा ब्रह्मणि स्यात् तयोस्तथा नन्वेवं ब्रह्म निषे
ध्यं स्यात्पर ध्यं स्यात्तस्मादुपसंहरति। अथास्याधास्तु रेखार्य किंचित् सत्किं सुप्रोक्तवान्। तत्र प्रसिद्धं यथा केऽर्थं
बोपर विरो को मंत्रोपि विद्यते। ४७ पूर्णानंदात्मकं सर्वानर्थनाशो पलक्षितं। ब्रह्म तस्यापरिज्ञानादात्मासं
धतः ४१ सारसंयुतः। तद्विज्ञानाच्च मुक्तिः स्यादित्यस्मिन्नात्मलोदिते विद्यतइ त्यनेनान्वयः। यतो
वाचो निवर्तंते तत्ब्रह्मेति प्रतीयतां। ननु दृष्टत्वे यो यस्मात्तु साक्षित्वं ततः। ४८। व्यावृत्तो सा
क्षिणस्ता सां शब्दास्तज्जन्यका अपि। व्यावर्तंते समं तावि मनः शब्दितद्वृत्तिभिः। तस्माद विष
यो ब्रह्म शब्दतज्ज्ञानयोर्मतं। शब्दतज्जन्यविज्ञानाविषयत्वे परात्मनः। ४९। तन्निष्ठज्ञानदृष्टत्वं न
वेद्बृहस्पते नितिचेत्। देवदत्तस्त्वमुत्तिष्ठेत्यादितद्बोधकं पदं। ५०। तमगोचरयत्सुप्तं तन्निद्रां विनि
वर्तकं। यथा तद्वदितापि स्याद्ब्रह्मशब्दान्तिप्रभावतः। ५१ बाधिका शब्दजा विद्या मायाया दुर्बलत्व ७९
तः। आत्मस्वाबोधरूपस्य तज्ज्ञाज्ञानस्य दोस्याततः। ५२ विषमंत्रादिके सर्वे शब्दशक्तेश्च दर्शना
त्। शब्दशक्तेरचिंत्यत्वाद्वादागोचरतो विना। ५३। तदाकारज्ञानमात्रान्न शब्दो निवर्तकः। माया

याइत्यनुषंगः। पार्श्वस्थे बोधिता सुप्ताः सुषुप्ति समये पुनः। अस्मरत्वात्सर्वविदिनाम पित्रादार्थसं
गतिं। शब्दात्स्वज्ञानतो भिन्नां त्यक्त्वोत्तिष्ठतिमानवाः। जाग्रद्दृष्ट्या यतः शब्दं सुषुप्तो वेत्ति कश्चन। ध्व
स्ते तौ वचसा ज्ञाने ब्रह्मास्मीति जन्मतिः समं धास्मरणे हेतुः सुप्तो शब्दस्मृतिर्भवेत्। संबंध
स्मृत्यभावेपि सुषुप्तौ सफलो भवेत्। ५५। शब्दात्स्वधीर्यथा नद्दशमेऽकुरसंशये। विनापि संबं
धधियं शब्दबले संगतिग्रहात्। ५६। ब्रह्म एव विषये शब्दो लक्षणावृत्तिमात्रतः। ज्ञानमुत्पाद
यते नाज्ञाने नष्टे मनो विलः। ५७। ब्रह्मास्मीत्यनुभूतिः स्यादित्यानंदो यथावियान्। नायं वन्नयत
त्राद्दमिति श्री वार्तिकेस्यतु। ५८। अविद्याघातिनं ज्ञानाद्दहं ब्रह्मेति धीर्भवेत्। नश्यत्यविद्यया
सार्धं हत्वा रोगमिवौषधं। ५९। अवशिष्टं स्वतो बुद्धं शुद्धं मुक्तमनो भवेत्। नातः स्यात्कावनापेक्षा
नियोगस्याप्यपेक्षणं। ६०। नापि ब्रह्म एव पेक्षा स्यात् बुद्धमानांतरं प्रति। कारकव्यापृतेः सर्वं स्वा
पादो प्रत्यगात्मनः। ६१। स्वरूपावप्रतिज्ञा नान्यनान्यापेक्षाऽस्य सिद्धये। यद्वस्तु नाभिधेयं स्या

अत्यये यत्र संस्पृष्टो तु॥ स्वसत्तासिद्धये नास्य नियोगादेरपेक्षणं॥ तत्सत्ता या नित्यसिद्धेर्नापि
तद्दर्शनाय च॥६३॥ द्युलोकस्याग्निरित्येतद्रूपयोश्च प्रसिद्धितः॥ पदार्थयोः रसो वाव लोकेऽन्यथा
दिवाक्यतः॥६४॥ अग्नित्वाख्या द्युलोकस्यासन्न प्रथा विनाश्यते॥ ब्रह्मणो लोकत्ववापि वक्ति वचा
प्रसिद्धितः॥६५॥ ब्रह्मज्ञाने विधानं स्याद्दुर्लभं चाप्यसंगतं॥ यद्यप्यलौकिको ऽप्यर्थः कर्तुं शक्येत मा
नवैः॥६६॥ नियोगो भावना वापि परार्थान्वयरूपतः॥ संसृष्टरूपोऽध्याप्येत ब्रह्मसावाक्यार्थलक्षणं
॥६७॥ अखंडैकरसं तस्मात्तज्ज्ञाने दुर्लभो विधिः॥ नियोगस्यानुपगमे वेदांतामानतेति चेत्॥६८॥
आत्मस्था ज्ञाननिष्ठा कार्यहेतुर्धी कारणत्वतः॥ वेदांतानां प्रमाणत्वान्नियोगोपगमेन किं॥६९॥ संस
र्गविक्षेपकत्वेन तत्प्रामाण्यं व्ययेष्यते॥ नियोगस्य जडस्यास्य नित्यत्वे तन्न मेऽन्तरा॥७०॥ नात्र वाक्य
प्रमाणत्वमनुमानं तु यतस्ततः॥ नियोगसाधकत्वेन नित्यसंवित्स्वशासनं॥७१॥ अप्रमेयतया ज्ञाने
नियोगांगीकृतिर्वृथा॥ संसर्गेति ज्योतिष्टोमेन स्यादो यजेतेति लिङर्थ नियोगस्य नियोज्यविषयो ८०

निष्टत्वे भुतेस्सहेदं निवर्तते॥ अतो ब्रह्मसुखस्यास्य स्वरूपानंदाधिकत्वतः॥ एतावदिति वक्तुं वा ज्ञा
तुं वा न हि शक्यते॥७४॥ तद्बोधयत्तु शब्देषु लक्षणा वृत्तिमात्रतः॥ मानुसायः पुमां चेत्ति
कुतोपि न बिभेतीति सः॥७५॥ एवं मनोमयोपाधि ब्रह्मोपासितुरप्रवा॥ जन्मांतरे वा नेवास्ति कदा
चिदपि साधनं॥७६॥ तस्मात्तीकारसंज्ञा वा तत्र स कृपाविनीमितं॥ अधुनात्वद्वयानंदं प्रमाणका
नतो मुने॥७७॥ नीहेतुरेव नास्तीति मत्वा प्रोक्तं कुतश्चन॥ इत्युक्तं श्रुतिवाक्येन द्वितीयाद्वै भयं श्रु
तं॥७८॥ ब्रह्मबोधं निषेधेन विधिना च जगुर्बुधाः॥ तदुक्तं॥ त्वमथ मेवं निश्चित्य तदर्थं चिंतयेत्तु
नः॥ अतद्व्यावृत्तिरूपेण साक्षाद्विधिमुखेन च॥ इति॥ अतद्व्यावृत्तिरूपं स्याद्यतो वा वद इति श्रुतौ॥ अ
स्थूलाशब्दतादीनामुपसंहृतिरत्र च॥ निषेधो ऽनात्मरूपः स्यात्तथाप्याप्तो लक्षकः॥ ननु स्वश
ख्याविहितत्वेनर्धर्म निषेधतः॥८०॥ आत्मोपलक्षणे सिद्धे किमन्येस्तोरिहेति चेत्॥ निषेधोतुरम
जापिदार्थार्थतादुपेयते॥८१॥ अन्यथा स्वीयशाखायामदृष्टि निषेधतः॥ तत्सिद्धावन्यवेय
×अंत्यविधिमुखं तत्र सत्येज्ञानमितीरितं॥८२

ध्येन ज्ञानभेदः स्यादत्यन्तं ज्ञानहेतुना ॥ न चार्थास्य प्रतीतायामप्यन्यास्ता साधुधीर्यदि ॥७८॥ मिथ्या
रजतविज्ञानादन्यस्ता शुक्तिधीर्नवेत ॥ शाब्दज्ञानं विधेयं स्यात्किं वा ज्ञानान्तरं तथा ॥७९॥ आद्ये त्वा
त्पत्ये तस्य विधेयत्वं न युज्यते ॥ स्वाध्यायोध्येतव्य इति येन स्मात्तस्य सिद्धितः ॥८०॥ अध्यापनविधे
रेव ज्ञानोत्पत्त्युपपत्तितः ॥ नास्ति विध्यन्तरापेक्षा तदर्थं तस्य विद्यते ॥८१॥ ज्ञेयनिश्चय एवात्र ज्ञा
नस्य फलमिष्यते ॥ ज्ञानोत्पत्त्यास्य सिद्धत्वात्फलायापि तद्विधिः ॥८२॥ ज्ञानान्तरं विधेयं स्या
च्छमादिकसमन्वितं ॥ शाब्दज्ञानतो ब्रह्म परिच्छेत्तुं न शक्यते ॥८३॥ तस्या वाक्यार्थरूपत्वान्परिच्छि
न्नघटादिवत् ॥ व्यतिरेके दृष्टान्तः ॥ संसर्गरूपो वाक्यार्थो न ब्रह्म तु तथा भवेत् ॥ विज्ञानान्तरग
म्यत्वमस्योपेयं बलादपि ॥८४॥ यस्मादुद्धधियो ब्रह्मविषयो नेष्यते ततः ॥ अहं ब्रह्मेत्यसं
सृष्टापरोक्षाकारनिश्चयः ॥८५॥ शाब्दज्ञानाभ्यासरसाध्यो विधेयो भ्युपगम्यतां ॥ यद्यप्यशाब्द ८१
बोधोयं तथाप्यत्र न दुष्यति ॥८६॥ शाब्दज्ञानाभ्यासजन्य ज्ञानगम्यत्वकारणेन ॥ वेदप्रमाणकं ब्रह्मे

त्युपचारादिहेति चेत् ॥८७॥ नियोगाद्वस्तुसिद्धिः स्यात्रवेदादिति यत्तव ॥ बोध्यं तस्योत्तरं दत्तं य
तो वाच इति श्रुते ॥८८॥ घटाकाशो महाकाश इत्यत्राति विरुद्धयोः ॥ अंशयोः परिहारेण काशमात्रं प्र
बोध्यते ॥८९॥ यथा तथा महावाक्ये तत्त्वमित्यादिके द्वयोः ॥ सामानाधिकरण्येन पदयोस्तत्त्वमर्थयोः
॥९०॥ विरुद्धभागव्यावृत्तेरखण्डैकरसात्मकः ॥ अवाक्यार्थः श्रौतवाक्यात्साक्षाच्चेः प्रतिज्ञायते ॥९१॥
तस्मादशाब्दज्ञानस्य विधेयत्वमसंगतं ॥ आत्मनः स्वप्रकाशत्वान्निर्विशेषाद्वयत्वतः ॥९२॥ ज्ञानस्य
च विधेयत्वे वाक्याद्ज्ञानविधायकात् ॥ वस्तुस्वरूपेयेस्यात्कांकवस्तु विबोधकं ॥९३॥ विधायकं स
मस्तं च वस्तुबोधेव ननेति चेत् ॥ तद्बोधितत्त्वमित्यादेः प्रत्यक्षादेव सिद्धितः ॥९४॥ विधायकात्मव
चनाद्भिन्नमेवाभिधायकं ॥ सत्संप्रयोग इत्यादिसूत्रं नाप्यकदीरितं ॥९५॥ यन्नव्यभिचरेत्तस्या
प्रत्यक्षं [illegible] नेतरस्तथा ॥ इत्यादि रूपं कुप्यतः प्रत्यक्षं भ्रांततायदि ॥९६॥ सत्संप्रयोगे पुरुषस्येन्द्रि
याणां बुद्धिजन्म तत्प्रत्यक्षमिति प्रत्यक्षलक्षणसूत्रं ॥ नियोगानुप्रवेशेन बोधकं स्यादिति त्वया ॥

५×द्दु५

नै॰ सं॰ यदुक्तं तत्र को हेतुः कुतोऽस्य व्याप्तिरिष्यते ॥१९८॥ वाक्यत्वं वा प्रमाणत्वे हेतुश्चेद् व्यभिचारिता ॥ परपक्षा
त्मके वाक्ये प्रत्यक्षादौ च दुस्तरा ॥१९९॥ अस्थूलादिशब्दतो वादिवाक्यगम्यफलं न तत्फले ॥ विधेयत्वं न ग
म्यत्वे विरुद्धे ते भविष्यतः ॥२००॥ तद्वाक्याद्ब्रह्मणः सर्वविशेषणनिराकृतः ॥ नियोगस्याप्रवेशे
च वाक्यस्य विधिहानतः ॥२०१॥ अन्यथा वाक्यवन्नास्या प्रामाण्यमिति चेन्न तत् ॥ विधिशून्यप्रमा
णत्वे ब्रह्मणस्तदगम्यता ॥२०२॥ अन्यस्य चान्यनिष्ठत्वाद्ब्रह्मासिद्धावसिद्धितः ॥ न ज्ञानस्य नियोगे
त्रानवकाशः प्रसज्यते ॥२०३॥ नियोगयुक्तवचनैर्ब्रह्मपक्षे दितीर्यते ॥ यत्तन्तु भवतो ब्रह्म विषयत्वा ×प६
द्वयोर्विधिः ॥४॥ अन्यदेव तदित्याद्यैः श्रुतिवाक्यैरनेकशः ॥ विरुध्यते ततो नाम ज्ञानस्यास्ति विधे
यता ॥५॥ पदानामर्थवादानां न चेत्स्वार्थे प्रमाणता ॥ पयोद्रवस्य संबंधो न प्राप्नोति जुहोतिना ॥
न तत्पदासिध्यन्नावानं तदर्थस्य वादिनः ॥ तथा च पयसो द्रव्यादेर्वचनस्याप्रमाणता ॥७॥ पदस्य चै
दप्रमाणत्वं वाक्यस्य किमु तद्भवेत् ॥ तस्यापि विधिशून्यस्य प्रामाण्यं केन वार्यते ॥८॥ पदान्यर्थस्य ८२

×मतेपि×३

विनानुपपद्यमानतयाऽऽत्मनिरूपकत्वेन नियोज्यविषयाक्षेपकत्वमेव संसर्गाक्षेपकत्वं तेन रूपे
ण संसर्गे प्रामाण्यं विवक्ष्यत इत्यर्थः ॥ नान्वेति ॥ अत्र संसर्गप्रमाणत्वमपि त्वन्वयः ॥ ज्ञानस्य संस
र्गाक्षेपकत्वात् ॥ अर्थापत्तेरनुमानविधया प्रमाणत्वमिति ॥ इदं संसर्गबाधकं ॥ कार्यपरत्वाज्ञा
मानयेत्यादिवाक्यवदित्यत्र हेतुज्ञानस्य वाच्यत्वात् ॥ हेतुप्रविष्टनियोगस्य नित्यचेतनं विना
ज्ञानायोगादिति भावः ॥ विधिवाक्यादुतान्यस्माद्वाक्याद्ब्रह्म प्रसिध्यति ॥ वेदान्ते विधिपदे चेत्
तेनाद्यो विकल्प्यते ॥ विधावेव कृतार्थत्वाद्बाधकगिरस्तव ॥ नान्यस्मादपि न सिद्धिर्विधिवाक्या
नुगामिनः ॥७३॥ कार्यज्ञानाज्जिधं कर्तुमकर्तुमथवान्यथा ॥ कर्तुर्निरस्याशक्यत्वस्य सिद्धौ हि मा
न्यवः ॥७४॥ वाक्ये दृष्टव्य इत्याद्ये नियुक्तोऽपि न शङ्कुयात् ॥ ज्ञाने विधेरभावेऽपि वेद्योपासनयोर्भ
दिता ॥७५॥ तद्ज्ञानमिति चेन्नैवं तं यथैत्यादिकश्रुतेः ॥ ते तमेवेति कौन्तेयेत्यादिगीतास्मृतेरपि ॥७६॥
नञ्जनुन्यायतश्चापि ज्ञानजन्यफलश्रुतेः ॥ अर्थसाधकतोपास्तेरस्ति वा नास्ति वा वद ॥७७॥ आ

रकाणि यद्यपि स्युस्तथापि च ॥ अर्थासाधारणत्वेन स्मृतीनां न तत्प्रमानता ॥ ९ ॥ न द्वेतू नाम तस्ते
षामपि प्रामाण्यमश्नुते ॥ अर्थेति । ज्ञातार्थेत्यर्थः ॥ जुहोति नान संबंधः स्वर्गेणैवेति चेन्न तत् ॥
पदा प्रमाणतायां च पयोदध्यादिकस्य हि ॥ १० ॥ कुतः स्वर्गेण संबंधः किं चोपेत्य दमीरितं ॥ नास्य
स्वर्गेण संबंधः क्रियाद्वारं विनाभवेत् ॥ ११ ॥ स्वर्गसाधनदध्यादिकत्वथत्वविशेषितं ॥ आग्ने
न्यापां प्रणयनं समर्थं पशुसिद्धये ॥ १२ ॥ यस्मा गोदोहनं द्रव्यं भवेत्पशुफलार्थिनः ॥ तस्माद्द
र्शादियागोघप्रक्रमे प्रणयः स्मृतः ॥ १३ ॥ तस्य चापूर्वहेतुत्वमिति प्राभावनोदितौ ॥ पशुकाम
कृतौ तस्माद्द्वावाश्रित्य विधीयते ॥ १४ ॥ पश्चात्त्वस्य फलसिद्ध्यर्थं द्रव्यं गोदोहनाभिधं ॥ विना क्रिया
परागं हि द्रव्यस्य न फलार्पिता ॥ १५ ॥ क्रियाद्वारैव दध्यादेस्तथैव फलहेतुता ॥ गोदोहनस्य
पि भवात् क्रमसात्प्रणयाभिधे ॥ १६ ॥ साधनं यदि किं येतस्वः पशस्त्वस्य साध्ययोः ॥ भेदाद्धि प्रणयो
भिन्नो भवेदेव तथा सति ॥ १७ ॥ आग्नेयविधिवाक्यानां सर्वथैव प्रबाधनं ॥ महत्त्वादिकरस्ये
न प्रमाणत्वं यतः स्मृतः ॥ १८ ॥ वेदांतानंदभावेन प्रामाण्यं तस्य नेति चेत् ॥ वेदांतादैक्यविज्ञाने प्र

श्लो ५

हृत्त्वादेरभावतः ॥ सर्वकर्तृत्वयुता हान्या हेतत्कृत्यत्वसिद्धितः ॥ पुमर्थसाधकज्ञानसाधकत्वा
त्प्रमाणता ॥२०॥ पदानामर्थवादानां नियोगमप्रवेशतः ॥ नैव वारयितुं शक्या परैः स्वार्थे प्र
माणता ॥२१॥ नियोगमनपेक्ष्यैव प्रतिपाद्यार्थमादितः ॥ केमर्थकलवशात्पश्चान्नियोगान्तु
प्रविष्टता ॥२२॥ यथा क्रियाश्रुते स्वार्थे प्रामाण्यं स्याद्विधिं विना ॥ तथैव मानतां तेषामपि संभ
वति ध्रुवं ॥२३॥ यागादेरनुवादेन नियोगोऽप्युपगम्यते ॥ पदोत्थबुद्धेर्मिथ्यात्वे कथं तदुपपद्य
ते ॥२४॥ तन्मिथ्यात्वे नियोगस्य विषयो नैव सिध्यति ॥ निरपेक्षार्थबोधित्वादपि स्यात्पदमा
नता ॥२५॥ साकांक्षत्वानुवादत्वे कुतश्चावगते त्वया ॥ नान्यविशिष्टत्वादतस्तज्ज्ञानमिति चेन्न
तत् ॥२६॥ पदप्रमाणतानिष्टेर्विधेयप्रसरत्वाद्विधेः ॥ विधेस्तदित्यत आह विधेयेति ॥ प्रत्यक्षा
दिप्रमाणेभ्यः पदाप्रामाण्यधीर्न हि ॥ पदार्थे तर्हि मानत्वं पदस्य न निवारितं ॥२७॥ वाक्यार्थ
धीसमुत्पत्तौ पदार्थान्तरमेव हि ॥ अपेक्ष्यते पदं स्वार्थे त्वनपेक्षमितीष्यते ॥२८॥ पदे स्वार्थेऽन
मानेऽन्वै वाक्यार्थप्रत्ययः कुतः ॥ अन्वाद्यनात्मविध्वंसद्वारेणैवास्य वेदने ॥२९॥ न्यगुवल्यां ध्व ७३

निर्वक्तितस्माद्विधिबलात्फले ॥ इत्यस्यासंगतत्वेन प्रमाणमभिधा वचः ॥३०॥ अनादिप्रतिषे
धेन वस्तुसिद्धिर्न चेष्यते । नक्षितत्वेन तत्सिद्धेरिति चेन्नेदसंगतं ॥३१॥ अन्यादेव वस्तुनो भेदोभ
वोऽभावोऽथवा वद ॥ आद्ये तस्य पृथक्त्वादेरन्योन्याश्रयतादिना ॥३२॥ इष्टत्वादप्रमाणत्वेन द्विती
योऽपियुज्यते ॥ तस्यैन्द्रियेण संगस्याविरहान्नोपलभ्यता ॥३३॥ अभावे मानतो भेदस्य सिद्धिः स्या
दिति चेन्नतत् ॥ स किं प्रमाणभावास्याद्यद्वा संविदभावतः ॥३४॥ मानाभावेऽस्य मानत्वव्याहतेर्नोद
योऽभवेत् ॥ नान्त्यः प्रकाशमानस्य न प्रकाशाकृता यतः ॥३५॥ मानाभावश्च मेयस्याभावोऽभावश्च सं
विदः । इत्यभावात्मकं सर्वं न त्राणाकरसंमतं ॥३६॥ स्वोक्तिबाधितमेवेदं स्वभावाद्भेदसाधनं ॥ अतो ना
दिनिषेधेन वाक्यस्यात्मप्रबोधने ॥३७॥ व्यापारोऽनादिभेदेन त्वात्मधीर्नहि वाक्यतः । धियः स्वतो प्र
माणत्वान्नत्वामाण्याय तद्विधिः ॥३८॥ इति चेद प्रमाणस्य वि[illegible]तोपि न मानता ॥ न कुलालवदात्मा
म्नः शरावायाप्यलं यतः ॥३९॥ कैवल्यकारिता बुद्धेर्नियोगादेव चेद्भवेत् ॥ नियोगार्थीव गतये नि

योगोन्योपिमृग्यतां॥स्वाध्यायइतिवाक्येपिविध्यंतरमस्तेयथा॥विध्यर्थावगमस्तत्र इहास्त्विहाप्यति
धाम्कृते॥४१॥ज्ञानेविधेरभावेपिवेदांतेविध्यभावतः॥यादृच्छिकीप्रवृत्तिस्स्यान्मुमुक्षोरितिचेन्न
नत॥४२॥पदार्थशोधनेयस्माद्विधिरभ्युपगम्यते॥वाक्यार्थप्रत्ययोत्पत्तिप्रतिबंधापनुत्तये॥वि
धिरभ्युपगंतव्यः पदार्थपरिशोधने॥वाक्यार्थज्ञानकालेयःपदार्थोनैवविद्यते॥कर्तव्यःकारकापे
क्षो विधेयस्स न संशयः॥विपरीतस्ततोयस्मात्वाक्यादेवावगम्यते॥४५॥नित्योकर्मप्रभुत्वकस्स नविधेयः
कथंचन॥ज्ञानस्योत्पत्तिमात्रेण ज्ञानहानिकरत्वतः॥४६॥अन्यापेक्षित्वविरहान्ननिदिध्यासनेवि
धिः॥निदिध्यासनशेषत्वं नहिज्ञानस्य विद्यते॥४७॥ज्ञानंस्वतोसमर्थं चेद्विधिनाकार्यकृत्कथं॥नहि
स्वतोसतीशक्तिः कर्तुमन्येनशक्यते॥४८॥तस्मात्कूटस्थविज्ञानंप्रत्याख्यातारिवलद्वयं॥आनंदंब्रह्मलो
विद्वान्नबिभेतिकुतश्चन॥४९॥ब्रह्मस्वरूपस्यैतस्य स्वस्वरूपसुखंमुनेः॥साक्षात्कारयतोनीतेहेत्व
भावात्कथंकुतः॥५०॥अर्थस्मरन्यानवेत्वच्छेदस्य विरहेसति॥राहोःशिरइतिह्यत्रयथालोकेतथे ८४

हत्व ॥ आनंदब्रह्मणोस्त्वस्मात्पुरा गुप्त्यादिरूपता ॥ अत तावन्निमतेत्येवं शोकाद्दूरीकृतात्र वेत् ॥५१॥
विद्यासमनंतरेतीति विद्याकाले भवेत्फलं ॥ ननु स्वर्गादिवन्मोक्ष्यं मुजीनस्तेष्वनीति वेत् ॥५२॥
अज्ञानप्रतिबंधस्य ज्ञानोत्पत्त्यैव नाशतः ॥ मुक्तिः स्याज्ज्ञानकालीना प्रतिबंधांतरं न हि ॥५३॥ प
रिशुद्धात्मविषयो ज्ञ्यं श्लोको मनोमये । आत्मातिरेकः को ज्ञानां नेनिबोधार्थमीरितः ॥५४॥ इ
ति श्रीमत्सुरेश्वरीयकलेशसुधालवाः ॥ ब्रह्मविज्ञानहेतुत्वान्मनसो ब्रह्मरूपता ॥५५॥ आरोप्य
स्तूयते नेस्य ज्ञोमात्रे प्राप्ति शंकते ॥ इहत्वद्वैतविषये प्रीतिहेतुर्निवार्यते ॥५६॥ इत्याकुर्यतइ
त्यादेरायं व्याख्यकारिता ॥ सत्कर्माकरणाद्भीतिः पापस्यकरणादपि ॥५७॥ भीहेतुर्विदुषोप्य
स्ति संतापादितिचेन्नतत् ॥ एतं ह वावेत्याद्या हि श्रुतिस्तापं निषेधति ॥५८॥ वावेत्येवार्थता तत्र किं
कस्मादर्थकं पदं ॥ किं पदमित्यन्वेयः ॥ कस्माद्वाकरवं साधु पापं च कृतवानहं ॥ इतिसाधुक्रिया
ऽसाधोः करणं वास्मवेदनं ॥ नैकेनं तपतीत्येवं श्रुत्यर्थः परिकीर्तित ॥ विद्वांसं नतंत्यनेन हि

नै०सं० ताकरणादिकं ॥ क्रियाफलं हि कर्त्तुः स्यान्न चकर्त्रात्मवेदिनः ॥ स्याध्वक्रियादिना तापो मोहस्संवीतचे
८५ तसः ॥६२॥ जायते मृतिकाले हि हि क्रियावशवर्त्तिनः ॥ जीवन्नाकृतवं साधु कस्मान्निंदितमाच
रं ॥६३॥ इत्येतेऽज्ञस्य संतापो न तु ब्रह्मविदो मुनेः ॥ तापाभावे हेतुमाहस्यष्ट एव मितिश्रुतिः ॥ ता
पहेतुतया विद्वान्पुण्यपापे न्वयः पुमान् ॥ स पुमांस्तापहान्यर्थमात्मानं स्पृणुते सदा ॥६५॥ स्पृ
णोतिः प्रीति वलयोर्वाचकः परिकीर्त्तितः ॥ स्पृणुते प्रीणयत्येनमात्मानं वलयत्यपि ॥६६॥ आत्मा
साक्षी न धर्मादेः कर्त्तेत्येवं विनिश्चयात् ॥ संतापरहितः प्रीतो नवत्येव विचक्षणः ॥६७॥ धर्मादि हे
त्व विद्याया ब्रह्माहमिति निश्चयात् ॥ निवृत्तेः प्रबलश्चस्यान्न धर्मादेः पराजितः ॥६८॥ अविद्याया
निवृत्ते रित्यन्वयः ॥ आत्मनो कर्त्तृरूपत्वे ब्रह्मात्मत्वे च निश्चिते ॥६९॥ प्रवर्त्तमाने देहादौ पापा ८५
दिरितिचेन्न तत् ॥ यस्तापहेतुतां तस्य तापनाशे न हेतुता ॥७०॥ आत्मज्ञानस्य जानाति स पुमा
न्पुण्यपापके ॥ आत्मानमेव स्पृणुते पश्यतीत्यर्थ इतिः ॥७१॥ तस्य पापादेरित्यर्थः ॥ अनेकार्थ

तयाधातो: स्फुरणोनिर्दिशनार्थकः॥ शास्त्र दृष्ट्यानुसंधत्ते तयोरात्मस्वरूपतां॥७२॥ ननुपुण्या
दिरूपत्वं मायया कल्पितं तथा॥ अनुसंधत्त इत्यर्थः॥ द्वि इत्यप्रसिद्धिर्उक्तार्थे हि शब्देन प्रदर्शिता॥
७३॥ यदात्म व्यतिरेकेण ब्रह्मज्ञस्य न विद्यते॥७३॥ पुण्यादिकं स्वरूपेण तदा तत्त्विं तया कृतः॥ ता
पो नास्तीति किं वा कर्ममिति हे नावई रित:॥७४॥ उक्तं ह्येवैष एते आत्मानं स्पृणुते य एवं वेदे
तिवाक्यस्यार्थं वक्तुं तद्यावत्यौं कामाह आत्मनो कर्तृरूपत्व इत्यादिना॥ न पापलेपशंकास्ति
निर्गुण ब्रह्मवेदिनः॥ नाकार्षं न करिष्यामि न करोमीति निश्चयात्॥ अकर्तृब्रह्मरूपेण तत्तोक
र्त्तो न लिप्यते॥ ब्रह्मज्ञानेन पुण्यस्य श्रोतव्ये नाविरोधनः॥७५॥ पुण्येन लेपः पापेनालेप
पि लवनीतिचेत्॥ अस्याकर्त्तात्मसामर्थ्यात् पुण्ये नापि न प्रसता॥७६॥ नापि पापेन लेपः स्यात्तु गुण
ब्रह्मवेदिनः॥ अश्लेषस्य वचना शास्यश्रुतत्वा श्रुतिवाक्यतः॥७७॥ तद्यथा पुष्करे त्यादि विश्लेषः
श्रूयतेऽहसः॥ ज्ञानाद्ध्वं प्रसक्तस्य देहाद्धेयं वहारतः॥७८॥ अश्लेष एव पापस्य पद्मपत्रेय

वे० सं०
८६

थांतसः॥ ६६ जन्मांतरे वापि संचितः पापसंचयः॥ नाशमेतीति विदितं यथैषीकेतिवाक्यतः
॥ यथैषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयंत इति श्रुत्येत्यर्थः॥ सगुण
ज्ञानिनः पुंसः सुकृते दुष्कृते फले॥ यदस्ति सर्वे पाप्मानस्तेनं स्पृशंतीति संश्रुतेः॥ ६८॥ पापव
ज्जन्महेतुत्वान्न पुण्यं पापसमं मतं॥ संश्रुतावपि ति॥ सर्वे पाप्मानोऽतो निवर्तंत इति दहरविद्यायां
श्रुतत्वकमित्यर्थः॥ सगुणज्ञानिनोप्येवं किमु निर्गुणवेदिनः॥ उभे ह्येवैष इत्येकस्या तरणं
पुण्यपापयोः॥ ज्ञानिनां तुल्यमेवोक्तं तस्मात्ताभ्यां नास्ति हानी॥ उभे ह्येवैष एते तरतीति श्रु
त्येत्यर्थः॥ प्रारब्धस्य न नाशः स्यात्तस्य तावदिति श्रुतेः॥ मुक्तिर्विलंबमानापि नास्यात्यंतवि
लंबने॥ ६९॥ गर्भाधानस्य समये ह्युक्तस्य परमायुषः॥ नाशनाभावेन देहोयं यावत्प्राणे
न सेव्यते॥ ७०॥ तावदेव विलंबः स्यादथ प्राणशरीरयोः॥ वियोगे सति सब्रह्म संपद्यत इति
श्रुतेः॥ ७१॥ अर्थोयं वर्णितस्तत्र जीवोयमत्रिधीयते॥ ऋणानि त्रिषु बाणेषु ग्रहणत्यागयो ८६

रे[illegible]ल्लद्वेप्राप्य न स्वेलेत्यर्थः॥
४४ नित्यकर्माविनाशश्च चतुर्थाध्याये चिंतितः॥ काम्यवन्नित्यकर्मापि ब्रह्मज्ञानानुनाशतः॥ नाशमेतीतिचेन्नैवं द्वावंशौ नित्य
कर्मणः॥ एकः प्रधानभावेन शुद्धिहेतोऽनुषंगतः॥ स्वर्गादिफलदस्तस्य नाशो स्तु न निवार्यते॥ चित्तशुद्धिप्रदस्यास्य वि
द्यायामुपयोगतः॥ नाशो वक्तुं न शक्यः स्यात् संगहनोगोपयोगिनः॥ ब्रीह्यादीन्मन्यते लोके न ह्यन्यत्पवनमानवः॥ अपांत

एतमानाम
मुनिर्विष्णो
रनुशया॥
ख्यामनूपेण
जयाहजे
न्मानरमिति

रपि॥ धानुष्कस्य स्वतंत्रत्वं मुक्ते बाणेऽस्ति तन्न हि॥ ज्ञाते वेगेस बाणस्तु पतत्येव स्वयं यथा॥ ८८॥
तथैव ब्रह्मविज्ञानमनारब्धेषु कर्मसु॥ नाशकत्वे स्वतंत्रं स्यान्नत्वारब्धेपि कर्मणि॥ ८९॥ प्रवृत्त
फलकंचेतत् विनाभोगं न नश्यति॥ अन्यथा गुर्वभावेन विद्यांकः प्राप्नुयादिति॥ ९०॥ इतिभाव
इत्यर्थस्तु नेनान्वयः कृतो विमोक्षे संपत्स्य इत्येतच्छांदसं मतं॥ उपसंहरतीदानीमनुवाकार्थ
स्थतः॥ सनमीरिते॥ ९२॥ ब्रह्मविदाप्नोतीत्यारभ्य प्रतिपादिता॥ यासैयमिति वाक्येन परामृष्टेति मन्य
त्कुमारःपा तां॥ ९३॥ रहस्यविद्या वाचीदं त्वेव इपनिषत्पदं॥ अस्यामुपनिषच्छब्दस्यात्यंतश्रेयोयनस्ततः॥ ९४॥
वेत्वांस्कद नाहृशी॥ किंचितावेद्यत्वस्यार्थः परिकीर्तितः॥ इत्युपनिषदित्यस्य तस्यार्थः॥ [illegible]॥ अनुवा
रूपेण जन्म केद्वितीये तु ब्रह्मविद्या निरूपिता॥ तत्साधनं तृतीयेस्मिन्ननुवाके निरूप्यते॥ ९७॥ उपास्तयश्च कर्मा   स्य
वान॥ स्वेच्छ णिसो हि त्वांयद्यपि स्फुटं॥ संकीर्तितानि विद्यायाः कारणानि तथापि च॥ ९८॥ नान्तरंगविवास्य
यावावराहा
दिव्यापाद्या क्रीर्तनं तदिहोच्यते॥ मननादि तदंगानामर्थादुक्तिस्तदुक्तितः॥ ९९॥ नन्वृतमित्यादिकाख्यानं विद्यास्तु
जगत्कुर्वे पुः॥ वशिष्ठाद्यास्ततो मुक्तिं विंदुर्बाधाहीति चेन्न॥ नेहर्वकल्पे महातातपस्तापरमेश्वरं॥ उपास्येहाधिक
रेतुभाग्येनानाशरीरतः॥ तच्छ्री प्रारब्धनाशोच मोक्ष्यंते सकलाअपि॥ [illegible]॥ मरणाव्यव
धानेपि सुषुप्तिव्यवधानवत्॥ विद्याया अविनाशेन कर्मसंस्पर्शहानतः॥ जन्मजगन्निर्वाहकत्वेन प्रसिद्धा इत्यर्थः॥ ४४

त्यर्थमुच्यते ॥ तृतीयस्य चतुर्थ्ये यद्द्वितीयं तन्त्र दर्श्यते ॥ पारिप्लवार्थमाख्यानैः किं वा विद्यास्तुतिस्त्ववि ॥
॥अश्वमेधे महीपाल मनुपर्वे नृप निशामय तुहि ॥५॥ उपाख्यानानि तस्यां वाच्यान्यध्वर्युणा ततः ॥ उ
पाख्यानानि वेदान्ते नदृश्यानीति चेन्नतत् ॥६॥ मनुर्वैवस्वतो राजेत्येवं तत्र विशेषणात् ॥ पारि
प्लवार्थता तेषां नैषां तच्छेषतोच्यते ॥७॥ विद्यासंनिहितानां हि विद्यासंस्तावकत्वतः ॥ विद्या
वाक्यैकवाक्यत्वं यात्येता नीति युज्यते ॥८॥ इति चेदिति ॥ पारिप्लवमाचक्षीतेति वाक्यविहितपा
रिप्लवाख्यकर्मशेषत्वेनोपनिषदाख्यानान्यनुष्ठानाय प्रयुज्येरन्निति शंकितुराशयः ॥ मनु
रिति ॥ प्रथमेऽहनि मनुर्वैवस्वतो राजा द्वितीयेऽहनि यमो वैवस्वतो राजेत्येवमाख्यानानां पा
रिप्लवार्थानां विशेषितत्वादित्यर्थः ॥ गुरुद्वारैव विद्यामाचार्याद्धेति नः श्रुतिः ॥ शिष्यापा
ध्यायरूपेयमत आख्यायिकोच्यते ॥९॥ गुरूपसत्तिमंत्रो यमधीहीत्यादिकः श्रुतौ ॥ भगवन्नुप
रूपत्वं ब्रह्मविद्याधिकं स्मर ॥१०॥ गुरोर्वितीर्णं संस्मृत्य ब्रह्मोपदिशता दरं ॥ अथाध्यापयेत्यु
र्थ इत्यानंदयति जगौ ॥११॥ एतदन्यादिकं द्वारं तज्ञो धत्स्यो कथानुरुः ॥ इति प्रदर्शनार्थः स्याद् ८१

३ × वैराग्यदस्याप्यसित्वं र्थोमन्त्र ब्राह्मणकाननात् ॥ न गृणंतं विशि रसंत्रग्रतपते व्रतेनादधामीति ऋग्वेदगिरस्सामादध्या
द्वितीयमंत्र आह गौ ऋवादित्यर्थः ॥ ×३

४ अत्र प्राणमनस्य महेतुरन्नमयादिके ॥ कमा
त् अन्नमयादिकोशो पादानकारणानी
त्यर्थः ॥ ×१

९×श्रवणादिग्राहित्वेन प्राणस्य प्राण उच्यते ॥ दृष्टिग्राहित्वेन चक्षुषश्चक्षुरित्यपि ॥ एवं श्रोत्रादिकेभ्योऽप्यमितार्थं केचिद्विदूचिरे ॥×९

ण पाण्यादिकस्य च ॥१२॥ शाखाग्रे चन्द्र इत्यत्र यथा चन्द्रस्य दर्शने ॥ समीपवर्त्तिनी शाखा द्वा
रस्या लक्षकत्वतः ॥१३॥ उपलक्षकत्वेन द्वारमित्यर्थः ॥ तथैव श्रोत्रादिकानि स्युर्गुणास्तु ब्र
ह्मदर्शने ॥१४॥ उपलक्षकाणि द्वाराणि द्वारत्वं च स्फुटीकृतं ॥ प्राणस्य प्राणमित्यादौ बृह
दारण्यकश्रुतौ ॥१५॥ प्राणादिरूपं प्राणादेरधिष्ठानं तथा यतः ॥ प्राणादिद्वारतो ब्रह्मसुखेन
ज्ञायते ततः ॥१६॥ अहंप्रत्ययगम्येतदन्नप्राणादिमध्यतः ॥ अन्वेषणीयं ब्रह्मेति तद्वि
जानीयादिति ॥१७॥ लक्ष्यस्यार्थबोधाय द्वाराण्यत्रोदिताः स्मृताः ॥ शरीरादिकचेष्टाया अन्यथा
नुपपत्तितः ॥१८॥ साक्षी विविच्यते तस्माद्द्वारत्वमिति टिप्पणे ॥ बोधायोत्सुकमत्यन्तं द्वारं श्रो
त्रादिकं गुरुः ॥१९॥ वीक्ष्याददाद्विना प्रश्नं स्वयमेव पुनर्जगौ ॥ औत्सुक्यद्योतनार्थायं हशब्दः
परिकीर्त्तितः ॥२०॥ श्रुत्यन्तरप्रसिद्धत्वेवकाराध्याहृतस्त्वयं ॥ यतो मृतानि जायंते जीवंत्यंते तु
जंतवः ॥२१॥ प्रयंति नाशं गच्छंति साकल्येन विशंति यत् ॥ तद्विचारय दृष्टं च त्वया ब्रह्म तदेव
हि ॥२२॥ उत्तरस्य समाप्त्यर्थ इतिशब्दोऽत्र सम्मतः ॥ तद्ब्रह्मेतीत्यत्र इतिशब्द इत्यर्थः ॥ ब्रह्मणो

निर्णयार्थोयं विचारो विहितो ऽत्र च ॥ मननादिकमप्याद्य पुराणे पठ्यते ऽखिलं ॥ अर्थाच्च विहि
तमित्यर्थः ॥ तत्र तावन्मुनिश्रेष्ठाः श्रवणं नाम केवलं ॥ उपक्रमादिभिर्लिंगैः शक्तितात्पर्य
निर्णयः ॥ सर्ववेदान्तवाक्यानामाचार्यमुखतस्त्विया नृ ॥ वाक्यानुग्राहक न्यायशीलनं मननं
भवेत् ॥२५॥ निदिध्यासनमेकाग्र्यं श्रवणे मनने ऽपि च ॥ निदिध्यासनसंज्ञं च मननं चाद्वयं बुधाः
॥२६॥ फलोपकारकांगं स्यात्तेनासंभावना तथा ॥ विपरीता च निर्मूलं प्रविनश्यति सत्तमाः ॥
२७॥ प्राधान्यं मननादस्ति निदिध्यासनतो ऽपि च ॥ उत्पन्ने वं तरंगं हि ज्ञानस्य श्रवणं बुधाः ॥२८॥
तटस्थमन्यथा वृत्या मननं चिंतनं तथा ॥ इतिकर्तव्यकोटिस्थाः शांतिदान्त्यादयस्तथेति ॥२९॥
उपक्रमोपसंहारावभ्यासो ऽपूर्वता फलं ॥ अर्थवादोपपत्ती च लिंगं तात्पर्यनिर्णये ॥३०॥ या
वस्तुविषयत्वेन स्यादाद्यं तैकरूपता ॥ नदेकलिंगमन्यानि पंचैवं षड् बुधा जगुः ॥३१॥ यतो वा
इतिनियक्रमलक्षितं लक्षणेन हि ॥ तत्तात्पर्याक्रियते प्रोक्तैरात्मनः श्रवणादिभिः ॥३२॥ इति ल
सालोनेत्यन्वयः ॥ जानकर्तुरिति स्मृत्या विनावागुरणइत्यपि ॥ उपादाने निमित्ते च पंचम्या विहि
तत्र उपक्रमः सदेवेति तु उपसंहरणं त्विदं ॥ ऐतदात्म्यमिदं सर्वमित्यादि परिकीर्तितं ॥ तथा तत्त्वमसीत्युक्तिरभ्या
सोसकृदुच्यते ॥ अप्राकृद्युक्तिरित्यन्वयः ॥ अपूर्वत्वमगम्यत्वं प्रमाणांतरतो भवेत् ॥ एकविज्ञानतः
सर्वविज्ञानं फलमुच्यते ॥ सृष्टिस्थितिलयावेशानियंतृत्वोनिपंचहि ॥ अर्थवादास्तदाद्योऽस्य दृष्टा

तत्वतः॥ अस्योऽध्यात्मकं ज्ञेयं यत इत्युक्तितः श्रुतौ॥ इत्यपि स्मृत्यन्वयः॥ विभाषा गुणे इत्यादि विधि
त्रे पंचमी स्मृतिः॥ गुणे हेतौ न तु द्रव्य इति चेदभिधीयते॥ आनंदादिकशब्दानां वर्तितेगुणवाचि
ता॥ आनंदादिगुणानां स्यादत एवोपसंहृतिः॥ सत्यादिवचने तस्माद्गुण्यत्ने हेतुपंचमी॥ गुण
गुण्यादिभावस्य न परात्मिमतो ग्रहः॥३५॥ यद्वा द्रव्येपि किं न स्याद्ब्रह्मादग्निरितिस्थिते॥ नत्र
योगविभागेन पंचम्या उररीकृतेः॥३६॥ तस्मात्पंचम्युपादाने निमित्ते यत इत्यसौ॥ सत्यानं
दादिरूपं च ब्रह्म यदुद्दकीर्तितं॥३७॥ स्वरूपलक्षणे चात्र तटस्थं च विवक्षितं॥ यथाश्रुतानु
सारेण स्वतंत्रता हेतुपंचमी॥३८॥ समन्वयनयावल्या नविरोधो विवक्षया॥ निमित्तमात्रं ब्रह्मे
ति मतं दूषयितुं पुनः॥३९॥ एवैरस्वतंत्रसास्यानिस्तद्वीत्यात न स्वतंत्रता॥ यद्येति॥ यत इत्यपि
पंचमी श्रुतौ जनिकर्तुः प्रकृतौ भवेदियं॥ न च हेतौ विधीय पंचमी विहितत्वाद्गुणे वाभिवस्त
ष्विति निराकृते त्यर्थः॥ यो हि स्याद्रज्जुरित्यत्र मिथ्याहीरज्जुलक्षणं॥ यथा ध्यासिकसंबधा

तथाकारणताऽऽत्मनः ॥४०॥ जगत्कारणतात्वेन तटस्थेनोपलक्षितं ॥ यद्ब्रह्म तस्य विज्ञाने विचा
रस्साधनं मतं ॥४१॥ इति श्रुतवतोऽस्याऽऽद्येपर्याये ज्ञाननिश्चयं ॥ श्रुतिस्स्तपइत्याद्याश्राहा
न त्रतपः पदात् ॥४२॥ चतुराश्रमधर्मोक्तिर्ब्रह्मधीकारणत्वतः ॥ अनाश्रमिजपादेश्च निर्णीताज्ञान
हेतुना ॥४३॥ तथाप्याश्रमिधर्मस्याऽतिशयत्वमीरितं ॥ अतस्त्वितरदित्यादिश्रीमत्सूत्रेककु
क्तितः ॥४४॥ अतस्त्वितरज्ज्यायो लिंगाच्चेति सूत्रादित्यर्थः ॥ तपो हि स्वाध्याय इति ब्रह्मचारिधर्मः
एतत्खलु वावृतपइत्यादि यस्त्वं ददातीति गृहस्थधर्मः ॥ तपो नानशनात्परमिति वनस्थधर्मः
॥ मनसश्चेंद्रियाणां चैकाग्र्यं परमं तपः ॥ तज्ज्यायः सर्वधर्मेभ्यस्स धर्मः पर उच्यत इति य
ति धर्म इति ज्ञेयं ॥ समाप्तिर्ब्रह्मनिष्ठत्वं कर्मठत्वस्य संभवेत् ॥ कर्मानुष्ठानतत्त्यागपरस्य रवि
साधनतः ॥४५॥ भूतानि स्थूलदेहाः स्युस्तत्प्राणं तद्भवः ॥ लोकप्रसिद्ध इत्येवं हि शास्त्रदर्शो
पयेदयं ॥४६॥ मुक्तौ शोणितसंगान्यो हेतुत्वेन वारितः ॥ अन्नात्पुरुष इत्यादिश्रुतिस्त्वर्थः खलु
॥४७॥ ब्रह्मधीज्ञानसंप्रत्तिः स्वाध्यायाद्दानतस्त्विह ॥ भवेद्द्विविधिबोत्पत्तिः रत्नदर्पनिवारणं ॥ भवत्यनश्नाना द
त्यासात्साध्यज्ञानहेतुता ॥ संपत्तिः संपादनं । एवार्थकः ॥ यस्मात्तस्मान्मुनेर्ब्रह्मो ब्ररुणस्य महात्मनः ॥ कृ
तवान्स तपएकाग्र्यं गुरुस्वाध्यायपूर्वकं ॥ विचार्य ब्रह्मतामन्ने लक्षणेनव्यनिरूपयत् ॥ चित्तैकाग्र्यात्मकं तप
सो ब्रह्मविज्ञाहेतुता ॥ ब्रह्मसंस्थ इतिप्रोक्त्या ब्रह्मनिष्ठ [illegible] र्नात् ॥ सर्वव्यापरहानेन नन्यास्त्वितत्परे ॥४८॥

...वमन्नस्य तस्मिन्न परितोषतः ॥ श्रुत्वा तानि शास्त्राण्ययो मेत्रेण गुरून्मायावान् ॥
...तर्गंधो हि नर्के देहेतुर्भूयते ॥ स्वदेहाशुचिगंधेनेत्यादिस्मृत्या श्रुतेरपि ॥ ५१ ॥
...मादहैतोरप्यन्नस्य ब्रह्मतानतः ॥ नहि मुक्तेस्यतु कस्यचिद्गोरक्षायमाश्रयः ॥ ५२ ॥ स्व
ति ॥ स्वदेहाशुचिगंधेन न विरज्येत यः पुमान् ॥ विरागकारणं तस्य न किंचिदुपदिश्यत इतिस्मृतः ॥
अन्नं ब्रह्मेत्येवमाकृत्स्नान्नतथाश्रयतिवा अन्नमृते प्राणादिति वाजसनेयश्रुतेश्चेत्यर्थः ॥ गुरुसं
स्योपसन्नस्य तप एवात्र साधनं ॥ ब्रह्मज्ञानोत्तरंगत्वादेको यतपस्तु स्मृतः ॥ ५३ ॥ तपो ब्रह्मेत्यक्ते
दिन संजगाकुपचारतः ॥ सत्यादिवाक्याद्ब्रह्मलोकोपरोक्षे ब्रह्मधीर्भवेत् ॥ ५४ ॥ एकाग्रबुद्ध्यात
दृढं गुरौ कामित्य[illegible] सन्धितः ॥ ब्रह्मस्वरूपानुक्त्यैव तप एवोपदिष्टवान् ॥ ५५ ॥ [illegible] एकाग्रचित्ते
न जगद्धेतु चल लक्षणं ॥ प्राणस्य योजयित्वास्मिन् ब्रह्मचैनिश्चयकारकः ॥ ५६ ॥ लिंगदेहयुतो जीवो
नरकात्स्वर्गतोपि वा ॥ आगत्यान्नयुतो मर्त्यं प्रविश्य स हरेत स्या ॥ ५७ ॥ यदा गर्भे विशेत्तर्हि त

द्गतः प्राणवायुना ॥ शेषमेतत्क्रमाद्देहमुत्पादयति देहिनः ॥ प्राणान्नावेतु जनयेन्नेत्फ क्रं चैतस्य
के ॥ देहोत्पत्तिनिमित्तत्वं प्राणस्य व्यतिरेकतः ॥ ५९ ॥ न ह वा अते प्राणादेतस्मिञ्छ्रूयते ॥ यथा रूतं प्राणा
द्गतस्मिंश्च्यवेत प्रत्येत्त्रसंजवे दित्येतरेयके श्रुतमित्यर्थः ॥ कृतं जीवनहेतुत्वमपि कौषीतकिश्रु
तौ ॥ मृतिः प्रसिद्धा देहस्य प्राणवायोर्विनिर्गमे ॥ ६० ॥ यावदस्मिन्शरीरे प्राणो वसति तावदायु
रिति कौषीतकीश्रुतावित्यर्थः ॥ उपादानत्वविरहेप्यस्य जन्मादिकं प्रति ॥ निमित्तत्वादतो ब्रह्मे
त्येवं निश्चितवान् भृगुः ॥ अन्नं प्राणः ॥ प्राणो जडत्वान्न ब्रह्म मनो ब्रह्मेति बुद्धवान् ॥ प्रज्ञाने
ब्रह्म विज्ञानमानंदं ब्रह्मसंश्रुतं ॥ ६२ ॥ अतश्चेतनतो तत्र ब्रह्मणि प्रतिभासते ॥ मनश्च ज्ञानश
[illegible] केतनं ब्रह्म युज्यते ॥ ६३ ॥ जन्मादिकारणत्वं च लक्षणं तत्र विद्यते ॥ गर्भे प्राणप्रवेशस्यदे
[illegible] ता ॥ ६४ ॥ यथैवं तत्प्रवेशस्य मनोधीनत्वमीरितं ॥ कथमायाति देहेस्मिन्निति ८०
[illegible] ५ ॥ उक्तं मनोकृतेनेति पिप्पलादमहर्षिणा ॥ कथमायात्यस्मिन्शरीर इ

तिष्ठते मनोकृते नायात्यस्मिन् शरीरके इत्युत्तरमुक्तमित्यर्थः॥ ईदृग्देहं विशामीति स्मृतिका
ल समुद्भवः॥ कर्मभिर्न मनोजन्य स्वसंकल्पो यं मनः कृतः॥४९॥ देहावसानजन्येन तत्संकु
ल्पेन न तु कृतः॥ प्राण आयाति देहेस्मिन्निति शेषः इत्यर्थ इति स्थितः॥५०॥ मरणे वृत्तिविलयं गच्छेत्क
र्मनसीन्द्रियैः॥ वागाद्यैस्सहितो जीवो यस्मिन् जीवति कलेवरे॥५१॥ चित्तवृत्तिर्युतस्तेन नावि
देहबले विना॥ ज्ञानेन सहितो जीव एष प्राणं समश्नुते॥५२॥ प्राणप्रधान एव स्यात्स प्राणे
नाविदेहगं॥ यच्चान्तेन संयुक्तस्सर्वलिंगं सजीवकं॥५३॥ संकल्पानुगुणं लोकं नयतीत्यपि
से शेषः॥ इन्द्रिये मनसि संपद्यमाने यच्चित्तस्तेनैव प्राणमायाति प्राणस्तेजसा युक्तः सहा
त्मना यथासंकल्पितं लोकं नयतीति श्रुत्या पूर्वं श्रुतक्रमेव स्पष्टमुक्तमित्यर्थः॥ तत्र दृ
ष्टांत उत्क्रमण तद्यथेत्यादिकं श्रुतौ॥ जवेन तृणजलौकेति संवर्तनी तृणे स्थिति॥५४॥ यथा ज
लौका घासाग्रमादौ प्राप्य मुखेन तु॥ तृणं तरमवष्टभ्य पश्चात्तागं तृणांतरे॥५५॥ संप्राप्य

तितद्धच्चमरणे समुपस्थिते ॥ जीवात्मा स्वीयतनुं देहस्य त्यागे नेदं स्थितं वपुः ॥ ५६ ॥ चैतन्यहीनमापा
द्य मनसान्यं कलेवरं ॥ गोचयित्वा समस्तेन लिंगदेहेन संयुतं ॥ ५७ ॥ स्वात्मानं प्रापयत्यन्यं क
लेवरमिति श्रुतिः ॥ तद्यथा तृणजलायूका तृणस्यांतं गत्वा अन्यमाक्रमं आक्रम्यात्मानमुप
संहरत्येवमेवायमात्मेदं शरीरं निहत्य अविद्यां गमयित्वा अन्यमाक्रममाक्रम्यात्मानमु
पसंहरतीति श्रुतिरित्यर्थः ॥ इत्यस्य जन्महेतुत्वं तथा जीवनहेतुता ॥ मनसा जीवनोपायं
विचार्य प्राप्नुवंति हि ॥ ५८ ॥ मनसा स्वीयतां कुर्वे देहस्य त्यागे नष्टेति संभवात् ॥ लयहेतुत्वमप्यस्य
मनसो बुद्धिकारीतितः ॥ ५९ ॥ तस्माद्ब्रह्मलक्षण संभावान्मनो ब्रह्मेति बुद्धिमान् ॥ तत्राविदोषे विज्ञा
य विज्ञानं ब्रह्म बुद्धवान् ॥ ६० ॥ मनसः करणत्वेन ब्रह्मत्वं नहि युज्यते ॥ कर्तृ विज्ञानमेवास्या ब्रह्म
लक्षण संभवात् ॥ ६१ ॥ शरीरोत्पत्तिहेतुत्वं कर्मणां श्रुतीरितं ॥ कर्तृत्वे न च कश्चादेरस्ति जीवनहेतु ८१
ता ॥ ६२ ॥ मृत्तिकारणता युद्धादौ प्रवृत्त्या लयहेतुता ॥ श्रुतीति ॥ यत्कर्म कुरुते तदभिसंपद्यते ॥ पुण्य

वैपुल्येन कर्मणा जुवतीत्यादिश्रुत्युक्तमित्यर्थः॥ न्गोः पंचमपर्याये ज्ञाननिश्चय उच्यते॥६४॥
त्वे शास्त्रमकं हि क्रतृत्वं तस्मान्न ब्रह्मतोऽस्य च॥ अवादीनां चतुर्णां च विलब्धतोत्पत्तिहेतुता॥६५॥ आत्म
ज्ञादिकव्रतानां लौकिकेभ्योऽसंभवः॥ अनुत्पत्तिरित्यर्थः॥ आनंदः सर्वहेतुत्वात्सुखं ब्रह्मैव नेत
रत्॥ तदेतद्ब्रह्मलक्षणोपेतमानंदं ब्रह्म मन्मुनिः॥ एकाग्र्यतपसां ज्ञानं तवाज्ञगुरुतमः॥ आनंदाच्चा
धिकं तत्त्वमन्नाद्भ्यो यथा तथा॥६७॥ इति शंकां निरस्यत्यर्थमुपसंहरतीति॥ सैषेत्यादिश्रुति
विद्यां प्रसिध्यर्थं तु तत्पद॥६८॥ ब्रह्मविद्याप्रसिद्धा हि सर्वश्रुतिषु कीर्तना॥ अनुभूतिप्रसिद्ध्यर्थं स्या
देषेति पदं श्रुतं॥६९॥ ऐकाग्र्यजानुभूत्या हि विबुधैरनुभूयते॥ भार्गवीस्तुला ज्ञाना वारुणी वरु
णेरिता॥७०॥ विद्यापरिसमाप्तिः स्यात्परस्योग्निपरात्मनि॥ यदस्तरसं तद्योमाव्याकृतं मध्यमं स्मृ
तं॥७१॥ तस्माद्वेत्यादिवाक्योक्तकाकाशोयस्तोवरस्मृतः॥ अस्त्रोऽव्दरद्व्यादोक्तोयत्परिकीर्तितं॥७२॥
अधिष्ठानं मृगादीनां मृगादिप्रतिपादितं॥ ब्रह्म तत्परमं व्योमनेनस्मादेद्यमुत्तमं॥७३॥ नातः परा

त्रै० सं०. मितिश्रुत्यातदन्यस्यनिषेधनः॥ ब्रह्माख्येपरमेव्योम्नितस्माद्विद्याप्रतिष्ठिता॥ ७४॥ यदक्षरेति॥ एतस्मि
न्खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेति श्रुतमित्यर्थः॥ नान इति। नातः परं वेदितव्यं हि किंचिदिति श्रुत्ये
त्यर्थः॥ एकाग्रमनसो विद्या सुलभेयं महात्मनः॥ सांसारिकफलापीछा चलच्चित्तस्य तूच्यते॥ ७५॥
९२ तत्साधनोक्तिव्याजेनोपास्तिरेकाग्र्यकारणं॥ अन्नेन निंद्यादित्यन्नाद्वाक्यतोत्र विधीयते॥ ७६॥ तदि
ति॥ सांसारिकफलसाधनेत्यर्थः॥ अन्नमिति। य एवं वेदेत्यादिकादन्नं नानिंद्यात्तद्व्रतमित्यन्नादि
त्यर्थः॥ अन्नं ब्रह्मेति चारभ्यानंदब्रह्मोतमास्मिते॥ एवं शब्दनिर्दिष्टवाक्येष्विति मन्यता॥ ७७॥
आनंदेति। आनंदो ब्रह्मेत्यन्तमुक्तंप्रकृतय एवं वेदेत्यस्मिन्वाक्ये एवं शब्देन परामृष्टमित्यर्थः॥ अन्नं
ब्रह्मेति पूर्वोक्तमेवं शब्देन संस्मृतं॥ इति मन्यामहे युक्तमन्यस्यानुपपत्तितः॥ ७८॥ आद्यद्वारतत्य
चास्य परब्रह्मधियं प्रति॥ ब्रह्मदृष्टिं विधत्तेत्र प्रतीकेन्नेततः श्रुतिः॥ ७९॥ अन्नं ब्रह्मेत्युपास्ते यः स
पुमान्प्रतितिष्ठति॥ चांचल्यरहितत्वेन प्रतिष्ठा प्रतिपद्यते॥ ८०॥ अत्रेत्यन्नवतमस्याम्मीत्यन्नवा ९२

नदीमिवक्षिकः॥ अन्नादः स्यात्प्रजाध्येस्तु महान्स्यात्तदुपासकः॥ अभ्यासो वेदशास्त्राणां ब्रह्मवर्च
समुच्यते॥ यस्मादुपासितान्नेन ब्रह्मज्ञानं प्रपद्यते॥८२॥ तस्मादुपासकोऽन्नं तन्न निंद्यात्स्वगुरुं
यथा॥ तदनिंदनमेवास्य संपाद्यं नियमाद्भुतं॥८३॥ उपास्ति विकलास्यास्य तदतिक्रमणे सति॥
किंचित्प्रायश्चित्तिकारीया प्रक्रियात्र प्रदर्श्यते॥८४॥ विजिज्ञासस्व तद्ब्रह्म यदेवं लक्षणं न वेद॥ जग
ज्जन्मादिजनकं ब्रह्मेति परिकीर्तितं॥८५॥ तटस्थं लक्षणमिदं द्रष्टव्यं परमात्मनः॥ तपश्चचार
तच्छ्रुत्वा च गुरोर्ब्रह्मोपलब्धये॥८६॥ प्रतिपदे तपोनुक्तेः सावशेषोक्तिकारणात्॥ ब्रह्म प्रत्यक्तया लो
पि ध्यन्नं प्राणमिति स्फुटं॥८७॥ यतो वेत्यादिना प्राह तटस्थं ब्रह्मलक्षणं॥ अतोनुक्रमपि ज्ञाने हेतु
स्तेजे तपः स्वयं॥८८॥ यदि प्रत्यक्तया साक्षादन्नमित्यादिवाक्यतः॥ ब्रह्म पित्रा विनिर्दिष्टं तर्हि लं
घनं कृतिनं॥८९॥ अविवक्षितमेवस्यात्तस्मात्प्रत्यक्तयात्मनः॥ साक्षादवाप्तये योग्यं हेतुमार्गं
सते पिता॥९०॥ इति तर्कितवान्पुत्रस्तपश्चरणकालतः॥ तटस्थलक्षणस्योक्तेरखंडार्थप्रसि

कीर्तनात् ॥९१॥ वाक्यार्थव्रयोत्पत्तिपर्यंतमसकृद्गुरुः ॥ त्वके तात्पर्यतो लक्ष्यपदार्थस्यविचारणं ॥
इत्याह स्मावशेषोक्तेस्तात्पर्यप्रकटार्थकृत् ॥ मनसश्चेंद्रियाणां च ह्यैकाग्र्यं परमं तपः ॥९३॥ अन्वय
व्यतिरेकादिभिश्चिंतनं वा तपो भवेत् ॥ अहं ब्रह्मेति वाक्यार्थबोधायालमिदं व्रतं ॥९४॥ वाक्यतात्प
र्यविज्ञानफलहेतुविचारयोः ॥ श्रवणं चान्वयादेश्च ब्रह्मात्मैक्यावबोधकं ॥९५॥ जन्मादिधर्मव
त्त्वेन स्थाकृतानामनात्मनां ॥ ब्रह्मणस्तद्भावेन स्यादात्मत्वमितीदृशो ॥९६॥ अन्वयव्यतिरेकाख्यंत
पस्तस्य विवक्षणात् ॥ यत इत्यादिकं युक्तं लक्षणप्रतिपादकं ॥९७॥ अन्वयव्यतिरेकाख्यं नयो ब्रह्मसिद्धि
यं प्रति ॥ साधनत्वेन निर्दिष्टत्वलक्षणं वरुणोदितं ॥९८॥ अन्यस्यास्तीति संभाव्य ब्रह्मतान्यस्य बुद्धिवा
न् ॥ उक्तान्यन्नमयादीनि यानि तेषां तु कारणं ॥९९॥ अन्नादि प्रतिपत्तव्यं हि कार्येस्मिन् लक्षणं ॥ का
र्यत्वेन्नमयादेस्तदन्नादेरूपजायते ॥१००॥ कार्याणां विलयद्वारा कारणानंदमेत्यतः ॥ विज्ञाप्यान्ना
दिकेष्वादौ हेतुरन्नमयादिकान् ॥१०१॥ अंत्येष्वालेमनसितं तत्त्वविज्ञानसंग्रहे ॥ तत्त्वाज्ञाने सर्वहितौ ६७

ब्रह्मण्यानंदसंज्ञके ॥१०२॥ तच्च कार्यादिनिर्मुक्ते ब्रह्मणि प्रत्यगात्मनि ॥ विलाप्य विज्ञानबलात्तादृप्य
मुपगच्छति ॥१०३॥ अनंतस्य ब्रह्मतां ज्ञात्वा तस्य कार्यत्वमुद्धृतः ॥ निराकोशत्वविरहाद्धीहीति
न्वयुज्यते ॥१०४॥ पुच्छस्थाहानि पर्यन्तं प्रपंच ब्रह्मनरिस्त्राः ॥ विजिज्ञासस्व तद्ब्रह्म सतपसेति पुनःपु
नः ॥१०५॥ श्रुवन् ज्ञापयति ह्यस्मात्तपसे वा वीक्षणं ॥ व्युत्पाद्य व्याख्यायिकात्पात्र निर्वर्त्तमथाधु
ना ॥१०६॥ श्रुतिः स्वेनैव रूपेण व्याचष्टेर्थं प्रयत्नतः ॥ पुच्छ दस्य द्विजागो यं यत्र व्यावर्त्तते असा ॥१०७॥
स आत्मा तत्परं ब्रह्म तत्र विद्या प्रतिष्ठिता ॥ अत्र त्यानंदशब्दस्य कारणब्रह्मवाचिनः ॥१०८॥ अ
कार्यकारणं ब्रह्मपरत्वं नेति चेन्न तत् ॥ व्योमशब्द न कार्यादिरहित ब्रह्मबोधनात् ॥१०९॥ प्रकृत
ष्टिकानस्याकुर्यान्नं दोषं ज्ञानसमुत्तः ॥ यिशिष्ट स्याविशिष्टेना निवृत्त्वानुपपत्तितः ॥११०॥ पुच्छाने
दं परात्मानं कारणत्वोपलक्षितं ॥ ब्रह्मेति स्वयमेवासौ ज्ञातवानिति टिप्पणी ॥१११॥ य एवं वेदम
गुवत्तपएकाग्र्यलक्षणं ॥ तच्च ब्रह्मकोशबाधेन प्रतिष्ठां लभते परां ॥११२॥ पुरा प्रतिष्ठाकार्या
दिरूपस्य ब्रह्मात्मतामता ॥ य एवं वेद प्रतिष्ठितीत्यस्यार्थमाह ॥ ॥ य एवमेति ॥ अन्नाद्युप

सकानां वा फलमेतदिहोच्यते ॥ न्यायेनावाप्तकामानामन्नादिफलकीर्तनं ॥१४॥ अन्नाद्युपा
सकानां यत्फलं तद्ब्रह्मवेदने ॥ स्तुत्यर्थं प्रकृते ओंक्रमन्नवानिति वाक्यतः ॥१५॥ सगुणज्ञानेफ
लतो निर्गुणज्ञानसंस्कृतिः ॥ पुंसां ब्रह्मविदां मुख्येनान्नादिफलकीर्तनं ॥१६॥ फलान्तरस्यागम
को वा वाक्यो वा लिंगिकः स्थितः ॥ परब्रह्मनिष्ठत्वं हि फलं सर्वमुदीरितं ॥१७॥ एतद्दृष्टफलं जीवन्मुक्त
स्याज्ञाननाशतः ॥ द्वैतानामस्य पश्यतोस्य विदुषो संगतं नहि ॥१८॥ अन्नादिद्वैतविज्ञानामपि
यस्य प्रमादतः ॥ किं तु साक्षात् तदात्मानं पश्यतो गलितालिनः ॥१९॥ इति दृष्ट्येण कारोक्तं सा
धुक्तिः संविचार्यतां ॥ समाहितमनस्केन न दृष्टं लौकिकादिकं ॥२०॥ दृष्टत्वेप्यन्यदा तस्य फल
त्वेमानमस्तिनः ॥ ब्रह्मविज्ञानदग्धत्वाद्दृष्टादृष्टाखिलस्य च ॥२१॥ नापेक्षितत्वं दृष्टत्वे तुच्छस्या
स्यानपेक्षणात् ॥ बाधितानुगमादिद्वैतस्य दृष्टेरुपपत्तितः ॥२२॥ यद्यनाकांक्षितत्वेस्यात्तर्हिदं
फलमेव न ॥ तस्माद्वार्त्तिककारीया सूक्तिर्विजयतेतरां ॥२३॥ आनुषंगिकमित्येतन्मन्येहं स्मर्यते

*योप

तथा॥ आयुरारोग्यमैश्वर्यं भोगांश्चैवानुषंगिकान्॥ ददाति ध्यायतो नित्यमपवर्गप्रदो ह
रिरिति॥ भूयोन्नवादं प्रवक्ष्ये महिम्नस्यान्न आक्षिपि:॥ शान्तिदान्त्यादिहेतुत्त्वेन तु स्तवस
मुच्यते॥२३॥ यद्गुरूक्तं वक्ष्यमाणं च ज्ञानं तज्जनकत्वतः॥ अन्नमेव गुरुर्न्यायं तेनेत स्याद्भुतं
मुने:॥२४॥ अन्नस्य देहिनां कस्यैवा निंदा नोपासितुर्व्रतं॥ इति वार्त्तिकेनस्तूक्तिसंग्रहोत्र प्रदर्शितः
॥२५॥ उपासनानंतरं वक्तुमुपास्यं दर्शयत्यसौ॥ प्राणो वा अन्नमित्याद्या श्रुतिरस्य हितैषिणी॥
२६॥ यथा तिष्ठति देहान्तर्भुक्तमन्नं तथा स्थितेः॥ प्राणोन्नं धारणात्तस्य देहोन्नादः प्रकीर्तितः॥२८॥
शरीरमध्ये वर्त्तमानात्प्राणोन्नमित्यर्थः॥ देहस्य धारके प्राणे शरीरं च प्रतिष्ठितं॥२९॥ प्राणा
श्रयत्वे देहस्य प्रत्यक्षं भवति स्फुटं॥ अन्योन्यधारकत्वं च विस्पष्टं प्राणशरीरयोः॥३०॥ प्राण
स्यांतरवस्थानाद्देहस्यैवमीरितं॥ शरीरस्याश्रयकार्यत्वादन्नत्वं स्यात्तथा सति॥३१॥ अन्न
त्वोऽन्नयोरेवमन्योन्यं चाश्रयत्वतः॥ अन्नमेवान्नसंस्थं स्यादित्येवं परिचिंतयेत्॥३२॥ उपा

सन्नेविधत्तेस्य सत्यइत्यादिकाकृतिः॥ अन्नेन परिच्छीतनान्ने परिहरेद्बुधः॥३३॥ आपोवा
अन्नमित्याघ्राघ्रातो पास्यान्तरं कृतिः॥ पीतान्यन्नानि यान्येषां जीर्णत्वोजठराग्निना॥३४॥
आपोन्नं ज्योतिरन्नादमप्सु ज्योतिः प्रतिष्ठितं॥ हृष्यप्सु वै घृताग्निर्हि दृष्टो तस्मात्सुनेक्षितं॥३५॥
देहे संतापतः स्वेदाज्ज्योतिष्यापः प्रतिष्ठिता॥ स्वेदद्रवो नाद्भिस्त्वर्थः॥ अन्योन्यावस्थितत्वेनस्या
न्या४५ दन्योन्नमन्नादयोः॥ असम्यक् धियाप्नत्याज्येनेत्युदितं पुरा॥३६॥ इदत्वन्नप्रदातुं च बक्तुं
पाद्यमुच्यते॥ उपास्यमन्यदप्याह दृष्टिवत्यादिकाकृतिः॥३७॥ अधस्तादुपरिष्टाच्च सोस्थि
ताकाशमध्यतः॥ भूमेः स्थितत्वादन्नत्वे व्योम्नो न्नादत्वमुच्यते॥३८॥ मुग्धदृष्ट्योपलब्धत्वा
दुपरिष्टादतस्तयोः॥ आधाराधेयभावः स्यात्स्वमाधारो विचारतः॥३९॥ तयोः परस्परा ८५
न्नत्वे विज्ञनीयं मनीषिणा॥ वासार्थमागतं गेहे न कंचन निवारयेत्॥४०॥ अतन्निर्वाहको
पायस्तस्मादित्यादिनोच्यते॥ इत्येनिवासेदातव्यमन्नमभ्यागतायाहि॥४१॥ अन्यथापाप

र्क्षि

मेवस्यात्तस्याद्ध कन्नमाप्नुयात् ॥ याजनार्च्चयाणां न्वयेन केनप्रकारतः ॥ ४२ ॥ अत्रो हरिशुणानुर
णमराध्यस्मादिति श्रुतिः ॥ अराधि सिद्धमे वात्रमस्मादितिवदंतिहि ॥ ४३ ॥ मुख्येतीर्थविशे
षेच स्रेत्रे मुख्यायमुख्यया ॥ हत्वाभ्युदानमस्कारसत्कारादिकरूपया ॥ ४४ ॥ मुख्यकालेचमु
ख्येनसात्विकेनप्रदायिना ॥ अत्रेदंतंतथैवात्रमस्मैसंपद्यतेध्रुवं ॥ ४५ ॥ एवंमध्येजघन्ये
चेत्यादिसर्वं च योजयेत् ॥ य एवंवेद विज्ञायाप्यनुतिष्ठतिमानवः ॥ ४६ ॥ तदेतत्सात्विकेदा
नेगीतायां भगवानूजगौ ॥ दातव्यमितियद्दानमित्यादिस्मृतिवाक्यतः ॥ ४७ ॥ मध्यतोन्नतद
न्येत द्राजसादिपरंभवेत् ॥ वागिंद्रिये प्रतीकेतु ब्रह्मदेमात्मनास्थिते ॥ ४८ ॥ उद्भासाद्यात्म
कप्राणापानयोस्तत्वतः क्रयोः ॥ क्रमाद्योगादिरूपेण स्थितं ब्रह्मेति चिंतयेत् ॥ ४९ ॥ आदित्यादित्यां
निश्वासहोमयहः ॥ होमादिव्याप्तिः कर्मज्ञवेदत्रविवक्षिते ॥ होमादिव्याप्तिर्हस्ते विप्रस्य
श्रोत्रियस्य तु ॥ ५० ॥ क्षुधादिव्याप्ति र्हस्ते यथायोगं परत्रवापात्योः
×योगो प्राप्तस्यस्य संप्राप्तिः क्षेमः प्राप्तस्य रक्षणं ॥ ४२

२ ॥ मानुषीरिति कीर्तिताः ॥ उपासनाऽसमाख्याः स्फाटिकस्सर्षपः परिकीर्तितः ॥

प्रतीकयोरीदृक्कर्मरूपेण संस्थितं ॥ पादयोर्गतिरूपेण स्थितं ब्रह्मेति चिन्तयेत् ॥ मलमूत्रविसर्गो
त्रविमुक्तिः परिकीर्तिता ॥ ५२ ॥ तद्रूपेण स्थितं पायौ ब्रह्मेति परिचिंतयेत् ॥ संपादिता नरांगेषु
॥ ५३ ॥ बहूनां योपासने केकी पृथगित्यवगम्यते ॥ इति मानुषीः समाख्या इ
त्यस्यार्थमाह ॥ संपादिता इति ॥ उपासनानि कथ्यंते देवदेहगतान्यथ ॥ तत्र आत्मना स्थितं ब्रह्म
देवेष्वप्यग्निमानिति ॥ बलासना तद्धि देवे पशुदेवेषु संस्थितं ॥ यशोरूपेण तारासु ज्योतीरू
पेण संस्थितं ॥ ५४ ॥ पुत्रोत्पादनमत्रस्यात् प्रजाति योषिता सह ॥ क्रीडा मनःस्वादानं तु गुह्ये चि
यसमुद्भवः ॥ ५५ ॥ परावयवसंयोग एतच्चिंतयद्रूपतः ॥ उत्फुल्लाग्निमानदेवस्थं ब्रह्मेति परिचिंत
येत् ॥ ५६ ॥ आकाशमानिदेवस्थं समस्तं जगदात्मना ॥ ब्रह्मेत्यनुषंगः ॥ यथोपास्तिफलं ज्ञेयं तं ६९
यथेत्यादिकृष्णकृतः ॥ अत एव बहुलोपेन ध्याना निग्राह्यकानि चित् ॥ ५७ ॥ तद्ब्रह्मस्थिति हेतुः स्या
दित्युपासनतः फलं ॥ अन्नानाच्छादनादिर्यं जीवनस्थिति कारणं ॥ ५८ ॥ तद्धोमित्यवगन्तव्येतत्र

२४ ज्ञो गानम्यंत अस्मै हि स्वाधीनाः सकलो अपि ॥

न्निष्ठेनिवाक्यतः ॥ ६० ॥ इति फलमवगंतव्यमित्यन्वयः ॥ महो महत्त्वगुणवैमनो मननशक्तिकं ॥ तद्ब्र
ह्म महइत्येवमुपासीनः ततः फलं ॥ प्रजादिभिर्महान्स्यादितिपाहसुरेश्वरः ॥ ६१ ॥ ववीकरण
सेयुक्तं नम इत्यभिधीयते ॥ तद्ब्रह्मेत्यत्र वेदः स्याद्ब्रह्मशब्देन कीर्तितः ॥ ६२ ॥ स्वाधीनवेद इत्यर्थो
ब्रह्मवानिति चाप्यतः ॥ यस्त्वब्रह्मेति तद्ब्रह्मत्युपासीत यथोदितं ॥ ६३ ॥ फलं तस्य तदेवस्यादिति
वार्त्तिकक्रत्स्वयं ॥ यस्त्विव्यादिकमित्यर्थः ॥ आकाशरूपं यद्ब्रह्म तद्ब्रह्मत्वेन चिंतयेत ॥ महत्त्वबा
न्नवेद्योगी महत्त्वं ज्ञानतो भवेत् ॥ ६४ ॥ प्रज्ञाद्येस्तु पूर्वोक्तं इत्यानंदो यमुक्तवान् ॥ यस्त्वित्यादि
वार्त्तिकस्येत्यर्थः ॥ विप्रस्य परितो यो पि स्थितः स तस्य मरो भवेत् ॥ म.त्व. श्री लोक पासीत यस्तस्य फलमु
च्यते ॥ ६५ ॥ एतस्य परितो द्वेषं कुर्वतः सर्व शत्रवः ॥ म्रियंत एतद्वेषं चाकुर्वतो ये स्य शत्रुप्रियाः ॥
भ्रातृव्यास्ते पि परितो म्रियंते तस्य शत्रवः ॥ ६६ ॥ जन्मांतरे वापि यथोक्तोपासनैः कृतैः ॥ ६७ ॥ विचैत्र
स्य वतो यस्या ज्ञानं वेद्यं फलं च यत् ॥ तद्वयं दर्शयत्यत्र स यश्चेत्यादिका श्रुतिः ॥ ६८ ॥ विचैत्रकाम्या

२४ ब्रह्मणो ब्राह्मणस्यैव परिमारो ब्रह्मतनंदा ॥ विद्युद्वृष्टिश्चंद्र आदित्यो ग्निश्चेति यतः श्रुतिः ॥ वा
यौ म्रियंते तद्दृष्ट्वा हपरिमरस्तेन कीर्त्यते ॥ अनन्यश्चोपमाकाशो वायुनां ब्रह्मणा न खं ॥ इति वार्त्तिक

वे० सं०
६१

स्वप्नतपसो नानोपायसमुत्थितेः॥ मोक्षपर्यवसायित्वं संदर्शयितुमीरितं॥६९॥सयश्चेत्यादि
केवाक्यं पुनरत्रेतिमन्यतां॥नानेति॥तज्ज्ञत्वस्य त्वपर्थः॥अन्नात्मादित्वरूपेण प्रसक्तस्याखिल
स्य च॥ ज्ञानेन बाधनार्थायस यइत्यादि रुच्यते॥७०॥इत्ययं वा त्रिकोच्चार्यस्त्वखिलेशो व्यदर्शि
तः॥ आनंदमयकोशो यो ब्रह्मपुच्छमितीरितः॥७१॥अखंडैकरसानंदस्तस्यात्मत्वेन दर्शना
त्॥ प्रियादिश्चात्मतात्वात्तैः परित्यागादशेषतः॥७२॥मुक्त एव तथाप्यन्यैर्जीवन्नित्ययमुच्यते॥दे
हादेर्लौकिकैर्दृष्टेरतो लौकिकदृष्टितः॥७३॥जीवनात्स्वीयदेहस्यानुविमुक्तत्वात्तु योऽनघः॥
जीवन्मुक्तः स आत्मानं संक्रम्योक्तप्रकारतः॥७४॥आस्ते यावद्देहपातं लौकिकैः पुरुषो यथा॥ कि
कुर्वन्नित्यतः प्राह कामान्नीत्यादिना श्रुतिः॥७५॥ब्रह्मलोकस्यकस्यापिग हेतुंक्ते गविचारतः॥
विधिनिषेधयोर्व्यक्त कामान्नी स्वेच्छया संचरन्त्॥७६॥इच्छया वेषधारीति कामरूपी त्र वत्यपि॥ ६१
अव्यक्तलिंगा अव्यक्ता वाराइत्यादिकश्रुतेः॥७७॥ कामरूपादिदेहानाक्रमतः संचरन्ननुकूलचित्त॥

द्रा जान्हो क कल्पद कीर्तिः ॥ यद्वाप द्यं करोतीति विद्वान्न लोक कृतुच्यते ॥ कल्पाच कल्प
न्तो क्का देल्नी तो वाक्य पुवीस या ॥ विश्वात्मो त्पादनार्थाय सर्वात्मत्वे समीरितं ॥ त्रिरुक्तिः स्या
द्यथा सत्ये त्रिरुक्ति स्तद्वदत्र च ॥ ९० ॥ त्रिर्वः शपथ यामीति प्रयोगे तस्य सिद्धितः ॥ द्वैधात्वित्र
मिदं सर्वं मन्मं वा त्वादएव च ॥ ९१ ॥ तयोः श्लोकस्य संबंधो ज्ञोग्य ने त्ते बलदायणः ॥ अहमेव पृथ
क्तु त्रिप्रा कृव त्रिक कारणः ॥ ९२ ॥ आध्यकार्यालिको योस्ति अक्षरणः सोहमास्मि च । देवेभ्यः पूर्व
मेवास्मि तेषां स्न प्राभवाम्यहं ॥ ९३ ॥ अहमस्मात्प्रयो मुक्ते रात्मज्ञानेन न तच्छुतः ॥ आत्मविज्ञेस्तो
त्येवं मुक्तेस्तत्साध्यता श्रुतेः ॥ ९४ ॥ यो गुरुर्ब्रह्मरूपं मां त्रिब्ध्यः संप्रयच्छति ॥ स एव तानवत्येव
मुक्तरीत्या संबोधनः ॥ ९५ ॥ उदारो यो नरूपं मां विप्रादित्यः प्रयच्छति ॥ स एव तानवत्येवं प्राण
संधारणा द्विना ॥ ९६ ॥ बोधनी यात्मरूपोस्मि दातव्या नालकोप्यहं ॥ इत्थमर्थकदंबकं एवं त्रा ६८
दोविधाप्यकः ॥ वक्ष्यमाणप्रकारस्य त्ववेत्यवतिवाचकः ॥ ९७ ॥ लोकमध्यमेक वक्त्र नसवर्वा
व्यवदतिछेदः । अत्रानुप्राणनं भवंतीति प्रकम्पाप्यक्कतिः स्वयं ॥ तस्मादन्ने दद न्त्सर्वाण्येतानीत्यादिवक्ष्यति ॥
वक्ष्यमाणप्रकारस्यापि दयमित्यवगम्यते ॥ इत्यादीति ॥ एतानि द्वातीति वक्ष्यतीत्यर्थः ॥ ९८

तेन्निपात्यते ॥ अतो वेत्यवनीत्यर्थ इत्येवमवगम्यतां ॥ अदत्वा स्वयमेवान्नं भक्षयन्नमहं नरं ॥ ९९ ॥
अन्नदेव स्वरूपोहं भक्षयामि विनाशये ॥ महानरकपातेन केवलाघ इति श्रुतेः ॥ १०० ॥ तेन भुंजं भुं
जते पापा इत्यादि स्मृति तोपि च । अहं समस्तं भुवनमीशाः सन्नपि भूतवान् ॥ १०१ ॥ अहं सम्
नवान्नस्मि प्रलये समये जगत ॥ सुवः शब्दो यमादित्यः स्वर्गसुखमुपलक्षयेत् ॥ १०२ ॥ उपमार्थोनि
शब्दो नेनवतीत्यनुगम्यतां ॥ दीपादिनेरपेक्ष्येण प्रकाशानारवियथा ॥ १०३ ॥
तथैव विभ्रकाशो स्मि चक्षुरादिनपेक्षत ॥ अत्रश्रीमत्सुरेशानां श्रीसूक्तिः संप्रदर्श्यते ॥ १०४ ॥
सत्यज्ञानादि रूपोहमाविद्योत्थमशेषतः ॥ अहंप्रपंचं नवाम्येको दिनकृच्छार्वरं यथा ॥ अविद्यो
त्थमविद्यासहितं च क्षोविनाशये ॥ रविस्तमो यथा तद्वत्कर्मादिसहायतः ॥ १०५ ॥ इत्यानंदप
निप्रोक्तस्तत्पद्यार्थः प्रदर्शितः ॥ सर्वात्मत्वानुभूतियी साम्राज्यप्राप्तिरुपपादिता ॥ १०६ ॥ साक्षस्य
फलमित्युक्ते प्रवृत्ताथफलश्रुतिः ॥ ब्रह्मपुच्छमिति प्रोक्तमखंडैकरसं सुखं ॥ १०७ ॥ यः सामो

कुरुते कोत्रौ तस्येदं फलमुच्यते ॥ पंचकोशद्वारेणोत्सर्पः ॥ सय एवं विदित्येवं फलवाक्यपूर्व
मीरितं ॥ तथाधिनियमार्थस्यानुनरुक्तिः फलश्रुतेः ॥ फलं विदुष एवस्यादवरूप विदुषः
फलं ॥ इति ह्यधानियमार्थं य एवमिति हि श्रुतिः ॥२९०॥ उपसंहरतीदानीमनुवाकार्थमी
रितं ॥ भृगुवल्यादिना प्रोक्ता विद्यास्या स्थितिरात्मनि ॥२९१॥ साचोपनिषदित्युक्ता समाप्तेत्यपि
चेरितं ॥ इति श्रीमच्छंकराचार्य विद्यारण्या कृतसंग्रहे ॥२९२॥ तैत्तिरीयकसारार्थसारसंग्रह
नामके ॥ वारुण्युपनिषद्व्याख्या पुरुषोत्तमनिर्मिता ॥२९३॥ शिवरामयती श्री कृपापू
तात्वियं कृतिः ॥२९४॥ यच्छ्रामस्मरणेत्सांगं यज्ञादि व्यंगमप्यहो ॥ तत्प्रसादेनानिर्दुष्टा
भूयाद्दुष्टापिमत्कृतिः ॥२९५॥ इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीशिवरा
मानंदतीर्थस्वामिशिष्यपुरुषोत्तमानंदतीर्थविरचिते तैत्तिरीयकसारार्थसारसंग्रहे ९९
ते

५४ ॥ तैत्तिरीये भृगुवल्यर्थसंबंधः ॥ ५५

गृहं कृत्वाव सत्येव यतो य मनिकेतनः ॥७८॥ अनिकेतवास्य प्रयतः इत्यादिश्रुतिवाक्यतः ॥
यद्वा येयेषु लोकेषु चरंति प्राणिनः सदा ॥७९॥ तत्सर्वं स्वीयमेवेति संपश्यन्नवतिष्ठते ॥ ब्रह्मा
द्याः स्थावरान्तोपि प्राणिनो ममसः स्मृताः ॥८०॥ इत्युक्तरीत्या विदुषा सर्वात्मत्वविनिश्चयात् ॥
सामगीत्यात्मैक्यदृष्टा समत्वप्रतिपादकं ॥८१॥ मंत्रं गायन् सामवेदे कथितो यः स्वरोज्ज्वलैः ॥ तेन स्व
कीय सार्वात्म्य व्यक्तीकुर्वन् स वर्तते ॥८२॥ सार्वात्म्यप्रकटीकारः सामगानफलं त्विह ॥ हाबु शब्दो
विनिष्पन्नो विस्मयार्थस्य वाचिनः ॥८३॥ अहो शब्दस्य गीतार्थे वर्णव्यत्ययकारणात् ॥ हा वु त्रितु
किराश्चर्यं प्रकटं द्योतयत्यसौ ॥८४॥ देहमात्रस्थितस्यास्य गुरुशास्त्रप्रसादजात् ॥ ज्ञानमात्राद्
स्वरूपं प्राप्तमप्महद्भुतं ॥८५॥ सार्वात्म्यानुभवो योसो प्रकटीक्रियते धुना ॥ यद्यद्धीद्याद
जन्या तेन सर्वमहमेव च ॥८६॥ योनामरूपजागोत्रे तस्य मिथ्या स्वकारणात् ॥ तदधिष्ठानजागो
यश्चिदा सासमदात्मकः ॥८७॥ विप्रादिश्चेतनो त्रादः श्लोकः संघस्य वाचकः ॥ सेन्यादि संघक

×त्तु३

ध्याः कृतेः कर्मजन्य वैचित्र्यसिद्धिः कुत्रास्याश्रयस्ते न नन्युक्तमेतत् ॥ सिद्धस्य सर्वं कृतिकर्मतेति सिद्धरूपताप्य
स्य न हीति चेन्न । इति न युक्तमित्यन्वयः ॥ विवर्त्तरूपेण हि साध्यते ति सिद्धोपि तत्कर्म भवेन्महे
तोः ॥ यथा मदः साध्यघटात्मनैवं विकारस्वरूपेण साध्यतास्य ॥ इत्यादिप्रपंचितमिति संक्षेपः ॥ अ
त्रापि जनिकर्त्तरिति सूत्रे त्यादिना ब्रह्मणो भिन्ननिमित्तोपादानत्वमुक्तं ज्ञेयं ॥ निस्तमस्कनिः
प्रपंचनित्यसत्यमद्वयं स्वप्रकाशचित्सुपूर्णसत्सुखामलंपरं ॥ वियदादिवर्जितोस्मि सर्वसाक्ष्य
हं विभुः कर्तृकादिकं न मेस्ति तस्य कल्पितेः ॥ कर्तृतादिधर्मकं हि चित्तमेव नो चितीरस्ति माजपा
सु मे हि कल्प्यते मतौ यथा ॥ नतस्मीपगेन्तपे वसुखमेकचित्तगं चित्तमेतदुःखलेपि चेतनेप्रक
ल्प्यते ॥ मायिकस्य मानसस्य कर्तृतादिसंगतं छेदजेदसंज्ञवेनतत्रसंगसंगतेः ॥ निःकलस्य निः
क्रियस्य नात्मनोस्ति संगिता संगजन्यकर्तृतादिसंगिनां न संगता ॥ तत्सुखप्रकाशयेमलिः सुस्तुत्र
एव जासते चित्तसंश्रये चितिश्च निर्मले विराजते ॥ राममेकृपानिधानमात्रयाश्रुमानसं तावकी १००

×तत्व५

न दिव्यनामकीर्त्तनोत्थबोधतः ॥ ब्रह्मतत्त्वबोधके हि विष्णुनाममंगले नाम सिद्धिवक्तनेतिवेद
वाक्यमानतः ॥ श्रीपुराणभारतादिकेतिहासवाक्यतो नामकौमुदीमुखेश्च तस्य निश्चितत्वतः ॥६॥
संश्रितं समस्तमाशुनाशमेति नामतो भोगतः प्रणाशनीयमन्यथा यदप्यतेयदि ॥ अस्कतत्सुखेन
भोग्यमाश्रिताद्धि हारिणं दीनबंधुमाश्रितस्य नास्ति मे कुतोपि भीः ॥ तावकीननाम ज्ञानबो
धभानुभानुनामोहतिमिरसंहतो तज्जसर्वनाशने ॥ चित्तसर्वकर्तृतादिविभ्रमस्य का
कथा स्वाश्रितेप्सितार्थदाय राघवाय ते नमः ॥ वेदमूर्ध्नि भाषितेन सुस्वरादियोगिनासरूप
सन्निहर्वकोपदेशकालिना ॥ श्रद्धयासमादृतेन पालितेन भक्तितो ब्रह्मतत्त्वधीश्च येरणकु
स्य चित्रजायते ॥ तावकं तु दिव्यनाम नस्वराद्यपेक्षते युक्तभोजनादि कस्य कीर्त्तनादिकुर्वे
तः ॥ लक्ष्मणकृशालिनष्टदुष्टवासनाक्षया त्वत्प्रसादतो दृतं च तत्त्वबोधकं त्व एणो आत्म
प्रकाशक श्रीमन्नवरत्नानि बध्नतो ॥ नरोत्तमनिबद्धानि ध्वंतमोहतमस्तते ॥ ब्रह्मतत्त्वानुस्म

रणा सकं मंगलमाचरति॥ निस्तमस्केति॥ परं ब्रह्म अहमस्मीत्यन्वयः॥ कर्तृतादीति॥ चितिश्चै
तन्यं॥ मुख्यमेवेति॥ एकत्र मुख्यमेवाच्य त्रारोप्यते विलोहिग तमुख्यस पूर्वस्य रज्वावारो
पदर्शनादित्याव:॥ संगेति॥ संयोग संजवादित्युर्थ:॥ संगिता॥ संयोगवर्ती॥ असंगोऽयं पुरु
षस्कते रिति भाव:॥ नामविदिति॥ आत्मज्ञानं तो नामविद्धि वक्तुनेतिश्रुते:॥ हे ज्ञानेनो ज्ञि ज्ञा
सव:अत्रस्य विश्लो: वित्य लिंङ्गिनामर्की तयते तिविशु नामतत्वबोधजनके मित्यर्थ:॥ न
नु वेदान्तवाक्यं तज्ज्ञनकमितिचे सत्यं॥ नाम्नो पितद्रुपायुत्वात् उपायस्योपायांतरादूषक
त्वात् प्रमाणसिद्धस्य दुरपह्नवत्वादिति दिक्॥ विवमोपनमुक्ति: कर्मणा: प्रतिबंधकत्वादितिचे
त्संचितं प्रतिबंधकं प्रारब्धं वा नाद्य इत्याह संचितमिति॥ अन्यत्प्रारब्धं॥ अस्त्विति अप्र
तिबद्धज्ञानान्मुक्तिरिति भाव:॥ ज्ञानस्य कर्तृत्वादिनिवर्तकत्व प्रकारमाहताववक्तनेति॥ चेद
स्ईति॥ वेदांतवाक्येनेत्यर्थ:॥ तदुक्तं॥ स्वाध्यायधर्मपठितमित्यादिना॥ तावकं विति नन्वबहु १०१
४×आत्मज्ञानं तदित्यादेर्हरिनामात्मबोधके॥ यथावेदांतविज्ञानेत्यादेर्वेदांतज्ञापितं॥×४

वासरागुपनिषदर्थसारसंग्रह: समाप्त:॥ ॐ॥ ॥ उपादानं निमित्तं च जगतो य: परेश्वर:॥ तंरा
मं परमात्मानं वेदवेद्यमहंभजे॥१॥ इष्टदेवतानुस्मरणरूपं मंगलमाचरति॥ उपादानमिति॥
तदुक्तं समन्वयन्यायरत्नावल्यां॥ येनाश्रुतस्यादिति या प्रतिज्ञा मृदादिकेऽप्यो तनिदर्शनं यत्॥ त
×धा४ योरबाह्यप्रकृतिश्च हेतु: स्याद्ब्रह्म नो चेदुभयो: प्रबाध:॥ उक्तं च॥ प्रकृतिश्च प्रतिज्ञादृष्टान्तानुप
रोधादिति सूत्रकृता॥ ध्यानोपदेशादपि विश्वकर्ता महेश्वरस्तत्प्रकृतिश्च युक्त:॥ ध्यानेन सोऽकाम
यतेति कर्ता भवेदकुस्यां प्रकृति: परेश:॥ इति ध्यानेनेत्यन्वय:॥ बहुस्यामिति ध्यानेनेत्यनुषंग:॥
उक्तंच॥ अभिध्योपदेशाच्चेति सूत्रकृता॥ ब्रह्मात्मसंबंधिकृते निमित्तं च वेदुपादानमिति द्विरूपं॥
आधारत्वो विषयात्मकश्च संबंध उक्तो भवतीति बोध्यं॥ ब्रह्म इति द्विरूपं भवेदित्यन्वय:॥ उक्तंच
आत्मकृते: परिणामाच्चेति सूत्रकृता॥ कृतौ तदात्मानमितीश्वरस्य कृत्या श्रयत्वं कृतिकर्मता च॥ स्व
यं कृतीयानपदद्वयेन कुमादतोऽयं भवति द्विरूप:॥ तदात्मानं स्वयमकुरुतेति श्रुतावित्यर्थ:॥ सा

वधेयं वेदो तत्त्ववर्णोक्रियमाणे कृतेऽपि प्रतिबंधात्तत्त्वज्ञानानुदये तत्प्रतिबंधनिवर्तकं नामकी
र्तनाद्याश्रयणीयं तन्निवृत्तौ ववेदांतादेर्ज्ञानोदयः ॥ व्युत्पत्तिमीद्यादिना श्रवणादिरहित
स्य तु निरंतरकीर्तनादिपरस्यांते कृपालुर्भगवांस्तारकमुपदिश्य तज्जन्यज्ञानेन मुक्तिःस्या
दिति ॥ इदं च सर्वं नामकौमुद्यां प्रपंचितमित्यलं ॥ तस्माद्युक्तकीर्तनादिपरस्य ज्ञानापराधा
दिरहितस्य सेव्यमानं भगवन्नाम ब्रह्मबोधजनकमित्यनवद्यं ॥ इत्यानुविशेषः ॥ नन्वेदि
वाव गतनीर्जितनिह एकहत्या युक्तधर्मवतः शीघ्रं ज्ञानान्मुक्तिः अन्यस्य तु पापनिवृत्ति
द्वारा सनातनादिपरंपरयेति ॥ इदं च तत्रैव व्यक्तमिति चेत्प ॥ स्यात्कल्पितेनापि न वस्तु दृष्ट
त्वमेण मुक्तिर्न हि तद्युता स्यात ॥ क्वनित्यसंगो…मित्यवाच तस्मादहं ब्रह्म महागिरास्मि ॥१५॥
अनंतनाम्नाप्युज्ज्वलतावकीन श्रीदिव्यनामस्मृतिनष्टदोषः ॥ श्रीदशास्त्रोक्तेः कृपमस्य योग्यः १०२
श्रीसद्गुरो मामपि राम पाहि ॥ निरोहितं मे परमेश्वरत्वं ध्यानात्त्वदेकस्य विजानु राम ॥ तव त्व

×रा४

बुद्धावनतोऽजनस्य बंधः प्रबुद्धाद्भवबंधनात्रा… रामाकौनिष्पत्तिरुदीरितामे कृत्यानघत्वा
दिके रूपतो… ॥ श्रीह्येणरूपेण विदांसनोऽपि न सा विरुद्धेति मुनिर्जगाद ॥ चिन्मात्रता
यामपि पूर्वपाठाद्वैतस्य पुंसो व्यवहारदृष्ट्या ॥ उक्ता नघत्वादिगुणो घसत्त्वात्तजैमिनीया
दिमताविरोधः ॥ त्वद्भक्तियुक्तेषु जनेषु मैत्री श्रीराम भूयान्मम सर्वकाले ॥ तेषामवज्ञा न च
गुर्ववज्ञा नैवास्तु न ब्रह्मविदामवज्ञा ॥ निन्दा…धवज्ञोत्थमघं न हे निखिलं व…हाय पिराम
नाम ॥ आरब्धकर्मापि तदन्यदेव हंतीति चेत्तत्स्थपितं पुराणे ॥ …भक्तिर्गुरुदेवभक्ति
×रा० ब्रह्मैक्यभक्तिः सततं ममास्तु ॥ दुर्वासनाश्चित्तगताश्च दोषानरूपं तु सर्वे विदन्तु यहेतोः ॥ अज्ञान
नष्टोऽयं विवर्जितुस्य [?] ब्रह्मात्मसंबोधेन भवत्प्रसादात ॥ विदेहकैवल्यमवि… तामेकदा त्वं वेदा
महं पांविधेहि ॥ विमुक्तिरत्नानि नवोत्तमानि नरोत्तमेन ग्रथितानि धीराः ॥ धरंति ये यां तु
विदेहमुक्तिं ते राम सर्वे त्वद्भवत्प्रसादात् ॥ मे गतो तस्मात्वरतेति स्यात्कल्पितेनेत्यादिना यद्य

पिक्वचिद्वादैः कल्पितत्वान्न वस्तुतः कर्तृजीवस्तथापि तत्त्वसाक्षात्कारं विना न मुक्तः॥ अन्यथा सर्वो
प्यसंसारी स्यात्॥ मुक्तिं तत्त्वसाक्षात्कारेणैव रजतभ्रमनिवृत्तेर्दृष्टत्वात्प्रकृते च भगवत्तत्त्वसा
क्षात्कारेणैव संसारभ्रमनिवृत्तेर्वाच्यत्वात्॥ गुरूपदेशं विना च न तत्त्वसाक्षात्कारः॥ आचार्यवान्पुरु
षो वेदेति श्रुतेः॥ उक्तस्य च नोपदेशयोग्यतेत्यत आह अनंतेति॥ पाहीत्युक्ते कथं रक्षणं कार्यं वि
त्यपेक्षायां परमिथ्याज्ञानानुवृत्तितिरोहितं तत्तस्य बंधविपर्ययाविति निरुक्तार्थं वदन् प्रार्थयते॥ तिरोहित
म्मइति॥ भवतीति॥ सेसा रामो त्ति स्थिति बंधहेतुः॥ ज्ञात्वा देवं सर्वपाशापहानिरित्यादिश्रुतेर्निति
ज्ञेयं॥ विधांतरेणापि प्रार्थयते रामाभिनिष्पन्निरिति॥ स्वेन रूपेणाभिनिष्पद्यत इति श्रुत्या उदी
रिता अनघत्वादिरूपेणाभिनिष्पत्तिर्मेस्तु॥ अत एव केन रूपेणाभिनिष्पद्यत इत्यपेक्षायां
ब्राह्मेण जैमिनिरुपन्यासादिभ्य इति सूत्रितं॥ यद्ब्राह्मं रूपमपहतपाप्मत्वादि सत्यसंकल्पत्वां
तं सर्वज्ञत्वसर्वेश्वरत्वादि च तेन रूपेणाभिनिष्पत्तिः य आत्मापहतपाप्मेत्याद्युपन्यासेन आ १०७

नां वेदांते प्रवृत्तिर्दृश्यते नैवं नाम्नीति चेन्न॥ पापराशिदूषिताभ्यस्य श्रद्धा लोस्ति न तत्र न प्रवृ
त्तिरिति तांके भगवद्भक्तहृद्यां नोजभासमानसकलज्योतिर्ज्योतिः स्वप्रकाशानिरति त्राया
नेदमूर्समश्रीरामनिरवधिककरुणाकटाक्षितस्य पुरुषोत्तमस्यापि न भवेत्॥ न चायाससा
ध्येनैव कार्यमिति नियमः॥ दृश्यते हि बहुवित्तव्ययायाससाध्यौषधानि वृत्तस्यापि रोगस्य
सुलभेनापि यत्किंचिदौषधेन निवृत्तिः वस्तुशक्तेरचिंत्यत्वात्॥ भगवन्नाम्नश्चाचिंत्यानंतश
क्तिर्वे प्रसिद्धं नाम्नोस्ति यावती शक्तिरित्यादौ॥ किंच भगवति भक्तिर्हि कीर्तनादिरूपा दुर्लभै
व॥ जन्मांतरसहस्रेषु इत्यादिस्मृतेः॥ अपि च॥ भक्तिर्ज्ञानसाधनत्वेनांगीकार्या॥ भक्त्या मा
मभिजानातीति गीतास्मृतेः॥ भक्त्या त्वनन्यया ध्यानत्रामाधेयं तमानेज्ञी तु शक्या देव इहेवामुत्र च इ ॥
दुर्विज्ञेयो जन्मशतेष्वपि विनानैरस्य संसारध्वांतविनाशं हरिमीड इति भगवद्भक्त्यकारस्व च
नाच्च॥ प्रपंचितं च तैस्स हरेर्नाम भाष्यस्याद्यविवरणे भगवन्नामकीर्तनादिवैभवं॥ इदं चान्ना

स्वेच्छे मिन्योद्भुतोमि मतद्वयाविरोध इत्यर्थः ॥ मत्कृतजनवात्सल्यं मम पर्वानुमोदनमित्यादि भगव
द्धर्मा एता मुक्तो कृतवात्सल्यं प्रार्थयते त्वत्कृतिर्ज्ञान प्रतिबंधान्नाव्यर्थमाह नेवाम वद्गेत्यादि
ना ॥ तेः कृतोपकारं च स्मृत्वा न कल्किं प्रार्थयते ॥ वत्कृतेति ॥ तदुपकारास्मरणे कृतघ्नता स्यात् ॥ ब
लघ्न नि: कृति ईप्सा कृतघ्नेना स्मि निः कृतिरिति स्मृतेः कृतघ्नता दोषो मुमुक्षोर्न युक्तः ॥ तेनैव
दोषेणप्रतिबंधात् फलप्रतिबंधः स्यादितिभावः ॥ मतद्वयाविरोध इत्युक्तं न चैते मम न्याय
त्वा: वलि कूले का ॥ अरव एद्व आत्राधिया विमुक्तेरज्ञान हानाच्च तदीय धर्माः ॥ सेतीति चेद्बदनरे
तदुक्ते रज्ञानजेदस्यसमाश्रिनत्वात् ॥ न तदीयेति आज्ञानिक धर्माः मुक्तपुरुषेन संनिन्वेदित्यर्थः ॥
तदुक्ते ॥ अज्ञानसत्वस्य स्वमुक्तत्वादित्यर्थः ॥ अज्ञानलेशानुस्यूते जीवन्मुक्ते समाश्रयात् ॥ अज्ञाव
त्वादविद्याया ब्रह्मज्ञानोदये कृचित ॥ निवर्त्तते सावंशेन यथा स्वं परस्त्वेतु ॥ अंशांतरेरनुस्यूतेर
तो नैको पिनश्यति ॥ तथा चांशांतरास्यादेहद्वितयमानिनः ॥ तद्धर्मा नाचरंतीति प्राकृत्यमनो १०४

श्री४

×नै

षिताः ॥ अज्ञानेकोपिनदोष इत्याह अंशो वादि श्लोकत्रयेण ॥ अनुस्यूते रनुगमस्य समाश्रयाद
गीकारादित्यर्थः ॥ कृचिदिति ॥ कृचिदुपाधौ ब्रह्मज्ञानोदये असावविद्यांशो न निवर्त्तते प
रत्वनुपाध्यंतरेण अंशांतरेर्यथापूर्व मनुगमादज्ञाने कोपि न नश्यतीत्यर्थः ॥ तथा च ॥ अज्ञान
स्य सांशत्वे सतीत्यर्थः ॥ मानिनः अभिमानिनः ॥ नानाविद्या [illegible] पक्षे एवात्र कपेयः पुंभेदो या
वद्रूपको हीतिचेन्न ॥ मूलाज्ञाने भिन्नता जीवभेदस्त तज्जीव भिन्न एव प्रपंचः ॥ स्यादित्येवं गौरव
मानहानेर्वैकाविद्यापक्ष एव समीचीनः ॥ अज्ञानांशैर्बद्धमुक्त व्यवस्था स्याद्योयोनिर्योनिर्मित्या
दिवाक्यात् ॥ शोकते नानेति ॥ हि यस्मात् अत्र एकाविद्यापक्षेपि जीवभेद आवश्यक इतिचेदित्य
र्थः ॥ अज्ञानेति अज्ञानस्य अंशांतरैर्व्यवस्था स्यात् तत्र हेतुर्योयोनिमिति ॥ योयोनिर्योनिमि
ति ॥ योयो निर्योनिमधितिष्ठतीत्यादिवाक्यात् स्यात्सिध्यतीत्यर्थः ॥ तत्र हि मायायां एकत्वेपि
तदंशानां जीवोपाधीनां तत्संधानयोनीनामविद्यांशानां भेदादीमा घटते न चानन्ये वक्तृत्या

×नैं३

मायाभेदसिद्धिः॥ मायां तु प्रकृतिं विद्यादिति पूर्वप्रकृतिविरोधात्। एकवचनेन तदेकत्वलाभादिति
भावः॥ तस्याविद्यामिति संसृतत्वान्मायात्तरंतीति हरारितत्वात्॥ अजामेकतावेकपक्षस्यैक्ते श्व
मायैव भंगीक्रियतामिहद्धिः॥ मायामिति॥ मामेव ये प्रपद्यंते मायामेतां तरंतीति इति श्री हरि
नोक्तत्वादित्यर्थः॥ न चेन्द्रो मायाभिरितिविभक्त्या तद्भेदः॥ तद्वाक्यस्यानेकशक्तिस्मृतिविरोधान्मा
याकार्यपरत्वेन मायावत्त्वपरत्वेन वा नेयत्वात्॥ किं वाजामेकामित्यादिश्रुतावेकामित्येकशब्दे
न तदेकत्वश्रवणाद्भेदेन तत्र विवाद इत्याह अजेति॥ असत्युनानासुखविभ्रमस्पृष्टिः सत्या ध्रुयास्थे
ज सुखस्वरूपात्॥ न संघटते नेति हि कल्पनीया मायानमेयाकृतिर्नोन्यतश्च॥ एवं किं लोकस्य कर्म
मात्रविषयत्वात् वेदान्तानां च नित्याद्वयस्वलसुखविषयत्वाच्चेः फलाविद्याप्रतिपादकत्वात्
स्पष्टप्रत्यक्षादिविषयत्वे च विवादाभाव असंगादित्तिभावः॥ एकैव मायानुपपत्तिश्च प्रकल्पन
यासहलाघवेन॥ निद्रैकदोषाद्बहुदोषदृष्टेरेकापि चित्रं रचयेत विश्वं॥ कल्प्यमानमज्ञान १०५

दित्राद्देशा विधिव्यपदेशात्संव॥ तत्रोपन्यास उद्देशः स च सोन्वेष्टव्य इति विधानार्थमागतत्वाद्विधि
रत्नात् ज्ञापनं एन उभयमिन्नो व्यपदेशः॥ सर्वज्ञः सर्वेश्वर इत्यादिरूपः॥ अयं हि नोद्देशः॥ विध्यभा
वात्॥ नान्यविधिः सिद्धवन्निर्देशात् एवमेतेन हेतुभिर्ब्राह्मेण रूपेणाभिनिष्पद्यत इति जैमि
निर्मन्यत इति सूत्रार्थः॥ ननु चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिरित्यनन्तरसूत्रेण॥
एवं वा अरेयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवेत्यादिश्रुत्या च चैतन्यमात्रमा
मनः स्वरूपमित्यवगतेस्तद्विरोध इत्यत आह॥ ब्राह्मेणेति॥ विदात्मनोपि ब्राह्मेत्येपला
साअभिनिष्पत्तिर्न विरुद्धेति॥ एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायण इति
सूत्रेणाहेत्यर्थः॥ सूत्रार्थमाह चिन्मात्रतायामपीति श्लोकेन॥ चिन्मात्रेपीत्यर्थः पूर्वभा
वादित्यस्यैवार्थमाह बद्धस्येत्यादिना सत्यादित्यन्तेन॥ बद्धपुरुषव्यवहारदृष्ट्या उप
न्यासाद्यवगतस्य मायामयस्य पूर्वोक्तगुणसंघस्य सत्त्वात् संभवादित्यर्थः तदिति।

सर्वे ३

४ण५

वाचे निरुद्धे मनसि प्रवृत्तो वागिंद्रियव्यापारनिवृत्तिः स्यात॥ स्याद्वैदिकवा प्रथमान्तत्वाद्यो क्रि
स्वपि न्वा व्येमनसीति दीर्घः॥ वाङ्निरोधं व्याकरोति वागिंद्रियेति॥ वाग्व्यापृतिः सा द्विविधा जपादिः
स्या लौकिकी चेति निरोधयोगे॥ त्यजेज्जपादिं परिवर्जनीया वा त्वुत्थानकालेपि च लौकिकी सा
सा वाग्व्यापृतिः॥ तदुक्तं॥ मौनं योगासनं योगस्तितिक्षैकांतशीलता॥ निस्पृहत्वं समत्वं च सप्ते
तान्येकदंडिन इति॥ कामादिबाह्येंद्रियनिग्रहेण निःश्छन्मनो मात्रं तया मनीषी॥ मनस्थसंक
ल्पविकल्पहेतुं यच्छेदहंकर्तरि सद्विधा स्यात॥ एतेन वागिंद्रियमुपलक्षणमित्याह वागादीनि॥ ए
तान्हरो स्मीत्यभिमन्यमानो ज्ञानात्मसंज्ञो त्र विशेषरूपः॥ अस्मि त्वमात्वं अभिमन्यते यः सामा
न्यरूपः समहानितीष्टः॥ अहंकर्त्ता द्विविधः विशेषरूपः सामान्यरूपश्चेत्याह एतादृशः इति॥ अ
मुकस्य पुत्रइत्याद्यभिमन्यमान इत्यर्थः॥ यच्छेदहंकर्तरि निर्मनस्कोऽस्वात्मा विकेतेन च विशेष १०५
रूपं॥ यथाल्पतेंद्रीनजंतो विशेषः संकोचमेति स्वत एव तद्वत॥ विनेव नो विस्मरणाद्यतस्याहं

कारस्य कोच इतीरितेयं॥ तेद्रा समानार्थिक निर्विकल्पज्ञाने न तु ल्पाच तृतीयभूमिः॥ विशेषरूपं य
च्छेदित्येतदेव विवृणोति यथेत्यादि संकोच इत्यंतेन॥ न द्वसंकोच इत्यन्वयः॥ तृतीयं तृतीयभूमि
मित्यन्वयः॥ वशीकृतायां च तृतीयभूमौ ज्ञानेन नियच्छेत्कथितं महांतं॥ सामान्यरूपं महदात्मने
त्यकाविदेकपरिशेषयेत्तु॥ तमात्मनि यच्छेदित्येतदेवाह सामान्येति॥ निरुद्धचित्तं विषयव्यपेतं ल
याभिमुख्यं यदि याति तर्हि॥ निद्रावशेषादियदेवहेतुर्लयस्य तद्धारणतः प्रबोध्यं॥ शांतात्मनि
ष्ठां च कुमारणेन निरुद्धेति॥ लयः सुषुप्तिः॥ अजीर्णता बहुशः तत्र मध्ये निद्रावशेषश्च लयस्य हेतुः॥
तद्धारणतः प्राणनिरोधतो वा योगी स्वचित्तं वशमानयीत॥ तदुक्तं॥ समाययन्निद्रां सुजीर्णेल्पि नेजी
श्रमत्याज्य बाधे विविक्ते प्रदेशे॥ समासीत निरुत्स्नु एष प्रयत्नो थ वा प्राणरोधोऽनुज्ञात्वा समागादि
ति॥ लयव्यपेतं यदि कामभोगे विक्षिप्यते चेद्विषये षु दोषं॥ दुःखं च संस्मृत्य विवेकशाली ब्रह्मा
स्मतत्त्व स्मृति इर्वकेण॥ भोग्यार्थसंदर्शनवर्जनेन विक्षेपतश्चित्तशमं प्रकुर्वीत॥ अजं प्रसिद्धं प

रमात्मतत्वं स्मरन्मनीषी न हिंक्लोग्पमीक्ष्येत ॥ कामश्च भोगश्चेति द्वंद्वैकत्वं ॥ यद्वा काम्यं तरति कामा
विषयास्तेषां भोग इत्यर्थः ॥ प्रसिद्धं ज्ञानं प्रसिद्धमित्यर्थः ॥ यस्तीव्ररागादिकवासना स्वयःकषा
यदाषो यक्तिन युक्तं ॥ समाहितं नेति मनोवगत्य विक्षेपवत्तस्य शामं प्रकुर्यात् ॥ विक्षेपस्येव कषा
यस्य शामं प्रकुर्वन्न कुर्यादित्यर्थः ॥ दुःखेकार्यं कदाचित्स्यात् ॥ चित्तं यस्तं कषायतः ॥ लालासमाहि
तं नेति कषायं चनिकस्येत् ॥ लीलेलयादोमनसा समास्वेव प्रसाप्यनेन जनचालयेद्धः ॥ आ
विलुवेद्ध ससुखं समयं संस्थापिते चेतसि संप्रयत्नात् ॥ समेति ॥ सम मं सर्वेषु भूतेष्वित्यादि
स्मृते इत्यर्थः ॥ तच्च समप्राप्तं चित्तं कषायलयादिभ्यो न चालयेत् ॥ संप्रयत्नात् ॥ सम्यक्
दमकुध्यालयविक्षेपकषायसमप्राप्तं भीर्धि क्विय प्रयत्नतः ॥ चित्ते प्रलगे संस्थापिते सति प्रसन्नस्व
रूपं सुखं सम्पगाविर्भवेत् ॥ सुखमात्मनि कं यत्तद्बुद्धिग्राह्यमतीन्द्रियमिति निस्पृते ॥ समाधिनिर्धू
तमलस्य चेतसो निवेशितस्यात्मनि यत्सुखं भवेत् ॥ नशक्यते वर्णयितुं तदा गिरा स्वयं तदंतःकरणे १०

मेकमनेकं चेति सद्वये एकस्यापि निद्रादोषस्यानेककार्यहेतुत्वस्य स्वप्ने द्रष्टव्यत्वाल्लाघवसहकृ
तानुपपत्तिर्विचित्रशक्तिकमेकमेवाज्ञानमादाय विश्वाप्यनीत्याह एके चेति ॥ सहेति लाघवस
हकृतानुपपत्तेरित्यर्थः ॥ निद्रेति ॥ निद्रारूपादेकदोषादित्यर्थः ॥ अजामेकामिति श्रुतिस्वय
थोकार्थानुपपत्तिसिद्धार्थानुवादिनीत्याकृतिया धन्यच विस्तरः ॥ वाक्येतरोधादिकयोग्यबु
द्धा हीनाश्च मूढा बतयोति सुक्तिं ॥ यन्नामसंकीर्तनमात्रेण सत्स्वं श्रीरामचंद्रं कलये कृपालुं ॥ मं
गलस्य यस्त्वस्य बकुश्रेयस्करत्वात्तु नश्चेष्टदेवतानुसंधानरूपं मंगलमाचरति ॥ वाक्येति ॥
वाक्यजन्ये मनसि निरोधः आदित्राप्तामनसो ज्ञानात्मारव्यविशेषाहंकारे तस्य चस्तामान्याहंकारे तं
स्य च तां नात्मनि निरोधस्त्वनयोग्याएकाग्या इदमुपलक्षणं सूक्ष्मवस्तुविषयत्वेन सूक्ष्मात्वतया
बुध्येत्यर्थः ॥ तथा च श्रुतिः ॥ यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि ॥ ज्ञानमात्मनि महति
नियच्छेत्तद्यच्छेच्छान्त आत्मनीति ॥ तदर्थश्च समन्वयन्यायरत्नावल्यां श्लोके स्फुटस्तेनात्रलिखितं ॥

नै० सं०
१०८

यदि कदाचित्सुखास्वादस्य शीत वात मशकाद्युपद्रवेण वा निश्चरेत्तदा किं कार्यमत आह चित्तमिति ॥
चरत् निश्चरेच्चित्तं पुनर्निश्चलं यथा स्यात्तथाऽद्वैतरूपं ब्रह्मणा एकीभूतं कुर्यात् ॥ तत्र साधन
माह निरोधेति ॥ एवमुक्तरीत्या वाङ्निरोधादिना एकाग्रबुद्ध्या रहिताः अतएवमूढाः एता
दृष्ट्वा अपि मुक्तिं यांति बत आश्चर्यं ॥ दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरित्युक्त
साक्षात्कारसामग्रीराहित्येन तद्धीना अपि मुक्तिं प्रयांत्यहो नाम कीर्तनमाहात्म्यं तदेतत्स्वरूपं
चितं श्रीभागवते भगवन्नामकौमुद्यां चाविस्पष्टमतिविस्तरेण ॥ चांचल्यतो ब्रह्मणि न
स्थिरमेति चित्तं कथं ब्रह्मसुखानुभूतिः ॥ श्रीरामनामस्य तु कीर्तनाद्यैर्विभातु सद्ब्रह्मसुख
समर्थं ॥ वेदान्तामृतमेतच्चु पिबंतु त्वत्कोशतो बुधाः ॥ यतो मत्स्य विनाशो न ब्रह्मामृत
सुखं न वेत्त ॥ वाङ्गिकाच्चरणं छोध्य माधवीयस्य मेधयात्तेनेरीयक सारार्थ सारामृतमुपा
गते ॥ अनायासेन संसेव्यं स्वादयंतु महार्थिनः ॥ रसज्ञानां रसज्ञा हि परत्रापि रसग्र १०८

हाः ॥ ॥ ॥ श्रीः ॥ ॥ ॥ ॥ संवत् १७१८ शाके १५८३ भाद्रपद
वदि ११ सोमे गंगातीरे व्यासकाश्यां नगर्यां रामनगरे। लिखितमिदं पुस्तकं ज्योतिर्विद्
विश्वनाथात्मज गंगाधरशर्मणा ॥ समाप्तमिति ॥ ॥ शुभं भूयात् ॥ ॥ ॥

१०२ १३/२६

१८२

तैत्तिरीयकसारार्थः समाप्तः

१०२

नश्यत न इति श्रुतेरित्यर्थः॥ निवृत्तिस्वल्पमेतसमाधिकाले स्याच्छेतसा ब्रह्मसुखानुभूतिः॥ नास्वा
दयेदित्यादिने यदत्र भोगो उपादेयं विरुध्यते तन्न॥ क्वतिसन्त्यादिविवक्षितमर्थमाह॥ निवृत्ती
ति॥ संस्कारमात्रशेषतया स्वस्मिन्वृत्तिरहितेनैव तत्सुखमीक्षेतेत्यर्थः॥ नास्वादयेत्सुखं तत्रेति या
वृक्तेनदत्र न विरुध्यत इत्यन्वयः॥ समाधिविरोधी सविकल्पबोधो यः स्यात्सुखास्वादनशब्द
वाच्यः॥ महत्समाधौ सुखमनुभवामीति दृष्ट्या स्वात्र निषिध्यते सः॥ एवार्थे चकारस्य स इत्य
नेनान्वयः॥ योऽवस्थितस्य सविकल्पपरामर्शः स एवात्र निषिध्यत इत्यविरोध इत्यर्थः॥ स्वकी
यभावः प्रकटीकृतो येन निःसंग इत्यादिगीतायामेव॥ चित्तं चरन्निश्चलमीशरूपं निरोधयत्वि
नमुक्तः प्रकुर्यात्॥ उक्तं समर्थयते स्वकीयेति॥ निःसंगः प्रज्ञया भवेदिति वाक्येनेत्यर्थः॥ प्रज्ञ
प्स सविकल्पकं ज्ञानं प्रज्ञा तया सहसंगं त्यजेत् यद्वा धृतिगृहीता बुद्धिः प्रज्ञा तदा सकेन साधं
नेनसुखास्वादनतद्दर्शनादिरूपामासक्तिं त्यजेदिति तद्वाक्यार्थः॥ समाधौ ब्रह्मानंदमग्नं